Barcode : 99999990066637
Title -
Author -
Language - sanskrit
Pages - 116
Publication Year - 1925
Barcode EAN.UCC-13



P. O. BOX 644
PRINCETON, N. J. 08540

RETURN POSTAGE GUARANTEED

Central Library
Banasthali Vidyapith
Rajasthan, INDIA

वनस्थली विद्यापीठ
पुस्तकालय
श्रेणी संख्या 891.28
पुस्तक संख्या MST4Y:-3
प्रवाष्टि क्रमांक 22139

गृह्ist 1926.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A.

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 344.

Registered According to

याज्ञवल्क्यस्मृतिः ।

श्रीमित्रमिश्रकृत 'वीरमित्रोदय' टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा' टीकया च सहिता ।
साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च
संशोधिता ।

YĀJÑAVALKYA SMRTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's Mitākṣarā.

EDITED BY

Nārāyaṇa S'āstrī khiste Sāhityāchārya — ...t Librarian
Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya ...holāl Scholar
Sarasvatībhavana Benares.

FASCICULUS III—२.

BLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1925.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

(वी० मि०) श्रोत्रिये त्वतिथौ विशेषमाह—

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् ॥
सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः ॥ १०९ ॥

श्रोत्रियः पूर्वलक्षितस्तदर्थं महान्तमुक्षाणं वृषं महान्तमजं छागं वा उपकल्पयेत् पचेत् । 'राज्ञे वा ब्राह्मणाय वा महोक्षं (१)वा महाजं वा पचेत्' इति श्रुतेः । सत्क्रिया स्वागतवचनपाद्यार्घाचमनादिदानम् । अन्वासनं तस्मिन्नुपविष्टे पश्चादुपवेशनम् । स्वादु भोजनं मिष्टाशनम् । सूनृतं वचो धन्या वयं भवदागमनादित्यादिकम् । एतत्सर्वमुपकल्पनीयम् । विभक्त्यादिविपरिणामेनाऽर्थान्तरपुरस्कारेणोपकल्पयेदित्यस्याऽन्वयात् ॥ १०९ ॥

(मिता०) महोक्षमिति । महान्तमुक्षाणं धौरेयं महाजं वा श्रोत्रियायोक्तलक्षणायोपकल्पयेत् भवदर्थमयमस्माभिः परिकल्पित इति तत्प्रीत्यर्थं न तु दानाय व्यापादनाय वा । यथा सर्वमेतद्भवदीयमिति प्रतिश्रोत्रियमुक्षासम्भवात् । 'अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु' इति निषेधाच्च । तस्मात्सत्क्रिया(२)ह्येव कर्तव्या । सत्क्रिया स्वागतवचनासनपाद्यार्घ्याचमनादिदानम् । तस्मिन्नुपविष्टे पश्चादुपवेशनमन्वासनम् । स्वादु भोजनं मिष्टमशनम् । सूनृतं वचः धन्या वयमद्य भवदागमनादित्येवमादि । अश्रोत्रिये पुनः 'अश्रोत्रियस्योदकासने' इति गौतमोक्तं वेदितव्यम् ॥ १०९ ॥

(वी० मि०) अतिथिप्रसङ्गेन गृहागतानां स्नातकादीनामर्घ्यत्वमाह—

प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्य्यपार्थिवाः ॥
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः ॥११०॥

स्नातकस्त्रिविधः प्रागुक्तः । आचार्य्यश्चोक्तलक्षणः । पार्थिवो वक्ष्यमाणलक्षणः । प्रियो मित्रम् । विवाह्यो जामाता । चकारेण श्वशुरादिसमुच्चयः । तथा चाऽऽश्वलायनः—'ऋत्विजो वृ(३)त्वा मधुपर्कमाहरेत् स्नातकायोपस्थितायाचार्याय राज्ञे श्वशुरपितृव्यमातुलानां

(१) महाजं वा—इति क० पुस्तके नास्ति ।
(२) यावेव कर्तव्यं ग । (३) धृत्वा—इति क. पु. पाठः ।

चे'ति। एते गृहमागताः प्रतिवत्सरं अर्घ्या मधुपर्काख्येन कर्मणा पूज्याः। प्रतिसंवत्सरमित्याभिधानादेकास्मिन्वर्षे पुनःपुनरर्घो नास्तीति दर्शयति। ऋत्विजो याजकाः पुनर्वर्षमध्येऽपि प्रतियज्ञमर्घ्या इति विशेषः॥ १०॥

(मिता०) प्रतिसंवत्सरमिति। स्नातको विद्यास्नातकः व्रतस्नातकः विद्याव्रतस्नातकः इति। (स(१)माप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः। 'समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः। उभयं समाप्य यः समावर्तते स विद्याव्रतस्नातकः)। आचार्य उक्तलक्षणः। पार्थिवो वक्ष्यमाणलक्षणः। प्रियो मित्रम्। विवाह्यो जामाता। चकाराच्छ्वशुरपितृव्यमातुलादीनां ग्रहणम्। 'ऋत्विजो वृत्वा मधुपर्कमाहरेत्स्नातकायोपस्थिताय राज्ञे चाचार्याय च श्वशुरपितृव्यमातुलानां च' इत्याश्वलायनस्मरणात्। एते स्नातकादयः प्रतिसंवत्सरं गृहमागता अर्घ्याः मधुपर्केण संपूज्या वन्दितव्याः। अर्घशब्दो मधुपर्कं लक्षयति। ऋत्विजश्चोक्तलक्षणाः संवत्सरादर्वागपि प्रतियज्ञं मधुपर्केण संपूज्याः॥ ११०॥

(वी० मि०) प्रागुक्तयोरतिथिश्रोत्रिययोर्लक्षणमाह—

अध्वनीतोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः॥

अध्वनि वर्तमानोऽतिथिर्ज्ञेयः। अध्वनीनत्वं तु—

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।

इत्यादिनानास्मृत्युक्तविशेषणानामुपलक्षणम्। वेदपारगः सम्पूर्णशाखाध्येता श्रोत्रियो ज्ञेयः॥

(वी० मि०) अतिथिश्रोत्रिययोः पूजने फलमाह—

मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः॥१११॥

एतावतिथिश्रोत्रियौ ब्रह्मलोकमभीप्सतो ब्रह्मलोकप्राप्तिकामस्य मान्यौ पूज्यौ। नित्यस्याऽप्यतिथिपूजनस्य फलमिदमानुषङ्गिकमिति॥ १११॥

(मिता०)अध्वनीति इति। अध्वनि वर्तमानोऽतिथिर्वेदितव्यः। श्रोत्रियवेदपारगावध्वनि वर्तमानौ ब्रह्मलोकमभीप्सतो गृहस्थस्य

---

(१) धनुश्चिह्नगो भागः क. ग. नास्ति।

मान्यावतिथी वेदितव्यौ । यदप्यध्ययनमात्रेण श्रोत्रियस्तथापि श्रुताध्ययनसम्पन्नोऽत्र श्रोत्रियोऽभिधीयते । एकशा(१)खाध्यापनक्षमो वेदपारगः ॥ १११ ॥

(वी० मि०) गृहस्थस्य धर्मान्तरमाह--

परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते ॥
वाक्पाणिपादचापल्यं वर्जयेच्चाऽतिभोजनम् ॥११२॥

परपाके रुचिर्यस्य स तथा न स्यात् । सति सम्भवे परान्नाऽशनं वर्जयेदिति । अ(२)त्र प्रतिप्रसवः-अनिन्द्यामन्त्रणादृते अनिन्द्यकृतामन्त्रणं विनेत्यर्थः । 'अनिन्द्येनाऽऽमन्त्रितो नाऽपक्रामे'दिति वचनात् । वाक्चापल्यमनृतभाषणादि । पाणिचापल्यं(३)परदारद्रव्यादानादि वृथास्फोटनादि । पादचापल्यं निर्माल्यलङ्घनादि वृथा क्षेपणादि । अतिभोजनम्--

जठरं पूरयेदर्ध्दमन्नैर्भागं जलेन च ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥

इत्यादिविहितभोजनादधिकं भोजनम् । चकारान्नेत्रादिचापल्यसमुच्चयः । 'न शिश्नोदरपाणिपादचक्षुर्वाक्चापलानि कुर्या'दिति गौतमवचनात् ॥ ११२ ॥

(मिता०) परेति । परपाके रुचिर्यस्यासौ तथोक्तः परपाकरुचिः । नैव परपाकरुचिः स्यात्, अनिन्द्येनामन्त्रणं विना । 'अनिन्द्येनामन्त्रितो नापक्रामेत्' इति स्मरणात् । वाक्पाणिपादचापल्यं वाक्च पाणी च पादौ च वाक्पाणिपादं तस्य चापल्यं वर्जयेत् । वाक्चापल्यमसभ्यानृतादिभाषणम् । पाणिचापल्यं व(४)लगनास्फोटनादि । पादचापल्यं लङ्घनोत्प्लवनादि । चकरान्नेत्रादिचापल्यं च वर्जयेत् ।'न शिश्नोदरपाणिपादचक्षुर्वाक्चापलानि कुर्यात्' इति गौतमस्मरणात् । तथा अतिभोजनं च वर्जयेत् । अनारोग्यहेतुत्वात् ॥ ११२ ॥

---

(१) अध्ययनक्षमो-ख. । (२) अन्यत्र-इति क. पु. पाठः ।
(३) परदारेत्यारभ्य पादचापल्येत्यन्तं नास्ति क. पुस्तके ।
(४) पल्याण ख. ।

(वी० मि०) पूर्वोक्तातिथिसत्कारे विशेषमाह—

अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् ॥

तृप्तं निःपादिततृप्तिक्षमभोजनम् । आसीमान्तं स्वग्रामसीमापर्यन्तम् ॥

(वी० मि०) षष्ठादिदिनभागकृत्यमाह—

अहःशेषं समासीत शिष्टैरिष्टैश्च बन्धुभिः ॥११३॥

अहःशेषमित्यन्तसंयोगे द्वितीया। शिष्टैः पुराणाद्यभिज्ञैः। इष्टैः प्रियैः। बन्धुभिः ज्ञात्यादिभिश्च। समासीत सुखेनासीत। तथा च दक्षः—

भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्
इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ॥
अष्टमे लोकयात्रा तु बहिः सन्ध्या ततः परम् ॥११३॥

(मिता०) अतिथिमिति। पूर्वोक्तं श्रोत्रियातिथिं वेदपारगातिथिं च भोजनादिना तृप्तं सीमान्तं यावदनुव्रजेत्। ततो भोजनानन्तरमहःशेषं शिष्टैरितिहासपुराणादिवेदिभिः, इष्टैः काव्यकथाप्रपञ्चचतुरैः, बन्धुभिश्चानुकूलालापकुशलैः सहाऽऽसीत ॥ ११३ ॥

(वी० मि०) सायंसन्ध्यादिकृत्यमाह सार्द्धश्लोकेन—

उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च ॥
भृत्यैः परिवृतो भुक्त्वा नाऽतितृप्तोऽथ संविशेत् ॥११४॥

उक्तविधिना सायंसन्ध्यावन्दनं कृत्वाऽग्नीन् श्रौतस्मार्तान् हुत्वा हवनक्रियायामग्नीनामपि कर्मत्वं, बहुशस्तथाप्रयोगदर्शनादित्यग्नीनित्युक्तम्। उपास्य उपस्थाय तद्दैवत्यमन्त्रजपादिनेति शेषः। चकाराद्वैश्वदेवहोमादिकं पुनःपाकपक्षे समुच्चिनोति। तथा च विष्णुपुराणम्—

पुनःपाकमुपादाय सायमप्यवनीपते।
वैश्वदेवनिमित्तं तु पत्न्या सार्धं बलिं हरेत् ॥
तत्राऽपि श्वपचादिभ्यस्तथैवान्नापमा(१)र्जनम्।

भृत्यैः पुत्रादिभिः परिवृतः सहितो भुक्त्वा नातितृप्तः अतितृप्तिशून्यः संविशेत् शयीत। भुक्त्वेत्यनेनैवानन्तर्य्याभिधानेऽथशब्देन वेदाभ्यासानन्तर्यमभिप्रैति।

---

(१) वर्जनम्–इति ख. पु. पाठः।

प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानश्च ब्रह्मभूयाय कल्पते ॥
इति दक्षवचनात् ॥ ११४ ॥

(मिता०) उपास्येति। ततः पूर्वोक्तेन विधिना पश्चिमां सन्ध्यामुपास्य आ(१)हवनीयादीनग्नीनग्निं वा हुत्वा तानुपास्योपस्थाय भृत्यैः पूर्वोक्तैः स्ववासिन्यादिभिः परिवृतो नातितृप्त्य भुक्त्वा चकारादायव्ययादिगृहचिन्तां निर्वर्त्यानन्तरं संविशेत्स्वप्यात् ॥ ११४ ॥

ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ॥

(वी०मि०) पञ्चदशधा विभक्ताया रात्रेश्चतुर्दशो भागो ब्राह्मो मुहूर्तः, तस्मिन्नुत्थाय निद्रां त्यक्त्वा आत्मनो हितं धर्मार्थकामरूपम्। यदाह मनुः—

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चाऽनुचिन्तयेत्।
कायक्लेशांश्च तन्मूलान् वेद तत्त्वार्थमेव च ॥

विष्णुपुराणे च—

अपीडया तयोः काममुभयोरपि चिन्तयेत् ॥

(वी० मि०) चिन्तितांश्च धर्मादीन् यथाशक्ति निष्पादयेदित्याह—

धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत् ॥ ११५ ॥

स्वे धर्माद्याचरणाय विहिते न हापयेत् न त्यजेत्। तथा च गौतमः—'न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्याद्धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्या'दिति ॥ ११५ ॥

(मिता०) ब्राह्मे इति। ततो ब्राह्मे मुहूर्ते उत्थाय पश्चिमेऽर्धप्रहरे प्रबुध्यात्मनो हितं कृतं करिष्यमाणं च वेदार्थसंशयांश्च चिन्तयेत्। तदानीं चित्तस्याव्याकुलत्वेन तत्त्वप्रतिभा(२)नयोग्यत्वात्। ततो धर्मार्थकामान्स्वोचितकाले यथाशक्ति न परित्यजेत्। यथासम्भवं सेवेतेत्यर्थः पुरुषार्थत्वात्। यथाह गौतमः—'न पूर्वाह्णमध्याह्नापराह्णानफलान्कुर्यात् धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यात्' इति। अत्र यद्यप्येतेषां सामान्येन सेवनमुक्तं तथापि कामार्थयोर्धर्माविरोधेनानुष्ठानं तयोर्धर्ममूलत्वादेवं प्रतिदिनमनुष्ठेयम् ॥ ११५ ॥

---

(१) अग्निमग्नीन्वा ख.। (२) प्रतिभासन ख.।

(वी० मि०) गृहस्थधर्मान्तरमाह द्वाभ्याम्—

विद्याकर्मवयोवन्धुवित्तैर्मान्या यथाक्रमम् ॥
एतैः प्रभूतैः शूद्रोऽपि वार्धके मानमर्हति ॥११६॥

विद्या उक्ताः। कर्म श्रौतं स्मार्त्तं च। वयः स्वयसोऽधिकम्। सप्ततिवर्षोर्ध्वमिति केचित्। वन्धुर्वहुस्वजनसम्पत्तिः। वित्तं ग्राम्यपशु-हिरण्यादि। एतैरुपलक्षिता यथाक्रमं पूर्वा मान्या मननीयाः। एतेन विद्याधिकानां पूर्वपूर्वस्य उत्तरोत्तरापेक्षया मान्यतायां गरीयस्त्व-मुक्तम्। एतैर्विद्यादिभिः प्रभूतैः प्रत्येकं प्रचुरैः समस्तैर्व्यस्तैर्वा उप-लक्षितः शूद्रोऽपि वार्द्धकेऽशीतिवर्षोर्ध्वं माननीय इत्यर्थः। यदाह गौ-तमः—'शूद्रोऽप्यशीतिको वर' इति ॥११६॥

(मिता०) विद्येति। विद्या पूर्वोक्ता, कर्म श्रौतं स्मार्तं च, वयः आत्मनोऽतिरिक्तं सप्तत्या वा ऊर्ध्वं, व(३)न्धुः स्वजनसम्पत्तिः, वित्तं ग्रामरत्नादिकम, एतैर्युक्ताः क्रमेण मान्याः पूजनीयाः। एतैर्विद्याकर्मव-न्धुवित्तैः प्रभूतैः प्रवृद्धैः समस्तैर्व्यस्तैर्वा युक्तः शूद्रोऽपि वार्धके अ-शीतेरूर्ध्वं मानमर्हति। 'शूद्रोऽप्यशीतिको वरः' इति गौतमस्मर-णात् ॥ ११६ ॥

वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् ॥
पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः ॥११७॥

(वी० मि०) वृद्धो नवतिवर्षाधिकवयस्कः। भारी भाराक्रान्तः। नृपो भूपतिः। स्नातः पूर्वोक्तः स्नातकः। स्त्री प्रसिद्धा। रोगी रोगपीडितः। वरो विवाहोद्यतः। चक्री शाकटिकः। एषां पन्था देयः पथि मिलिते-ष्वेव(४)तेषु तन्मार्गादपसर्तव्यमित्यर्थः। तेषां वृद्धादीनां मध्ये नृपो मान्यस्तेन वृद्धादिना राज्ञा सह पथि समवाये राज्ञः पन्था देय इत्य-र्थः। भूपतेरपि स्नातको मान्यस्तेन राज्ञा स्नातकस्य पन्था देय इत्यर्थः। चकारान्मत्तान्धादिपरिग्रहः। तथा च शङ्खः—'वालवृद्धमत्तो-न्मत्तोपहतदेहभाराक्रान्तस्त्रीस्नातकप्रव्रजितेभ्यश्चे'ति। वौधायनश्च—

पन्था देयो ब्राह्मणाय गवे राज्ञे ह्यचक्षुषे।

---

(१) वन्धुर्वहुस्वजन ग.।

(२) मिलितेष्वेतेषु-इति ख. पु. पाठः।

ब्राह्मणायेत्यनेन सामान्यत एव ब्राह्मणस्य मान्यत्वमुक्तम् । यदाह शङ्खः-'अथ ब्राह्मणायाऽग्रे पन्था राज्ञ इत्येके, तच्चाऽनिष्टं गुरुर्ज्येष्ठश्च ब्राह्मणो राजानमतिशेते तस्य पन्था' इति ॥ ११७ ॥

(मिता०) वृद्धेति । वृद्धः प(१)क्वकेशः प्रसिद्धः । भारी भाराक्रान्तः । नृपो भू(२)पतिः, न क्षत्रियमात्रम् । स्नातो विद्याव्रतोभयस्नातकः । स्त्री प्रसिद्धा । रोगी व्याधितः । वरो विवाहोद्यतः । चक्री शाकटिकः । चकारान्मत्तोन्मत्तादीनां ग्रहणम् । 'बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रान्तस्त्रीस्नातकप्रव्रजितेभ्यः' इति शङ्खस्मरणात् । एतेभ्यः पन्था देयः । एते(३)ष्वभिमुखायातेषु स्वयं पथोऽपक्रामेत् । वृद्धादीनां राज्ञा सह पथि समवाये राजा मान्य इति तस्मै पन्था देयः । भूपतेरपि स्नातको मान्यः । स्नातकग्रहणं स्नातकमात्रप्राप्त्यर्थं न ब्राह्मणाभिप्रायेण तस्य सदैव गुरुत्वात् । यथाह शङ्खः-'अथ ब्राह्मणायाग्रे पन्था देयो राज्ञ इत्येके । तच्चानिष्टं गुरुर्ज्येष्ठश्च ब्राह्मणो राजानमतिशेते तस्मै पन्था' इति । वृद्धादीनां पथि परस्परसमवाये वृद्धतराद्यपेक्षया विद्यादिभिर्वा विशेषो द्रष्टव्यः ॥ ११७ ॥

(वि० मि०) धर्मार्थानां च कर्मणां गृहस्थकृत्यानां ब्राह्मणादिभेदेन व्यवस्थामाह चतुर्भिः—

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ॥
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ॥ ११८ ॥

इज्या यागः । अध्ययनं वेदपुराणादेः । दानं गवादेः । एतानि वैश्यस्य क्षत्रियस्य चकाराद्ब्राह्मणस्य च कर्माणि साधारणानि । ब्राह्मणस्य तु प्रतिग्रहयाजनाध्यापनान्यधिकानीत्यर्थः । याजनमार्त्विज्यम् । अत्र कर्मणां धर्मार्थत्वं वृत्त्यर्थं च यथायोग्यं मन्वाद्यनुसारेण नेयम् । तथापदेन कृष्यादेरापद्धर्मस्य परिग्रहः । तथा च गौतमः-'कृषिवाणिज्ये वाऽस्वयङ्कृते कुसीदं चे'ति ॥ ११७ ॥

(मिता०) इज्येति । वैश्यस्य क्षत्रियस्य च चकाराद्ब्राह्मणस्य द्विजानुलोमानां च यागाध्ययनदानानि साधारणानि कर्माणि । ब्राह्मणस्याधिकानि प्रतिग्रहयाजनाध्यापनानि । तथेति स्मृत्यन्तरोक्तवृ-

---

(१) पक्वशरीरः ख. । (२) नृपो राजा न क. ।
(३) ष्वाभिमुख्यागतेषु ख. ।

स्युपसङ्ग्रहः यथाह गौतमः-'कृषिवाणिज्ये वा स्वयं कृते कुसीदं च' र्वति । अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर्भवति न स्वेच्छया । 'आपत्काले ब्राह्मण्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा, समाप्ते ब्राह्मणो गुरुः' इति गौतमस्मरणात् । एतान्यापदि ब्राह्मणस्य षट् कर्माणि । तत्र त्रीण्याद्यादीनि धर्मार्थानि । त्रीणि प्रतिग्रहादीनि वृत्त्यर्थानि । 'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः' ॥ इति (१०।७६) मनुस्मरणात् । अत इज्यादीन्यवश्यं कर्तव्यानि न प्रतिग्रहादीनि । 'द्विजातीनामध्ययनमिज्या दानं, ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमः' इति गौतमस्मरणात् ॥ ११८ ॥

प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् ॥
कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम् ॥११९॥

(वि० मि०) क्षत्रियस्य चौरादिभ्यः प्रजानां रक्षणं, दरिद्रादीनां वृत्तिकल्पनं च मुख्यं कर्म । कुसीदं वृद्ध्या धनप्रयोगः, कृषिर्भूकर्षणं, वाणिज्यं समर्घं क्रीत्वा लाभोपजीवनं, पाशुपाल्यं पशुपालनम् । एतानि विशः प्रधानकर्माणि स्मृतानि स्मृत्युक्तानि ॥ ११९ ॥

(मिता०) प्रधानमिति । क्षत्रियस्य प्रजापालनं कर्म धर्मार्थं वृत्त्यर्थं च । वैश्यस्य कुसीदकृषिवाणिज्यपशुपालनानि वृत्त्यर्थानि कर्माणि । कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः । लाभार्थं क्रयविक्रयौ वाणिज्यम् । शेषं प्रसिद्धम् । 'शस्त्रास्त्रभृत्त्वं क्षत्रियस्य वणिक् पशुकृषी विशः । आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः' ॥ इति (१०।७९) मनुस्मरणात् ॥ ११९ ॥

शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् ॥
शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥१२०॥
भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः(१) ॥
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥ १२१ ॥

(वी० मि०) द्विजशुश्रूषा त्रैवर्णिकसेवा शूद्रस्य प्रधानं कर्म । तत्र ब्राह्मणसेवा धर्मोऽपि, क्षत्रियवैश्यसेवा तु केवलं वृत्त्यर्थेति

(१) क्रियारतः—इति मुद्रितपुस्तके पाठः ।

विवेकः । तया द्विजशुश्रूषयापि जीवितुमशक्नुवन् वणिग्भवेत् व-णिज्यया जीवेत् । अथवा विविधैः शिल्पैश्चित्रकर्माभिर्द्विजातिहितं कुर्वन् जीवेत् । एवं च यैः शिल्पैर्द्विजातीनां हितन्तैरेव जीवनम-नुज्ञातं, न तु तद्विपरीतैरिति । शिल्पपदं च द्विजशुश्रूषणा-योग्यत्वप्रयोजकान्यव्यापारसामान्यपरम् । यदाह देवलः—'शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादिपोषणं कर्षणपशुपाल्यभारोद्वह-नपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामृदङ्गमुरजवादनानी'ति । भार्यायामेव रतिरभिगमनं यस्य स तथोक्तः,शुचिर्बाह्याभ्यन्तरशौच-वान्, भृत्यभर्ता पुत्रकलत्रादीनां पोषकः, श्राद्धक्रियापरः श्राद्धानु-ष्ठानपरः । यद्वा श्राद्धं क्रिया चेति द्वन्द्वः । तत्र चोक्तक्रियाति-रिक्तशूद्राधिकारिकावश्यक्रियापरं क्रियापदम् । एते धर्माः साधारणा अपि द्विजातिहिताचरणोपयोगित्वेनाऽत्रोक्ताः । अनीदृशां द्विजाति-हिताचरणायोग्यत्वादित्यवधेयम् । नमस्कारेण नमःशब्दात्मकेन मन्त्रे-ण, न तु स्वधा(१)स्वाहाशब्देन न हापयेत् अवश्यं कुर्यात् ॥१२०॥१२१॥

(मिता०) शूद्रस्येति । शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं वृत्त्यर्थं च । तत्र ब्राह्मणशुश्रूषा परमो धर्मः । 'विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते' इति (१० । १२३) मनुस्मरणात् । यदा पुन-र्द्विजशुश्रूषया जीवितुं न शक्नोति तदा वणिग्वृत्त्या जीवेत् । नानावि-धैर्वा शिल्पैर्द्विजातीनां हितं कुर्वन् यादृशैः कर्मभिर्द्विजातिशुश्रूषा-यामयोग्यो न भवति तादृशानि कर्माणि कुर्वन्नित्यर्थः । तानि च दे-वलोक्तानि—'शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादिपोषणं कर्षणपशुपालनभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामु-रजमृदङ्गवादनादीनि' ॥ १२० ॥

(मिता०) भार्येति । किं च भार्यायामेव न साधारणस्त्रीषु परस्त्रीषु वा रतिरभिगमनं यस्य स तथोक्तः । शुचिः बाह्याभ्यन्तरशौ-चयुक्तो द्विजवत् । भृत्यादिभर्ता । श्राद्धक्रियारतः—श्राद्धानि नित्यनै-मित्तिककाम्यानि, क्रियाः व्रातकव्रतान्यविरुद्धानि तेषु रतः । नम इत्यनेन मन्त्रेण पूर्वोक्तान्पञ्चमहायज्ञानहरहर्न हापयेदनुतिष्ठेत् । नम-स्कारमन्त्रं च केचित्—'देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।

(१) स्वधा-इति क० पुस्तके नास्ति ।

नमः स्वाहायै स्वधायै नित्यमेव नमोनमः' ॥ इति वर्णयन्ति। नम इत्यन्ये। तत्र वैश्वदेवं लौकिकेऽग्नौ कर्तव्यं न वैवाहिकेऽग्नावित्याचार्याः॥ १२१॥

(वी० मि०) अधुना सर्ववर्णसाधारणं गृहस्थधर्ममाह द्वाभ्याम—

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ॥
दानं दया दमः क्षान्तिः सर्वेषां धर्मसाधनम् ॥ १२२ ॥

अहिंसाऽविहितवधवर्जनं, सत्यं ब्राह्मणप्राणरक्षणाद्यनुपयोग्यनृतवचनाभावः, अस्तेयं शास्त्राननुमतचौर्याभावः, शौचं बाह्यमाभ्यन्तरं च, इन्द्रियनिग्रहः (१)शास्त्रानिषिद्धबहिरिन्द्रियव्यापारवर्जनम्, दानं प्रत्युपकाराद्यनपेक्षया पात्रे स्वधनप्रतिपादनम्, दमोऽन्तरिन्द्रियनिग्रहः, दया निरुपधिपरदुःखप्रहाणेच्छा, क्षान्तिरपकारिण्यपि को(२)पाभावः तत्कार्याभावो वा सर्वेषां वर्णानाम्॥१२२॥

(मिता०) इदानीं साधारणधर्मानाह—

अहिंसेति। हिंसा प्राणिपीडा तस्या अकरणमहिंसा। सत्यमप्राणिपीडाकरं यथार्थवचनम्। अस्तेयमदत्तानुपादानम्। शौचं बाह्यमाभ्यन्तरं च। बुद्धिकर्मेन्द्रियाणां नियतविषयवृत्तितेन्द्रियनिग्रहः। यथाशक्ति प्राणिनामन्नोदकादिदानेनार्तिपरिहारो दानम्। अन्तःकरणसंयमो दमः। आपन्नरक्षणं दया। अपकारेऽपि चित्तस्याविकारः क्षान्तिः। एते सर्वेषां पुरुषाणां ब्राह्मणाद्याच(३)ण्डालं धर्मसाधनम्॥ १२२॥

वयोवृद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणाम् ॥
आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा ॥ १२३ ॥

(वी० मि०) वयो बाल्ययौवनादि तत्सदृशीं वृत्तिं बालकः पांशुक्रीडनं युवा सुगन्धादिसेवनमित्यादि। बुद्धिप्रकर्षवान् महाभाष्यन्यायशास्त्राध्ययनमल्पबुद्धिः काव्यपुराणाध्ययनमर्थाधिक्यवान्महादानमल्पवित्तवानल्पान्नादिदानं, वाग्मी वाददौत्यादिं, अवाग्मी तद्वैमुख्यं, सुवेषो राजसन्निधिं, मलिनवेषः शोकाद्यभिभूतानुसरणं,

(१) शास्त्रनिग्रहः—इत्यधिकं ख० पुस्तके।
(२) अपकारिणि विकोपाभावः—इति ख० पु० पाठः। (३) आचाण्डालान्तं ख.।

श्रुतमीमांसादिवैदार्थानिर्वचनं श्रुतालङ्कारशास्त्रः काव्यविवेचनमित्यादि। विशुद्धकुलः कुलीनकन्यावरणमविशुद्धकुलस्तादृशकन्यावरणं, यागादिकर्मकर्ता पशुहिंसनं, राज्यकर्ता प्रजासंरक्षणमित्यादिकां वृत्तिं वयःप्रभृतीनामुचितामाचरेत्। अजिह्मामवक्रामव्याजामिति यावत्। अशठां दम्भशून्याम् ॥ १२३ ॥

(मिता०) वय इत्यादि। वयो वाल्ययौवनादि। बुद्धिर्नैसर्गिकी लौकिकवैदिकव्यव(१)हारेषु। अर्थो वित्तं गृहक्षेत्रादि। वाक् (२)कथनम्। वेषो वस्त्रमाल्यादिविन्यासः। श्रुतं पुरुषार्थशास्त्रश्रवणम्। अभिजनः कुलम्। कर्म वृत्त्यर्थं प्रतिग्रहादि। एतेषां वयःप्रभृतीनां सदृशीमुचितां वृत्तिमाचरणं आचरेत्स्वीकुर्यात्। यथा वृद्धः स्वोचितां न यौवनोचिताम्। एवं बुद्ध्यादिष्वपि योज्यम्। अजिह्मामवक्राम्। अशठाममत्सराम् ॥ १२३ ॥

(वी० मि०) एवं स्मार्तानि कर्माण्यभिधाय श्रौतानि कर्माणि त्रैवर्णिकगृहस्थस्याह—

त्रैवार्षिकाधिकान्नो यः स तु (३)सोमं पिबेत् द्विजः ॥
प्राक्सौमिकीः क्रियाः कुर्याद्यस्याऽन्नं वार्षिकं भवेत् ॥१२४॥

त्रैवार्षिकं वर्षत्रयनिर्वाहोचितं तदधिकं वाऽन्नं यस्य स सोमयागं कुर्यान्नाऽतोऽल्पधनः। तदाह मनुः—

यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यतृप्तये।
अधिकं वाऽपि विद्येत स सोमं पातुमर्हति ॥
अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः।
स पीतसोमपूर्वोऽपि तस्य नाप्नोति तत्फलम् ॥

एतच्च काम्यपरं नित्यस्याऽऽवश्यकत्वेन त्रैवार्षिकान्नत्वाभावेऽपि कर्तव्यत्वात्। सोमात् प्राक् प्राक्सोमं तत्र भवाः क्रियाः प्राक्सौमिक्यस्ताः अग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यात्मिका वर्षपर्यन्तनिर्वाहोचितान्नवानेव कुर्यान्न ततोऽल्पधनः ॥ १२४ ॥

(मिता०) एवं स्मार्तानि कर्माण्यनुक्रम्येदानीं श्रौतानि कर्माण्यनुक्रामति—

त्रैवार्षिकेत्यादि। त्रिवर्षजीवनपर्याप्तं त्रैवार्षिकमाधिकं वा अन्नं

---

(१) व्यवहारेषु ज्ञानं क.। (२) वचनम् ग.। (३) स हि—इति मुद्रितपुस्तके पाठः।

यस्य स एव सो(१)मपानं कुर्यान्न ततोऽल्पधनः । (मनुः ११ । ८) 'अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः । स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलम्' ॥ इति दोषश्रवणात् । एतच्च काम्याभिप्रायेण । नित्यस्य चावश्यकर्तव्यत्वान्न नियमः । यस्य वर्षजीवनपर्याप्तमन्नं भवति स प्राक्सौमिकीः सोमात्प्राक् प्राक्सोमं प्राक्सोमं भवाः प्राक्सौमिक्यः, कास्ताः ? अग्निहोत्रदर्शपूर्णमासा(२)ग्रयणपशुचातुर्मास्यानि क(३)र्माणि तद्विकाराश्चैताः क्रियाः कुर्यात ॥१२४॥

(वी०मि०) एवं काम्यानि श्रौतानि कर्माण्यभिधाय नित्यान्याह—

प्रतिसम्वत्सरं सोमः पशुः प्रत्ययनं तथा ॥
कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥ १२५ ॥
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः ॥

संवत्सरे संवत्सरे सोमयागः कार्यः । अयनेऽयने पशुयागः कार्यः । सस्योत्पत्तौ सस्योत्पत्तौ आग्रयणेष्टिः कार्या । चातुर्मास्येष्वेतेषु त्रिषु ऋतुषु वत्सरस्य त्रिष्वप्यृतुषु कार्याः ॥ यथा जाबालः—

दर्शेन चार्द्धमासान्ते पूर्णमासेन चैव हि ।
सस्यपक्तौ नवेष्ट्या च चातुर्मास्यैस्त्वृतोर्मुखे ॥
अयनादौ निगूढेन पशुना वत्सरेण वा ।
समान्ते सोमयागेन त्विष्ट्वा युक्तो न संशयः ॥
सायंप्रातः सदाऽभ्यस्तं वैतानं जुहुयान्नरः ।

एषां सोमादीनामभावे करणाशक्तौ वैश्वानरीमिष्टिमनुकल्पत्वेन कुर्यात् । एषामभाव इत्युक्तम् ॥

(वी०मि०) एषां सम्भवे तुन वैश्वानरेष्टिः कार्या हीनकल्पत्वादित्याह—

हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदम् ॥ १२६ ॥

न कुर्वीतेत्यत्र हेतुः सतीत्यादिः । द्रव्यपदं मुख्यकल्पोपयुक्तसर्वाङ्गसम्पत्तिपरम् । य(४)स्मिन्सत्येव समर्थस्य फलप्रदं मुख्यं कर्म न त्वनुकल्परूपमित्यर्थः । यद्वा सति द्रव्ये न कुर्वीत यतोऽफलप्रदं हीनकल्पाचरणमिति योज्यम् ॥ १२५ ॥ १२६ ॥

---

(१) सोमयागं क. ग. । (२) पूर्णमासपशु ख. पूर्णमासचातुर्मास्यानि ग. ।
(३) काम्यानि क. । (४) तस्मिन्–इति ख० पु० पाठः ।

(मिता०) एवं याम्यानि श्रौतानि कर्माण्यभिधायेदानीं नित्यान्याह—

प्रतीत्यादि । संवत्सरे संवत्सरे सोमयागः कार्यः । पशुः प्रत्ययनं अयने अयने दक्षिणोत्तरसंज्ञिते निरूढपशुयागः कार्यः । तथा प्रतिसंवत्सरं वा। 'पशुना संवत्सरे संवत्सरे यजेत षट्सु वा मासेष्वित्येके' इति श्रवणात । आग्रयणेष्टिश्च सस्योत्पत्तौ कर्तव्या । चातुर्मास्यानि च प्रतिसंवत्सरे कर्तव्यानि ॥ १२५ ॥

(मिता०) एषामिति । एषां सोमप्रभृतीनां पूर्वोक्तानां नित्यानां कथञ्चिदसम्भवे तत्काले वैश्वानरीमिष्टिं कुर्यात् । किं च योऽयं हीनकल्प उक्तः सति द्रव्येऽसौ न कर्तव्यः। यच्च फलप्रदं काम्यं तद्धीनकल्पं न कुर्वीत न कर्तव्यमेव ॥ १२६ ॥

(वी० मि०) यज्ञोपयुक्तं द्रव्यार्जनोपायनियमं यज्ञार्जितद्रव्याणां यज्ञेऽशेषविनियोगनियमं चाह—

चण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात् ॥
यज्ञार्थं लब्धमदद्ध्वासः काकोऽपि वा भवेत् ॥ १२७ ॥

शूद्राद्भिक्षितेन द्रव्येण यज्ञाचरणात् जन्मान्तरे चण्डालो भवति । यज्ञार्थं त्रैवर्णिकादपि लब्धं द्रव्यं (१)सर्वं यज्ञेऽविनियुञ्जानोऽपि जन्मान्तरे भासो वनकुक्कुटः काको वा भवेदित्यर्थः । तथा च मनुः—

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् ।
यजमानो हि भिक्षित्वा चाण्डालः प्रेत्य जायते ॥

तथा—

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति ।
स याति भासतां विप्रः काकतां वा शतं समाः ॥

गृहस्थस्तावद्द्विविधः शालीनो यायावरश्च । यदाह हारीतः—'द्विविधमेव गृहस्थमाहुः शालीनं यायावरं च' । शालीनात्पुण्यतरो यायावरः । वह्व्योऽस्य शाला इति शालीनः । शालाया वा इति वा शालीनः । दश रात्रीर्वसन् प्रयातीति यायावरः । देवलोऽपि—'द्विविधो गृहस्थो यायावरः शालीनश्च तयोर्यायावरः प्रवरो याजनाऽध्यापनप्रतिग्रहरिक्थवर्जनात् षट्कर्माधिष्ठितः प्रैष्यचतुःपदगृहग्रामधान्ययुक्तो लोकानुवर्ती शालीनः' ।(२)तत्र 'प्रतिग्रहोऽधिको विप्र' इत्यादिना शालीनस्य वृत्तयो दर्शिताः ॥ १२७ ॥

---

(१) यज्ञं–इति क० पु० पाठः । (२) तच्च–इति क० पु० पाठः ।

(मिता०) चण्डाल इति । यज्ञार्थं शूद्रधनयाचनेन जन्मान्तरे चण्डालो जायते । यः पुनर्यज्ञार्थं याचितं (१)न सर्वं प्रयच्छति न त्यजति स भासः काकोऽपि वा वर्षशतं भवेत् । यथाह मनुः (११ । २५)—'यज्ञार्थमर्थं भिक्षित्वा यः सर्वं न प्रयच्छति । स याति भासतां विप्रः काकतां वा शतं समाः' ॥ इति । भासः शकुन्तः । काकः प्रसिद्धः ॥ १२७ ॥

(वी०मि०) इदानीमुभयसाधनं वृत्तिकृतधनसञ्चयनिबन्धनं चातुर्विध्यं दर्शयन्नेव यायावरस्य वृत्तिमाह—

कुशूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा ॥
जीवेद्वाऽपि शिलोञ्छेन श्रेयानेषां परः परः ॥ १२८ ॥

द्वादशदिनपर्यन्तकुटुम्बभ(२)रणक्षमधान्यक्षमा कोष्ठी कुशूलं, तत्परिमितधान्यवान् कुशूलधान्यकः । ३)षट्दिनपर्यन्तकुटुम्बभरणक्षमधान्यधारणयोग्या कलशी कुम्भी, तत्परिमितधान्यवान् कुम्भीधान्यकः । त्र्यहपर्याप्तं धान्यं यस्य सः त्र्याहिकः । श्वस्तनं श्वो भवं तादृशं धान्यं यस्य न विद्यते सोऽश्वस्तनः । एवं चतुर्विधो यायावरगृहस्थः शिलोञ्छेन जीवेत् । एषां चतुर्णां मध्ये शालीनो यायावरो वा परः परः श्रेयान् प्रशस्ततरः । शाल्यादेः क्षेत्रस्खलादिनिपतितपरित्यक्तवल्लरीग्रहणं शिलं तादृशैकैकशाल्यादिकरणग्रहणमुञ्छः । वाशब्दः प्रागुक्तशालीने वृत्त्यपेक्षया । अपिशब्देन नीवाराद्युपादानसमुच्चयः । तथाचाऽऽपस्तम्बः—'शिलोञ्छौ चाऽन्यच्चाऽपरिगृहीत'मिति ॥ १२८ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने गृहस्थप्रकरणम् ॥

(मिता०) कुशूलेति । कुशूलं कोष्ठकं, कुम्भी उष्ट्रिका, कुशूलं च कुम्भी च कुशूलकुम्भ्यौ ताभ्यां परिमितं धान्यं यस्य स तथोक्तः कुशूलधान्यः स्यात्कुम्भीधान्यो वा । तत्र स्वकुटुम्बपोषणे द्वादशा-

(१) न परित्यजति क. ।
(२) 'भरणक्षम'–इत्यत्र 'रक्षण'–इति ख० पु० पाठः ।
(३) 'षड्दिन'–इत्यारभ्य 'कुम्भीधान्यकः'–इत्यन्तं ख० पुस्तके नास्ति ।

हमात्रपर्याप्तं धान्यं यस्यास्ति स कुशूलधान्यः । कुम्भीधान्यस्तु स्वकुटुम्बपोषणे षडहमात्रपर्याप्तधान्यः । त्र्यहपर्याप्तं धान्यमस्यास्तीति त्र्याहिकः । श्वोभवं धान्यमस्यास्तीति श्वस्तनः । न विद्यते श्वस्तनं यस्य सोऽश्वस्तनः ॥

(मिता०) कुशूलधान्यादिसञ्चयोपायमाह—

जीवेदिति । शाल्या(१)दिनिपतितपरित्यक्तवल्लुरीग्रहणं शिलम्, एकैकस्य परित्यक्तस्य कणस्योपादानमुञ्छः, शिलं चोञ्छश्च शिलोञ्छं तेन शिलेनोञ्छेन वा । कुशूलधान्यादिश्चतुर्विधो गृहस्थो जीवेत् । एषां कुशूलधान्यादीनां ब्रा(२)ह्मणानां गृहस्थानां चतुर्णां परः परः पश्चात्पश्चात्पठितः श्रे(३)यान्प्रशस्यतरः । एतच्च यद्यपि द्विजः प्र(४)कृतस्तथापि ब्राह्मणस्यैव भवितुमर्हति विद्योपशमादियोगात् । तथा च मनुना (४ । २)—'अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि' ॥ इति विप्रमेव प्र(५)स्तुत्य (मनुः ४ । ७)—'कुशलधान्यको वा स्यात्कुम्भीधान्यक एव वा' इत्याद्यभिहितत्वात् । एतच्चातिसंय(६)तं यायावरं प्रत्युच्यते न विप्रमात्राभिप्रायेण । तथा सति—'त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्विजः' इत्यनेन न विरोधः । तथा च गृहस्थानां द्वैविध्यं तत्र तत्रोक्तम् । यथाह देवलः—'द्विविधो गृहस्थो यायावरः शालीनश्च । तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थसञ्चयवर्जनात् षट्कर्माधिष्ठितः प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्ती शालीनः' इति । शालीनोऽपि चतुर्विधः-याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैः षड्भिर्जीवत्येकः । याजनादिभिस्त्रिभिरन्यः । याजनाध्यापनाभ्यामवरः । चतुर्थस्त्वध्यापनेनैव । तथाह मनुः (४ । ९)—'षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति' ॥ इति । अत्र च 'प्रतिग्रहोऽधिको विप्रे' इत्यादिना शालीनस्य वृत्तयो दर्शिताः । यायावरस्य 'जीवेद्वापि शिलोञ्छेने'ति ॥ १२८ ॥

इति गृहस्थधर्मप्रकरणम् ।

---

(१) शाल्यादेर्निपतित. क. (२) ब्राह्मणानां चतुर्णां ख. (३) श्रेयानुत्कृष्टतमः ख.
(४) प्रकृतः प्रकरणप्राप्तः प्राकृतः ख. (५) पुरस्कृत्य क. (६) नतिसंपन्नसंयतं क.

(वी० मि०) इदानीं पूर्वोक्तस्य त्रिविधस्य स्नातकस्य विधिनिषेधरूपान् धर्मानाह--

न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः ॥
न विरुद्धप्रसङ्गेन सन्तोषी च भवेत्सदा ॥ १२९ ॥

स्वाध्यायाभ्यासविरोधिनमत्यन्तेश्वरोपसर्पणादिसाध्यमर्थं धनं नेहेत नान्विच्छेत्। यतस्ततः अविदिताचारात्पतितादेश्च नाऽर्थमीहेत। विरुद्धद्यूतादिप्रसङ्गो गीताद्यासङ्गः। यदि न दास्यसि तदा तवेदमनिष्टं भविष्यतीत्यनिष्टप्रदर्शनं, तेन नार्थमीहेत। तथा च मनुः-

नेहेतार्थं प्रसङ्गेन न विरुद्धेन कर्मणा।

सन्तोषी(१)अर्थालाभेऽपि तृष्णाशून्यः। चकारात्संयतश्च भवेत्। तथा च मनुः—

सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ॥ १२९ ॥

(मिता०) एवं श्रौतस्मार्तानि कर्माण्यभिधायेदानीं गृहस्थस्य स्नानादारभ्य ब्राह्मणस्यावश्यकर्तव्यानि विधिप्रतिषेधात्मकानि मानससङ्कल्परूपाणि स्नातकव्रतान्याह—

नेति। ब्राह्मणस्य प्रतिग्रहादयोऽर्थप्राप्त्युपाया दर्शितास्तत्र विशेष उच्यते। स्वाध्यायविरोधिनमर्थमप्रतिषिद्धमपि नेहेत नान्विच्छेत् न यतः कुतश्चिदविदिताचारात्। न विरुद्धप्रसङ्गेन विरुद्धमयाज्ययाजनादि, प्रसङ्गो नृत्यगीतादिः। विरुद्धं च प्रसङ्गश्च विरुद्धप्रसङ्गं तेन। नार्थमीहेतेति सम्बध्यते। नञ्शब्दः प्रत्येकं पर्युदासार्थ एव। किंच अर्थालाभेऽपि संतोषी परितृप्तो भवेत्। चकारात्संयतश्च 'संतोषं परमास्थाय सुखार्थी संयतो भवेत्' इति (४। १२) मनुस्मरणात् ॥ १२९ ॥

(वी०मि०) येभ्योऽर्थ ईहितव्यस्तानाह—

राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा ॥

क्षुधा बुभुक्षया। उपलक्षणमेतत्। शीतादिनेत्यपि द्रष्टव्यम्। सीदन्पीड्यमानः। राज्ञो विदितसच्चरित्रात्। अन्तेवासिनो वक्ष्यमा-

(१) सन्तोषी-इति क० पुस्तके नास्ति।

णात् । याज्यात् आर्त्विजो याजनार्हात् । धनमिच्छेत् गृह्णीयादिति तात्पर्यम् ॥

(वी०मि०) किञ्च—

दाम्भिहैतुकपाखण्डिवकवृत्तींश्च वर्जयेत् ॥ १३० ॥

दम्भी लोकवञ्चनार्थं कर्मानुष्ठानशीलः । हैतुकः कुयुक्तिबलेन सर्वत्र वैदिकादौ कर्मणि परेषां संशयोत्पादनशीलः । पाखण्डी त्रैविद्यवृद्धापरिगृहीतव्रतकारी । वकवृत्तिः—

अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ॥

इति मनुना लक्षितः । एतान् सर्वकार्येषु लौकिकेषु वैदिकेषु च वर्जयेत् परिहरेत् स्नातकः । चकारेण विकर्मस्थादिपरिग्रहः । तथा च मनुः—

पाखण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणाऽपि नार्चयेत् ॥

तथा—

धर्मध्वजी सदा लुब्धः छाद्मिको लोकदाम्भिकः ।
वैडालवृत्तिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥

(मिता०) कुतस्तर्हि धनमन्विच्छेदित्याह—

राजेत्यादि । क्षुधा सीदन्पीड्यमानः स्नातकः राज्ञो विदितवृत्तान्तात्, अन्तेवासिनो वक्ष्यमाणलक्षणात्, याज्यात् याजनार्हाच्च धनमाददीत । क्षुधा सीदन्नित्यनेन विभागादिप्राप्तकुटुम्बपोषणपर्याप्तधनो न कुतश्चि(१)दर्थमन्विच्छेदिति गम्यते । किञ्च दाम्भिहैतुकादीन्सर्वकार्येषु लौकिकवैदिकशास्त्रीयेषु वर्जयेत् । चकाराद्विकर्मस्थवैडालव्र(२)तिकान् शठान्वर्जयेत् । यथाह मनुः—(४ । ३०) 'पाखण्डिनो विकर्मस्थान्वैडालव्रतिकान्शठान् । हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' ॥ इति । लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी । युक्तिबलेन सर्वत्र संशयकारी हैतुकः । त्रैविद्यविरुद्धपरिगृहीताश्रमिणः पाखण्डिनः । वकवदस्य वर्तनमिति वकवृत्तिः । यथाह मनुः—'अधोदृष्टि(३)र्नैकृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ॥

---

(१) कुतश्चिद्धनमन्वि० क० । (२) वृत्तिकशठान् क० ग० । (३) नैष्कृतिकः ख० ।

नीतश्च वकवृत्तिरुदाहृतः'॥ इति। प्रतिपिङ्गसेविनो विकर्मस्थाः। विडालो मार्जारस्तस्य व्रतं स्वभावो यस्यासौ वैडालव्रतिकः। तस्य लक्षणमाह मनुः—(४। १९५) 'धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदाम्भिकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः' ॥ इति। शठः सर्वत्र वकः। एतैः संसर्गनिषेधावेव स्वयमेवम्भूतो न भवेदिति गम्यते॥ १३० ॥

(वी० मि०) किञ्च—

शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः ॥

शुक्ले अम्बरे वाससी धारयतीति शुक्लाम्बरधरः। इदं च सति सम्भवे।

न जीर्णमलवद्वासा भवेच्च विभवे सति।

इति वचनात्। नीचानि कल्पितानि केशादीनि यस्य सः। शुचिराभ्यन्तरबाह्यशौचवान् भवेदिति शेषः॥

(वी० मि०) किञ्च—

न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ॥१३१॥
न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् ॥
नाहितं नानृतं चैव न स्तेनः स्यान्न (१)वार्धुषिः ॥१३२॥

भार्यादर्शने भार्यया दृश्यमानः। भार्यां पश्यन् इति केचित्। संस्थितः उर्द्धस्थितः। परे तु भार्यायां पुरोऽवस्थितायामित्यर्थः। तथा च श्रुतिः—'जायाया अन्ते नाऽश्नीयादवीर्य्यवदपत्यं भवती'ति व्याचक्षते। अश्नीयादिति त्रिष्वपि सम्बध्यते। संशयं प्राणविपत्तिसंशयावहं चौरव्याघ्रादुपहतदेशाक्रमणादि कर्म न कुर्यात्। अकस्मात् शास्त्रीयकारणं विना। अप्रियं श्रूयमाणपरोद्वेगकरं वाक्यं न वदेत्। अहितमुदर्कानिष्टफलम्, अनृतमसत्यं वाक्यं च न वदेत्। अकस्मादिति वदेदिति त्रिषु सम्बध्यते। चकारात्परपातकादिसूचकवाक्यपरिग्रहः। एवकारः सर्वत्र नियमबोधनार्थस्तेन शास्त्रानुमतपरस्वग्रहणवान्। वार्धुषिः—

समर्घं पण्यमादाय महार्घं यः प्रयच्छति।
स वै वार्धुषिको नाम यश्च वृद्ध्या प्रयोजयेत्॥

(१) वार्धुषी- इति ख० पुस्तके मुद्रितपुस्तके च पाठः।

इति यमेन लक्षितः। क्वचिद्वार्धुषीतिपाठः॥ १३१-१३२॥

(मिता०) शुक्लेत्यादि। शुक्ले धौते अम्बरे वाससी धरतीति शुक्लाम्बरधरः। केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुनखं नीचं निकृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः। शुचिरन्तर्बहिश्च स्नानानुलेपनधूपस्रगादिभिः सुगन्धी च भवेत्। यथाह गौतमः-'स्नातको नित्यशुचिः सुगन्धिः स्नानशीलः' इति। सुगन्धित्वविधानादेव निर्गन्धमाल्यस्य निषेधः। तथा च गोभिलः-'नागन्धां स्रजं धारयेदन्यत्र हिरण्यरत्नस्रजः' इति। सदा स्नातक एवंभूतो भवेत्। एतच्च सति संभवे-'न जीर्णमलवद्वासा भवेच्च विभवे सति' इति स्मरणात्। न च भार्यादर्शने तस्यां पुरतोऽवस्थितायामश्नीयात्। अवीर्यवदपत्योत्पत्तिभयात्। तथा च श्रुतिः-'जायाया अन्ते नाश्नीयादवीर्यवदपत्यं भवति' इति। अतस्तया सह भोजनं दूरादेव निरस्तम्। न चैकवासाः नाऽपि संस्थितः उत्थितः अश्नीयादिति सम्बध्यते॥ १३१॥

(मिता०) नेति। कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत न कुर्यात्। यथा व्याघ्रचौराद्युपहतदेशाक्रमणादि। अकस्मान्निष्कारणं कञ्चिदपि (१)पुरुषं स्त्रियं वा अप्रियमुद्वेगकरं वाक्यं न वदेत्। न चाहितं नानृतं वा प्रियमपि। चकारादश्लीलमसभ्यं बीभत्सकरं चाकस्मान्न वदेदिति सम्बध्यते। एतच्च परिहासादिव्यतिरेकेण-'गुरुणापि समं हास्यं कर्तव्यं कुटिलं विना' इति स्मरणात्। न च स्तेनः अन्यदीयस्यादत्तस्य ग्रहीता न स्यात्। न वार्धुषी स्यात्। प्रतिषिद्धवृद्ध्युपजीवी वार्धुषी॥ १३२॥

(वी० मि०) किञ्च—

दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः॥

दाक्षायणं सुवर्णं ब्रह्मसूत्रमुपवीतं, वेणुर्वंशयष्टिः, कमण्डलुश्च सजलः। सति सम्भवे सर्वदैतच्चतुष्टयधारी स्यादिति शेषः। उपलक्षणं चैतत्। तथा च मनुः—

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्।
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले

(१) पुरुषमप्रियं ख०।

एवं च दाक्षायणपदमपि कुण्डलपरमेव। वेदो दर्भमुष्टिः। अत्र ब्रह्मचारिप्रकरणोक्तस्याऽपि यज्ञोपवीतस्य पुनर्वचनं द्वितीययज्ञोपवीतप्राप्त्यर्थम्। यदाह वसिष्ठः—

स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम्।
यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः॥

(वी० मि०) किञ्च—

कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन्॥ १३३॥

देवं देवतार्चांशिवलिङ्गादिकं, मृदमुद्धृतां गां विप्रं वनस्पतिं च। तेषां सन्निधिगमनप्रसक्तौ प्रदक्षिणं कुर्यात्। दक्षिणपार्श्वं कृत्वा गच्छेत्॥ १३३॥

(मिता०) किञ्च—

दाक्षायणीति। दाक्षायणं सुवर्णं (१)तदस्यास्तीति दाक्षायणी। ब्रह्मसूत्रं यज्ञोपवीतं तदस्यास्तीति ब्रह्मसूत्री। वैणवयष्टिमान्। कमण्डलुमान् स्यादिति सर्वत्र सम्बन्धनीयम्। अत्र च ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थम्। यथाह वसिष्ठः—'स्नातकानां तु नित्यं स्यादन्तर्वासस्तथोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः'। इति। अत्र च दाक्षायणीति सामान्याभिधानेऽपि कुण्डलधारणमेव कार्यम्। 'वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्। यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले'। इति (४। ३६) मनुस्मरणात्। (२)तथा देवं देवतार्चां, मृदं तीर्थादुद्धृतां, गां, ब्राह्मणं, वनस्पतींश्चाऽश्वत्थादीन्प्रदक्षिणं कुर्यात्। एतान्द(३)क्षिणतः कृत्वा प्रव्रजेदित्यर्थः। एवं चतुष्पथादीनपि। 'मृदं गां देवतां विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्'॥ इति (४। ३९) मनुस्मरणात्॥ १३३॥

(वी० मि०) किञ्च—

न मेहेत (४)नदीछायावर्त्मगोष्ठाम्बुभस्मसु॥
न प्रसर्क्या(५)ग्निगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः॥ १३४॥

---

(१) तद्धाम, तद्धा...न क०। (२) एवं देवं क०। (३) प्रदक्षिणतः ख०।
(४) न तु मेहेन्नदी...नि मुद्रितपुस्तके पाठः। (५) न प्रत्यर्क्यग्नि-इति मु० पु० पाठः।

नेक्षेताऽर्कं न नग्नां स्त्रीं न च संसृष्टमैथुनम् ॥
न च मूत्रं पुरीषं (१)वा नाशुची राहुतारकाः ॥ १३५ ॥

नदी तत्तीरं, अम्बुनः पृथगुपादानात्। छाया पथिकाद्युपजीव्या, वर्त्म मार्गः, गोष्ठं प्रायेण गवावस्थितिस्थानं, अम्बु जलं, भस्म प्रसिद्धम्, एषु न मेहेत न मूत्रपुरीषोत्सर्गं कुर्यात्। तथार्कादीन् प्रति अर्काद्यभिमुखं न मेहेत। सन्ध्या मुख्या। निषेधस्तु सन्ध्यायां मेहननिषेधपर्याप्तः। अर्कं उदयाद्यवस्थापन्नम्। तदाह मनुः—

नेक्षेतोद्यन्तमादित्यं नाऽस्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यन्नभसो गतम् ॥"

स्वयमुपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत न नग्नां स्त्रियमीक्षेताऽन्यत्र मैथुनादित्याश्वलायनात्। संसृष्टमैथुनां अचिरकृतोपभोगाम्। चकाराद्भोजनाद्याचरन्तीं भार्याम्। तथा च मनुः—

नाऽश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाऽश्नतीम्।
क्षुवन्तीं जृम्भमाणां वा न वाऽऽसीनां यथासुखम् ॥
नाऽञ्जयन्तीं स्वके नेत्रे न चाऽभ्यक्तामनावृताम्।
न पश्येत्प्रसवन्तीं च श्रेयस्कामो द्विजोत्तमः ॥

मूत्रं पुरीषं वा शौचानन्तरं नेक्षेत। 'शौचं कृत्वा मूत्रपुरीषोच्चारं न पश्ये'दिति वचनात्। चकाराद्उदके स्वप्रतिबिम्बादि।

न चोदके निरीक्षेत स्वरूपमिति धारणा।

इत्यादिवचनात्। अशुचिर्मूत्राद्युच्छिष्टः सन् राहुं तारकाश्च नेक्षेत ॥१३४-१३५॥

(मिता०) नेति। नद्यादिषु न मेहेत् न मूत्रपुरीषोत्सर्गं कुर्यात्। एवं श्मशानादावपि। यथाह शङ्खः—'न गोमयकृष्टोप्तशाद्वलचिति-श्मशानवल्मीक(२)वर्त्मखलगोष्ठविलपर्वतपुलिनेषु मेहेत भूताधारत्वात्'। तथाग्न्यादीन्प्रति अग्न्यादीनामभिमुखं न मेहेत्। नाप्येतान्पश्यन्। यथाह गौतमः—'न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रतिपश्यन्वा मूत्रपुरीषामेध्यान्युदस्येन्नै(३)तान्प्रति पादौ प्रसारयेत्' इति। एतद्देशव्यतिरेकेण भूमिमयञ्जियैस्तृणैरन्तर्धाय मू(४)त्रपुरीषे

(१) च—इति क० पु० पाठः। (२) श्मशानवल्मीक क० ।
(३) नैता देवताः प्रति ख० । (४) मेहनं कार्यं क० ग० ।

कुर्यादिति । यथाह वसिष्ठः-'परिवेष्टितशिरा भूमिमयस्त्रियै स्तृणैरन्तर्धाय मूत्रपुरीषे कुर्यात्' इति ॥ १३४ ॥

(मिता०) नेक्षेतेति । नैवार्कमीक्षेतेति यद्यप्यत्र सामान्येनोक्तं तथाप्युदयास्तमयराहुग्रस्तोदकप्रतिबिम्बमध्याह्नवर्तिन एवादित्यस्यावेक्षणं निषिध्यते न सर्वदा । यथोक्तं मनुना(४।३७)-'नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन । नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्' ॥ इति । उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत । 'न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्' इत्याश्वलायनः । संसृष्टमैथुनां कृतोपभोगाम् । उपभोगान्तेऽनग्नामपि नेक्षेत । चकाराद्भोजनादिकमाचरन्तीम् । तथा च मनुः (४ ४३)-'नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम् । क्षुवतीं जृम्भमाणां च न चासीनां यथासुखम् ॥ नाऽञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् । न पश्येत्प्रसवन्तीं च श्रेयस्कामो द्विजोत्तमः' ॥ इति । मूत्रपुरीषे च न पश्येत् । तथा अशुचिः सन् राहुतारकाश्च न पश्येत् । चकारादुदके स्वप्रतिबिम्बं न पश्येत् । 'न चोदके निरीक्षेत स्वं रूपमिति धारणा' इति वचनात् ॥ १३५ ॥

(वी० मि०) किञ्च—

अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयन् (१) ॥
वर्षत्यप्रावृतो गच्छेत् स्वपेत्प्रत्यक्शिरा न च ॥ १३६ ॥

देवे वर्षति सति अप्रावृतोऽनाच्छादितः । 'अयं मे वज्रः पाप्मानमहन'दिति सम्पूर्णं मन्त्रमुच्चारयन् गच्छेत् न तु धावेत । 'न धावेच्च वर्षती'ति वचनात् । तथा प्रत्यक्शिराः पश्चिमशिराः न स्वपेत् न निद्रां कुर्यात् । चकारादुदक्शिरसश्च ग्रहणम् तथा च मार्कण्डेयपुराणम्—

पश्चिमे प्रबला चिन्ता हानिर्मृत्यु(२)स्तथोत्तरे ।

हारीतः 'न तिर्यदुक्प्रत्यक्शिराः' ॥ १३६ ॥

(मिता०) अयमिति । वर्षति सति 'अयं मे वज्रः पाप्मानमपहन्तु' इति मन्त्रमुच्चारयेत् । वर्षति अप्रावृतोऽनाच्छादितो न गच्छेन्न धा(३)वेत् । ' न प्रधावेच्च वर्षति' इति प्रतिषेधात् । न च प्रत्य-

---

(१) उदीरयेत—इति मुद्रितपुस्तके पाठः ।
(२) हानिर्मृत्युरथोत्तरे—इति ख० पु० पाठः । (३) च्छादितो न इयात् क० ।

किशराः स्वप्यात् । चकारान्नग्नो न शयीत । एकश्च शून्यगृहे न च नग्नः शयीतेति । 'नैकः स्वपेच्छून्यगृहे' इति च (४।५७)मनु-स्मरणात् ॥ १३६ ॥

(वी० मि०) किञ्च—

ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत् ॥

ष्ठीवनं मुखेन त्यज्यमानं लालादि, असृक् रक्तं, शकृत्पुरीषं, मूत्ररेतसी प्रसिद्धे । विषाणीति क्वचित्पाठः । तत्र विषं कृत्रिमाकृत्रिमम् । एतानि जले न क्षिपेत् ॥

(वी०मि०) अपि च—

पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत् ॥ १३७ ॥

अग्नौ प्रत्यग्नि पादप्रतापनं न कुर्यात् । एनमग्निं न लङ्घयेत् । चकारान्मुखधमनादिपरिग्रहः । तथा च मनुः—

नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम् ।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥
अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत् ।
न चैनं पादतः कुर्यान्न प्राणावाधमाचरेत् ॥ १३७ ॥

(मिता०) ष्ठीवनेत्यादि । ष्ठीवनमुद्गिरणं, असृग्रक्तं, शकृत् पुरीषं, शेषं प्रसिद्धं, एतान्यप्सु न निक्षिपेत् । एवं तुषादीनपि । यथाह शङ्खः—'तुषकेशपुरीषभस्मास्थिश्लेष्मनखलोमान्यप्सु न निक्षिपेन्न पादेन पाणिना वा जलमभिहन्यात्' इति । अग्नौ च पादौ न प्रतापयेत् । नाप्यग्निं लङ्घयेत् । चकारात् ष्ठीवनादीन्यग्नौ न निक्षिपेत् । मुखोपधमनादि चाग्नेर्न कुर्यात् । तथा च मनुः (४।५३)—'नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम् । नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् । अधस्तान्नोपदध्याच्च न चैनम(१) भिलङ्घयेत् । न चैनं पादतः कुर्यान्न प्राणि(२)वधमाचरेत्' ॥ इति ॥ १३७ ॥

(वी० मि०) किञ्च—

जलं पिबेन्नाऽञ्जलिना न शयानं प्रबोधयेत् ॥
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् ॥ १३८ ॥

---

(१) मनुलङ्घयेत् ग० । (२) प्राणाबाध० घ० ।

अञ्जलिना संहतपाणिभ्यां जलं न पिबेत्, शयानं निद्रावस्थं न प्रबोधयेत् निद्रारहितं न कुर्यात्। अपि च अक्षैः पाशकैः न क्रीडेत्। धर्मघ्नैः पतितादिभिर्व्याधितैर्वा सह न शयीतेत्यर्थः। केचित्तु धर्मघ्नैर्न क्रीडेदित्येवं योजयन्ति ॥ २३८ ॥

(मिता०) जलमिति। जलमञ्जलिना संहताभ्यां हस्ताभ्यां न पिबेत्। जलग्रहणं पेयमात्रोपलक्षणम्। विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेन्नोत्थापयेत्। 'श्रेयांसं न प्रबोधयेत्' इति विशेषस्मरणात्। अक्षादिभिर्न क्रीडेत्। धर्मघ्नैः पशुलम्भनादिभिर्न क्रीडेत्। व्याधितैर्ज्वराद्यभिभूतैरेकत्र न संविशेन्न शयीत ॥ १३८ ॥

(वी०मि०) किञ्च—

विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम् ॥
केशभस्मतुषाङ्गारकपालेषु च संस्थितिम् ॥ १३९ ॥

अत्र विशिष्यानिषिद्धं मन्वादिना निषिद्धं 'न छिन्द्यान्नखलोमानी'त्यादिना यत्कर्म देशकुलाचारविरुद्धं वा कर्म वर्जयेत्। प्रेतधूमं प्रेतधूमस्पर्शनादिकं, बाहुभ्यां नदीतरं च केशादिष्ववस्थानं च वर्जयेदित्यर्थः। चकारेण कार्पासास्थ्यादिसमुच्चयः। तथा च मनुः—

अधितिष्ठेन्न केशांस्तु भस्माङ्गारकपालिकाः।
न कार्पासास्थि न तुषान् दीर्घमायुर्जिजीविषुः ॥ १३९ ॥

(मिता०) विरुद्धमिति। जनपदग्रामकुलाचारविरुद्धं कर्म वर्जयेत्। प्रेतधूमं बाहुभ्यां नदीतरणं च वर्जयेदिति सम्बध्येत। केशादिषु संस्थितिं वर्जयेत्। चकारादस्थिकार्पासामेध्येषु च ॥ १३९ ॥

(वी० मि०) अपि च—

नाचक्षीत धयन्तीं गां नाद्वारेण विशेत् क्वचित् ॥
न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः ॥ १४० ॥

धयन्तीं वत्सं पाययन्तीं गां परकीयां नाचक्षीत न परस्मै कथयेत्। अद्वारेण द्वारतया लोकैरव्यवह्रियमाणेन ग्रामनगरगृहादिकं न विशेत्। उच्छास्त्रवर्तिनः अतिक्रान्तशास्त्रमर्यादस्य, लुब्धस्य सत्यपि धने व्ययाकरणशीलस्य, राज्ञः क्षत्रियनृपतेः सकाशान्न प्रतिगृह्णीयात् ॥ १४० ॥

(मिता०) नाचक्षीतेति । परस्य क्षीरादि पि(१)वन्तीं गां परस्मै नाचक्षीत न च निवर्तयेत् । अद्वारेण कापथेन क्वचिदपि नगरे ग्रामे मन्दिरे वा न प्रविशेत् । न च कृपणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात् प्रतिगृह्णीयात् ॥ १४० ॥

(वी० मि०) उक्तस्य राजप्रतिग्रहस्य निषिद्धतमत्वं दर्शयति—

प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ॥
दुष्टा दशगुणं पूर्वात्पूर्वादेते यथोत्तरम् ॥ १४१ ॥

सूना प्राणिवधस्थानं तत्र वधार्थमधिकृतः सूनी, चक्री तैलिकः, ध्वजी शौण्डिकः, वेश्या वेशोपजीविनी स्त्री, नराधिपोऽभिषिक्तः क्षत्रियः पूर्वोक्तलुब्धत्वादिविशिष्टः, एते प्रतिग्रहेऽपादानतामापन्नाः पूर्वात्पूर्वाद्दशगुणं यथोत्तरं दुष्टाः प्रतिग्रहीतुः पापसम्पादकाः । तथा च मनुः—

दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेश्यां दशवेश्यासमो नृपः ॥
दशसूनासहस्राणि यो वाहयति सौनिकः ।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः ।
स पर्यायेण यातीमान्नरकानेकविंशतिम् ॥
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रं च महानरकमेव च ॥
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम् ।
संघातं च सकाकोलं कुड्मलं पूतिमृत्तिकम् ॥
लोहशङ्कुमृजीषं च पन्थानं शाल्मलीं नदीम् ।
असिपत्रवनं चैव लोहं करकमेव च ॥
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ।
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः ॥-॥१४१ ॥

(मिता०) प्रतिग्रह इति । (२)प्रतिग्रहे साध्ये सून्यादयः पञ्च पूर्वस्मात्पूर्वस्मात्परः परो दशगुणं दुष्टः । सूना प्राणिहिंसा सास्या-

(१) क्षीरादि धयन्तीं गां क० । (२) प्रतिग्रहेषु साध्येषु ख० ।

स्तीति सूनी प्राणिहिंसापरः। चक्री तैलिकः। ध्वजी सुराविक्रयी। वेश्या पण्यस्त्री। नराधिपोऽनन्तरोक्तः॥ १४१॥

(वी० मि०) अथ वेदाध्ययनाङ्गमुपाकर्माख्यमुत्सर्गाख्यं च कर्मा-ह द्वाभ्याम्—

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा॥
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु॥ १४२॥

अधीयन्त इत्यध्याया वेदाः तेषां संस्कारकमुपाकर्माख्यं कर्म श्रावण्यां श्रावणपौर्णमास्यां, श्रवणेन नक्षत्रेण युक्ते वा दिने, श्रावणस्य हस्तेन नक्षत्रेण युक्तायां पञ्चम्यां वा स्वगृह्योक्तविधिना कुर्युः ओषधिभाव इति चतुर्ष्वप्यन्वेति तदर्थश्च व्रीहिप्रभृतीनामङ्कुरोदय इति। तुशब्देन श्रावण ओषधिप्रादुर्भावे उपाकर्मणः कालान्तरं व्यवच्छिनत्ति। यदा तु श्रावणेऽनावृष्टिवशादोषधीनां न प्रादुर्भावः तदा भाद्रपदे श्रवणनक्षत्रयुक्ते दिने वा पौर्णमास्यां वा तत्कार्यम्। तथा च बह्वृचगृह्यपरिशिष्टम्—

अवृष्ट्योषधयस्तस्मिन् मासे न तु भवन्ति चेत्।
तदा भाद्रपदे मासि श्रवणे(१) च तदिष्यते॥

मनुः—

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान्॥

इति मिताक्षराकारादीनां स्वरसः। वस्तुतस्तु शाखाभेदेनाऽयं व्यवस्थितो विकल्पः।

उपाकर्म तु कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः।
ग्रहसङ्क्रान्त्ययुक्तेषु हस्तश्रवणपर्वसु॥

इति वचनात्। तेन भाद्रपदस्य हस्तः सामगानां, श्रावणस्य श्रवणं ऋग्वेदिनां, तदसम्भवे भाद्रश्रवणं, यजुर्वेदिनां तु श्रावणी, तदसम्भवे श्रावणशुक्लपञ्चमी। अत्राऽप्यसम्भवे मनूक्ता भाद्री उपाकर्मकालः।

हस्तनक्षत्रयोगस्तु पञ्चम्यां (२)न विवक्षितः।

---

(१) श्रवणेन-इति ख० पुस्तके पाठः।

(२) 'न विवक्षितः'-इत्यारभ्य 'पञ्चम्यां'—इत्यन्तं ख० पुस्तके नास्ति।

तथा च वृद्धगार्ग्यः—

यदि स्याच्छ्रवणं पर्वग्रहसङ्क्रान्तिदूषितम्।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ॥
सङ्क्रान्तिग्रहणं चापि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥

यजुर्वेदिनामुपाकरणे कालान्तरमप्याह बौधायनः—'श्रावण्यां पौर्णमास्यामाषाढ्यां चोपाकृत्य छन्दांस्यधीयीत'। भविष्योत्तरे—

उपाकर्मदिने प्रोक्तमृषीणां चैव तर्पणम्।
कुर्वीत ब्राह्मणैः सार्द्धं देवानुद्दिश्य भक्तितः ॥

तथा—

घनावृतेऽम्बरे पार्थ शाड्वले धरणीतले।
सम्प्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ॥
स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः।
ततो देवानृषींश्चैव तर्पयेत्परमाम्भसा ॥
उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च।
ऋषीन् दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः ॥
गौतमादीनृषीन्सप्त कृत्वा दर्भमयान्पुनः।
पूजयित्वा यथाशक्ति तर्पयेद्वंशमुद्धरेत् ॥

वंशं ऋषिवंशम्। उद्धरेत् पठेत्। छन्दोगपरिशिष्टम्—

ऋषीणां सिच्यमानानामन्तरालं समाश्रितः।
संपिवेद्यः शरीरेण पर्वन्मुक्ताजलच्छटाः ॥
देवान् ब्राह्मणपुत्रादीन् (शूद्रादीन्?)वार्य्यपि ध्रुवम्।
आमुष्मिकान्यपि फलान्याप्नुयान्नाऽत्र संशयः ॥

संपिवेत्प्रतीच्छेत्, पर्वत् तर्पणकर्तृसमुदायः। अन्तरालं तर्पणकर्त्तुः कुशमयगौतमादेश्च मध्यम्। अत्र मध्यपातरूपे कर्मणि शूद्रस्याप्यधिकारः ॥ १४२ ॥

(मिता०) अथाध्ययनधर्मानाह—

अध्यायानामिति। अधीयन्त इत्यध्याया वेदास्तेषामुपाकर्म उपक्रममोषधीनां प्रादुर्भावे सति श्रावणमासस्य पौर्णमास्यां, श्रवणनक्षत्रयुते वा दिने; हस्तेन युतायां पञ्चम्यां वा स्वगृह्योक्तविधिना कुर्या-

त्। यदा तु श्रावणे मासि ओषधयो न प्रादुर्भवन्ति तदा भाद्रपदे मासि श्रवणनक्षत्रे कुर्यात्। तत ऊर्ध्वं सार्धचतुरो मासान्वेदानधीयीत। तथा च मनुः (४.९५) 'श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्' ॥ इति॥१४२॥

पौषमासस्य रोहिण्यामष्टकायामथाऽपि वा ॥
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥ १४३ ॥

(वी० मि०) पौषमासीयशुक्लपक्षे रोहिण्यां पौषकृष्णाष्टम्यां वा ग्रामाद्बहिः जलान्ते जलसमीपे छन्दसामुत्सर्गाख्यमध्ययनपरित्यागरूपं कर्म विधिवत् स्वगृह्योक्तविधिना कुर्यादित्यर्थः। कुर्युरिति बहुवचनं ब्राह्मणमेलकाभिप्रायेण। 'कुर्वीत ब्राह्मणैः सार्द्धं'मित्यादिप्राग्लिखितवचनात्। अत्र च रोहिण्यामिति बहुच्परमिति मिश्राः। इदं च श्रावणे उपाकर्मपक्षे। यदा तु भाद्रे उपाकर्म तदा माघशुक्लप्रतिपद्युत्सर्गः; अर्धपञ्चमानित्येतद्वचनात्।

माघमासस्य सम्प्राप्ते पूर्वाह्णे प्रथमेऽहनि।
यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ॥

इति वचनाच्च। इदं च कर्मद्वयं मनुवचने निःप्रतिपक्षकाश्रवणादध्ययनाङ्गतया प्रतीतमपि अनधीयाना अपि शिष्या आचरन्तीति। उत्सर्गश्चेदुत्सर्गकाले न कृतस्तदा श्रावण्यामपि कार्यो नित्यत्वादिति मिश्राः। उत्सर्गानन्तरं कृत्यमाह मनुः—

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः।
विरमेत्पाक्षिणीं रात्रिं यद्वाप्येकमहर्निशम् ॥
अत ऊर्ध्वं तु छन्दांसि शुक्ले तु नियतः पठेत्।

हारीतः-'अर्धपञ्चमान्मासानतीत्योत्सृजति, पञ्चार्द्धषष्ठान्वा ऽयहमनध्यायः, पञ्चरात्रमेकेषाम्' ॥ १४३ ॥

(मिता०) उत्सर्जनकालः—

पौषमासस्येति। पौषमासस्य रोहिण्यामष्टकायां वा ग्रामाद्बहिर्जलसमीपे छन्दसां वेदानां स्वगृह्योक्तविधिनोत्सर्गं कुर्यात्। यदा पुनर्भाद्रपदे मासि उपाकर्म तदा माघशुक्लप्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना (४।९६) 'पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्वि-

जः । माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि' ॥ इति । तदनन्तरं पक्षिणीमहोरात्रं वा विरम्य शुक्लपक्षेषु वेदान् कृष्णपक्षेष्वङ्गान्यधीयीत । यथाह मनुः (४।९७) 'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः । विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशम् ॥ अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्' ॥ इति ॥ १४३ ॥

(वी० मि०) उपाकर्मोत्सर्गानन्तरमनध्यायमभिदधानः प्रसङ्गेनाऽनध्यायान्तरमप्याहाऽष्टभिः—

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ॥
उपाकर्मण्यथो(१)त्सर्गे स्वशाखाश्रोत्रिये (२)मृते ॥१४४॥

उपाकर्मण्युत्सर्गे च कृते तथा(३)शिष्यादिषु मृतेषु स्वशाखाध्यायिनि श्रोत्रिये च मृते तत्तन्निमित्तावधिकस्त्र्यहमनध्यायः । बन्धुः सकुल्यः । चकारेण जननमरणनिमित्तकाशौचान्तरप्रतिग्रहः ॥ १४४ ॥

(मिता०) अनध्यायानाह—

त्र्यहमिति । उक्तेन कर्ममार्गेणाधीयानस्य द्विजस्य शिष्यर्त्विग्गुरुबन्धुषु प्रेतेषु मृतेषु त्र्यहमनध्यायस्त्रीनहोरात्रानध्ययनं वर्जयेत् । उपाकर्मणि उत्सर्गाख्ये च कर्मणि कृते त्र्यहमनध्यायः । उत्सर्गे तु मनूक्तपक्षिण्यहोरात्राभ्यां सहाऽस्य विकल्पः । स्वशाखाश्रोत्रिये स्वशाखाध्यायिनि प्रेते च त्र्यहमनध्यायः ॥ १४४ ॥

सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने ॥
समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥ १४५ ॥

(वी० मि०) सन्ध्या प्रातःसन्ध्या, गर्जिते मेघध्वनौ, निर्घातेऽन्तरिक्षभवोत्पातध्वनौ, भूकम्पे उत्पातरूपे भूमिचलने, उल्कापतने च तादृशे सति द्युनिशमहोरात्रमाकालिकमिति यावत् अनध्यायः; निमित्तकालादारभ्य परादिने यावत्स एव कालस्तावत्कालमाकालस्तत्र भवमाकालिकम् । 'आकालिका भूकम्पनिर्घातोल्का' इति गौतमस्मर-

(१) उपाकर्मणि चोत्सर्गे-इति मुद्रितपुस्तके पाठः ।
(२) तथा-इति मुद्रितपुस्तके पाठः । (३) यथा इति क० पु० पाठः ।

णात्। सायंसन्ध्यागर्जिते तु रात्रिमात्रमनध्यायः। 'सायंसन्ध्यास्तनिते रात्रिः प्रातःसन्ध्यास्तनितेऽहोरात्रम्' इति हारीतवचनात्। वेदं मन्त्रभागं ब्राह्मणभागं च समाप्यारण्यकमुपनिषद्भागं चाऽधीत्य स्थितस्य चाऽहोरात्रमेवाऽनध्यायः॥ १४५॥

(मिता०) सन्ध्येति। सन्ध्यायां मेघध्वनौ, निर्घाते आकाशे उत्पातध्वनौ, भूमिचलने, उल्कापतने, मन्त्रस्य ब्राह्मणस्य वा समाप्तौ आरण्यकाध्ययने च द्युनिशमहोरात्रमनध्यायः॥ १४५॥

पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके॥
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥ १४६॥

(वी० मि०) राहुसूतके राहुदर्शननिमित्तसूतके चन्द्रसूर्योपराग इति यावत्। ऋतूनां वसन्तादीनां सन्धिषु मध्यवर्त्तीषु प्रतिपत्सु द्युनिशमनध्याय इत्यनुपज्यते। यत्तु—

ऽयहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके।

इति वचनं तद् ग्रस्तास्तविषयम्। श्राद्धिकं श्राद्धसम्बन्धि अन्नादिकं भुक्त्वा परिगृह्य वा स्थितस्य द्युनिशमनध्यायः। इदं च पार्वणादिविषयम्।

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्।
ऽयहन्न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके॥

इति मनुवचनात्। अत्र राहुसूतके आकालिकोऽनध्यायः, उक्तगौतमवचनादिति स्मर्त्तव्यम्॥ १४६॥

(मिता०) पञ्चदश्यामिति। पञ्चदश्याममावास्यायां पौर्णमास्यां चतुर्दश्यामष्टम्यां राहुसूतके चन्द्रसूर्योपरागे च द्युनिशमनध्यायः। यत्तु-'ऽयहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके' इति तद्ग्रस्तास्तमयविषयम्। ऋतुसन्धिगतासु च प्रतिपत्सु श्राद्धिकभोजने तत्प्रतिग्रहे च द्युनिशमनध्यायः। एतच्चैकोद्दिष्टव्यतिरिक्तविषयम्। तत्र तु त्रिरात्रम् (मनुः ४। ११०) 'प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्। ऽयहं न कीर्तयेद्ब्रह्म' इति स्मरणात्॥ १४६॥

पशुमण्डूकनकुलश्वाऽहिमार्जारमूषकैः॥
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये॥ १४७॥

(वी० मि०) अन्तरं शिष्योपाध्याययोः पाठकाले मध्यतो गमनं तस्मिन्, पश्वादिभिः कृते शक्रपाते इन्द्रध्वजपाते, उच्छ्राये इन्द्रध्वजोच्छ्राये वाऽहोरात्रमनध्यायः । यत्तु-'श्वनकुलसर्पमण्डूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्चे'ति गौतमवचनं तत्प्रथमाध्यापनविषयम् । अत्र तुशब्देनाऽऽकालिकत्वव्यवच्छेदः ॥ १४७ ॥

(मिता०) पश्वित्यादि । अध्येतॄणां पश्वादिभिरन्तरागमने कृते शक्रध्वजस्यावरोपणदिवसे (१)उच्छ्रायदिवसे चाहोरात्रमनध्यायः । द्युनिशमिति प्रकृते पुनरहोरात्रग्रहणं सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातनेष्वाकालित्वज्ञापनार्थम् । 'आकालिका निर्घातभूकम्पराहुदर्शनोल्काः' इति गौतमवचनात् । निमित्तकालादारभ्यापरेद्युर्यावत्स एव कालस्तावत्कालः आकालः तत्र भव आकालिकोऽनध्यायः । एतच्च प्रातःसन्ध्यास्तनिते । सायंसन्ध्यास्तनिते तु रात्रिमेव । 'सायंसन्ध्यास्तनिते तु रात्रिं प्रातःस(२)न्ध्यास्तनितेऽहोरात्रम्' इति हारीतस्मरणात् । यत्पुनर्गौतमेनोक्तं—'श्वनकुलसर्पमण्डूकमार्जारा(३)णामन्तरागमने त्र्यहमुपवासो विप्रवासश्चे'ति तत्प्रथमाध्य(४)यन एव ॥ १४७ ॥

श्वक्रोष्टुगर्दभोलूकसामवाणार्तनिःस्वने ॥
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥ १४८ ॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ॥
भुक्त्वार्द्रपाणिरम्भोन्तरर्द्धरात्रेऽतिमारुते ॥ १४९ ॥
पांशुवर्षे(५)दिशां दाहे सन्ध्यानीहारभीतिषु ॥
धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥ १५० ॥
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ॥
सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ॥ १५१ ॥

(वी० मि०) श्वा कुक्कुरः, क्रोष्टा शृगालः, गर्दभः प्रसिद्धः, उलूकः पेचकः, सामं गीयमानो वेदभागः, वाणः सप्ततन्तुवीणाविशेषः, आर्त्तः शोकादिपीडितः एषां सप्तानां निःस्वने । षष्ठ्यर्थश्च य-

---

(१) उत्सवदिवसे । (२) सन्ध्यामहोरात्रं ख० । (३) मार्जाराणां त्र्यहं ख० ।
(४) ध्ययनविषय एव ख० । (५) पांसुप्रवर्षे दिग्दाहे—इति मुद्रितपुस्तके पाठः ।

थायोग्यमवगन्तव्यः। अमेध्यं मूत्रादि, शवो गतप्राणं शरीरं, शूद्रः प्रसिद्धः, अन्त्यः शूद्रान्निकृष्टः, श्मशानं शवदहनस्थानं, पतिताः पातकिनः एषां षण्णामन्तिके सन्निधाने। देशेऽध्ययनार्थमभिमतेऽशुचौ, आत्मनि अध्येतृत्वाभिमते वाऽशुचौ। विद्युतः सौदामिन्याः संप्लवे पुनःपुनरुद्भवे। स्तनितस्य मेघनिर्घोषस्य सम्भवे भुक्त्वा यदाचमनेनाऽर्द्रपाणिस्तदा। अम्भोन्तर्जलमध्ये। अर्द्धरात्रे रात्रेर्मध्ययामद्वये। अतिमारुतेऽतिशयेन वाति वायौ। पांशूनां वर्षे उत्पातरूपे। तादृशे च दिशां दाहे। सन्ध्या प्रातःसायंरूपा, नीहारो धूमिका कुभेस इति प्रसिद्धा, भीतिश्चौरादिभयम्; एषु त्रिषु धावतः वेगेन स्वस्य गच्छतः सतः षष्ठी च सप्तमी समानार्था। 'धावत उपाध्याया'दिति तु शूलपाणिः। पूतिगन्धे सुरादिदुर्गन्धे। आगत इत्यग्रे तेनान्वयः, उपलभ्यमान इति तदर्थः। शिष्टे च प्रागुक्तलक्षणे गृहमागते क्षेत्रावस्थितिस्थानं प्राप्ते। खरस्य गर्दभस्य, उष्ट्रस्य प्रसिद्धस्य, यानस्य रथादेः; हस्तिनोऽश्वस्य च प्रसिद्धस्य, नावो नौकायाः; वृक्षस्य प्रसिद्धस्य, शरिणस्य ऊषरस्य मरुभूमेर्वा एषामष्टानां मध्येऽत्राऽभिमते त्वारोहणे आक्रमणे च सति एतान् श्वनिःस्वनादिनिमित्तकान् सप्तत्रिंशदनध्यायान् तात्कालिकान् निमित्तकालमात्रव्यापकान् विदुर्मुनय आहुः। एतच्च—

शयानः प्रौढपादश्च कृत्वा चैवाऽवसक्थिकाम्।
नाधीयातास्सामिषं जग्ध्वा सूतकान्नाद्यमेव च॥

इति मन्वाद्युक्ताऽनध्यायान्तराणामप्युपलक्षकम्। यत्तु—

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः।
स्वाध्यायभूमिं चाऽशुद्धामात्मानं वाऽशुचिं द्विजः॥

इति मनुवचनं, तद्ब्रह्मयज्ञपरं प्रकरणादिति॥ १४८-१५१॥

(मिता०) श्वेत्यादि। श्वा कुक्कुरः क्रोष्टा शृगालः। गर्दभो रासभः। उलूको घूकः। साम सामानि। वाणो वंशः। आर्तो दुःखितः। एषां श्वादीनां निःस्वने तावत्कालमनध्यायः। एवं वीणादिनिःस्वनेऽपि। 'वेणुवीणाभेरीमृदङ्गगन्त्र्यार्तशब्देषु' इति गौतमवचनात्। गन्त्री शकटम्। अमेध्यादीनां सन्निधाने तावत्कालिकोऽनध्यायः॥ १४८॥

(मिता०) देश इति । अशुचौ देशेऽशुचावात्मनि च । तथा विद्युत्संप्लवे पुनःपुनर्विद्योतमानायां विद्युति, स्तनितसंप्लवे प्रहरद्वयं पुनःपुनर्मेघघोषे तावत्कालिकोऽनध्यायः । भुक्त्वार्द्रपाणिर्नाधीयीत । जलमध्ये च । अर्धरात्रे महानिशाख्ये मध्यमप्रहरद्वये, अतिमारुतेऽहन्यपि तावत्कालं नाधीयीत ॥ १४९ ॥

(मिता०) पांशुवर्ष इति । औत्पातिके रजोवर्षे । दिग्दाहे यत्र ज्वलिता इव दिशो दृश्यन्ते । सन्ध्ययोः, नीहारे धूमिकायां, भीतिषु चौरराजादिकृतासु तत्कालमनध्यायः । धावतस्त्वरितं गच्छतोऽनध्यायः । पूतिगन्धे अमेध्यमद्यादिगन्धे । शिष्टे च श्रोत्रियादौ गृहं (१)प्राप्ते तदनुज्ञावध्यनध्यायः ॥ १५० ॥

(मिता०) खरोष्ट्र्यादि । यानं रथादि । इरिण(२)मूषरं मरुभूमिर्वा । खरादीनामारोहणे तावत्कालमनध्यायः । एवं श्वक्रोष्टुगर्दभेत्यस्मादारभ्य सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्निमित्तसमकालान्विदुरन(३)ध्यायविधिज्ञाः । विदुरित्यनेन स्मृत्यन्तरोक्तानन्यानपि सङ्गृह्णाति । यथाह मनुः—(४।१२) 'शयानः प्रौढपादश्च कृत्वा चैवावसं(४)क्थिकाम् । नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च' ॥ इत्यादि ॥ १५१ ॥

(वी० मि०) एवं प्रसङ्गप्राप्तानध्यायानुक्त्वा प्रकृतं स्नातकधर्ममाह—

देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः ॥
नाक्रामेद्रुधिरविण्मूत्रष्ठीवनोद्वर्तनानि (५)च ॥ १५२ ॥

देवस्य देवप्रतिमाया ऋत्विगादीनां च छायां, रक्तं रुधिरं, विष्ठां, मूत्रं, ष्ठीवनं मुखप्रच्युतं लालादि, उद्वर्तनमङ्गोत्सादनविनियुक्तद्रव्यम्, एतानि नाक्रामेत् । 'कामतो नाधितिष्ठेत् न लङ्घयेच्च देवद्विजगुरुराज्ञस्नातकाचार्यमन्त्रिणां नाक्रामेत्कामतः छायां कपिलस्य च गोरपी' ति यमवचनात् ॥ १५२ ॥

---

(१) गृहमागते क० । (२) ऊषरं फ० । (३) रध्ययन क० रध्यापन ग० ।
(४) कृतावसाक्थिक ऊरुभ्यामवनिं गतः । (५) द्वर्तनादि च इति मुद्रितपुस्तके पाठः ।

(मिता०)एवमनध्यायानुक्त्वा प्रकृतानि स्नातकव्रतान्याह—

देवेत्यादि । देवानां देवार्च्यानामृत्विक्स्नातकाचार्यराज्ञां परस्त्रियाश्च छायां नाक्रामेन्नाधितिष्ठेन्न लङ्घयेद्बुद्धिपूर्वकम्। यथाह मनुः—(४।१३०) 'देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा। नाक्रामेत्कामतश्छायां यभ्रुणो दीक्षितस्य च'॥ इति। वसुणो नकुलवर्णस्य कस्यचिद्गोरन्यस्य वा श्यामा(१)देः, यभ्रुण इति नपुंसकलिङ्गनिर्देशात्। रक्तादीनि च नाधितिष्ठेत। आदिग्रहणात्स्नानोदकादग्रहणम्। (मनुः ४।१३२) 'उच्छर्तनमपस्नानं विण्मूत्रं रक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः'॥ इति ॥ १५२ ॥

(वी० मि०) किं च—

विप्राहिक्षत्रियात्मानो नाऽवज्ञेयाः कथञ्चन (२) ॥

विप्रः सर्पः क्षत्रिय आत्मा च नावमन्तव्याः। अत्र मनुः—

क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम्।
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥
एतत्त्रयं हि पुरुषान्निर्दहत्यवमानितम्।—॥

(वी० मि०) अपि च—

आमृत्योः श्रियमाकाङ्क्षेन्न कञ्चिन्मर्माणि स्पृशेत् ॥१५३॥

यावज्जीवं श्रियमिच्छेत् श्रीसिद्धनिमित्तमुत्तमं यावद् गृहस्थाश्रमं कुर्यादिति यावत्। तथा कञ्चिन्मित्रमुदासीनं शत्रुं वा मर्माणि गोप्यदोषे न स्पृशेत् न वचनादिविषयीकुर्यात् परस्य गोप्यदोषं न प्रकाशयेदिति पर्यवसितार्थः ॥ १५३ ॥

(मिता०) विप्राहीत्यादि। विप्रो बहुश्रुतो ब्राह्मणः, अहिः सर्पः, क्षत्रियो नृपतिः, एते कदाचिदपि नावमन्तव्याः। आत्मा च स्वयं नावमन्तव्यः। आमृत्योर्यावज्जीवं श्रियमिच्छेत्। न कञ्चिदपि पुरुषं मर्माणि स्पृशेत् कस्यचिदपि मर्म दुश्चरितं न प्रकाशयेत् ॥ १५३ ॥

---

(१) सोमादेः ग०।

(२) वदावन-इति मुद्रितपुस्तके पाठः।

(वी० मि०) किञ्च—

दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् ॥
श्रुतिस्मृत्युदितं सम्यङ् नित्यमाचारमाचरेत् ॥१५४॥

गृहाद् दुरे उच्छिष्टादीनि प्रक्षिपेत्। पादाम्भः पादप्रक्षालनजलं, तथा श्रुतिस्मृतिभ्यां विहितमावश्यकमाचारमग्निहोत्रस्नानादिरूपं नित्यं तत्तद्विहितकालमभिव्याप्य(१)सम्यक् शक्यसर्वाङ्गोपेतं आचरेत् कुर्यात्। अत्र सम्यगिति विधेयम् ॥ १५४ ॥

(मिता०) दूरादिति। भोजनाद्युच्छिष्टं विण्मूत्रे पादप्रक्षालनोदकं च गृहाद् दूरात्समुत्सृजेत्। श्रौतं स्मार्तं चाचारं नित्यं सम्यगनुतिष्ठेत् ॥ १५४ ॥

(वी० मि०) अपि च—

गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत् ॥
न निन्दाताडने कुर्यात्सुतं (२)शिष्यं च ताडयेत् ॥ १५५ ॥

उच्छिष्टोऽशुचिः सन् गोब्राह्मणाग्न्योदनान् न स्पृशेत्। शुचिरपि पदा चरणेन तान्न स्पृशेत्। स्पर्शे तु—

स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु ॥

इति मनूक्तमाचरेत्। युद्धाद्यतिरिक्तकाले परस्परनिन्दाताडने न कुर्यात्। अत्र प्रतिप्रसवः सुतमित्यादिना। चकारेण भार्यादासयोः समुच्चयः।

भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः।
प्राप्तापराधा दण्ड्याः स्यू रज्ज्वा वेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कदाचन।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥

इति मनुवचनात्। ताडयेत् शिक्षार्थम् ॥ १५५ ॥

---

(१) तत्तद्विहितकालान्नातिव्याप्यं-इति क० पु० पाठः।
(२) पुत्रं-इति मुद्रितपुस्तके पाठः।

(मिता०) गोब्राह्मणेत्यादि । गां ब्राह्मणमग्निं अन्नमदनीयं विशेषतः पक्वमशुचिर्न स्पृशेत् । पादेन त्वनुच्छिष्टोऽपि । यदा पुनः प्रमादात्स्पृशति तदा आचमनोत्तरकालम्—'स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् । गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु' ॥ इति (४।१४३) स्मृत्युक्तं कार्यम् । एवं प्राणादीनुपस्पृशेत् । कस्यचिदपि निन्दाताडने न कुर्यात् । एतच्चानपकारिणि । (मनुः ४।२६७)—'अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः । दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः' ॥ इति । पुत्रशिष्यौ शिक्षार्थमेव ताडयेत् चकारादन्यानपि । ताडनं च रज्ज्वादिनोत्तमाङ्गव्यतिरेकेण । 'शिष्यशिष्टिरव(१)धेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुश्यामन्येन घ्नन् राज्ञा शास्यते' इति गौतमवचनात् । 'पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन' इति (८।३००) मनुवचनात् ॥ ॥ १५५ ॥

(वी० मि०) किञ्च—

कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ॥
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ॥ १५६ ॥

कर्मणा कायेन । अत्र यत्नादिति विधेयम् । अत्राऽपवादः—अस्वर्ग्यमित्यादिः । धर्मामिष्टसाधनत्वेन वेदादिविहितमप्यस्वर्ग्यं बलवदनिष्टजनकमभिचारादि लोकविद्विष्टं राजादिमध्यदेशीयानामविधिमांसभक्षणंनिवर्तनादि च नाचरेत् । तुशब्देन धर्मं समाचरेदित्युक्तं व्यवच्छिनत्ति ॥ १५६ ॥

(मिता०) कर्मणेति । कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत् तमेव मनसा ध्यायेत् वाचा च वदेत् । धर्म्ये विहितमपि लोकविद्विष्टं लोकाभिशस्तिजननं मधुपर्के गोवधादिकं नाचरेत् । यस्मादस्वर्ग्यं(२)मप्यामीषोमीयवत्स्वर्गसाधनं न भवति ॥ १५६ ॥

(वी० मि०) अपि च—

मातृपित्रतिथिभ्रातृजामिसम्बन्धमातुलैः ॥
बाल(१)वृद्धातुराचार्यवैद्यसंश्रितबान्धवैः ॥ १५७ ॥

---

(१) स्वधेन बोधनाशक्तौ ख० ।
(२) मग्नीषोमीय ख० ।
(१) वृद्धबालातुरा०—इति मुद्रितपुस्तके पाठः ।

ऋत्विक्पुरोहिताचार्यमातुलातिथिसंश्रितैः ॥
बालवृद्धातुरैर्वैद्यज्ञातिसम्बन्धिबान्धवैः ॥
मातापित्रोश्च सततं विवादं वर्जयेद् बुधः(१)॥१५८॥

जामयो भगिनीप्रभृतयः, सम्बन्धिनो जामात्रादयः, बालः षोडशवर्षानधिकवयस्कः, वृद्धः सप्ततिवर्षोर्द्ध्ववयस्कः, आतुरो रोगार्त्तः, वैद्यो भिषक् विद्यावानिति केचित्, संश्रिताः स्वोपजीविनः शिष्यादयः, बान्धवा मातृपक्ष्याः, पुरोहितः शान्त्यादिकर्ता वैदिककर्मप्रयोगप्रदर्शको वा, सनाभयः सपिण्डा भ्रात्रादिषु । केचित्सुप्रसिद्धाः केचित्पूर्वं लक्षिताः । अत्र सामान्यत उक्तस्यापि कस्यचिद्विशिष्योक्तिरादरातिशयाद्योतनाय । भ्रात्रादिभिर्विवादं कलहं वक्ष्यमाणलक्षणं व्यवहारं वर्जयन् गृहस्थः सर्वान् ब्राह्मणादीन् लोकान् जयति प्राप्नोति । तस्मादेभिर्विवादं नाचरेदिति तात्पर्यम् ॥१५७-१५८॥

(मिता०) मात्रित्यादि । ऋत्विगित्यादि च । माता जननी । पिता जनकः । अतिथिरध्वनीनः । भ्रातरो भिन्नोदरा अपि । जामयो विद्यमानभर्तृकाः स्त्रियः । संबन्धिनो वैवाह्याः । मातुलो मातुर्भ्राता । वृद्धः सप्तत्युत्तरवयस्कः । बाल आषोडशाद्वर्षात् । आतुरो रोगी । आचार्य उपनेता । वैद्यो विद्वान् भिषग्वा । संश्रितः उपजीवी । बान्धवाः पितृपक्ष्या मातृपक्ष्याश्च । मातुलस्य पृथगुपादानमादरार्थम् । ऋत्विग्याजकः । पुरोहितः शान्त्यादेः कर्ता । अपत्यं पुत्रादि । भार्या सहधर्मचारिणी । दासः कर्मकरः । सनाभयः सोदराः । भ्रातृभ्यः पृथगुपादानमजामिभगिनीप्राप्त्यर्थम् । एतैर्मात्रादिभिः सह वाक्कलहं परित्यज्य सर्वान्प्राजापत्यादीन् लोकान्प्राप्नोति ॥ १५७-१५८ ॥

(वी० मि०) किञ्च--

पञ्च पिण्डाननुद्धृत्य न स्नायात्पर(२)वारिणि ॥
स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च ॥ १५९ ॥

परवारिणि परकृतनिपानजले पञ्च मृत्पिण्डाननुद्धृत्य ततो बहिरक्षिप्य न स्नानमाचरेत् । किं तु नद्यादिषु स्नायात् । नदी धनुरष्टसहस्रावच्छिन्नदेशव्यापिगतिमज्जलं, दैवसम्बन्धितया प्रसिद्धं

---

(१) जयेद् बुधः-इति ख० पु० पाठः । (२) परवारिषु-इति मुद्रितपुस्तके पाठः ।

देवह्रदादि सूर्यादिसमीपस्थखातं वा, ह्रदः सरः क्वचिद्गर्तेति पाठः। तत्र धनुःसहस्रगतिशून्या नद्याकारा आपो गर्तः, प्रस्रवणं निर्झरः स्नाने विहिता निषिद्धा देशा गृहस्थप्रकरण एव प्रपञ्चिता इति नेह उच्यन्ते ॥ १५९ ॥

(मिता०) पञ्चेति। परवारिषु परसम्बन्धिषु सर्वसत्त्वोद्देशेनात्यक्तेषु तडागादिषु पञ्च पिण्डाननुद्धृत्य न स्नायात्। अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिण्डोद्धारमन्त(१)रापि स्नानमभ्यनुज्ञातम्। नद्यादिषु कथं तर्हीत्याह—स्नायान्नदीति। साक्षात्परम्परया वा समुद्रगाः स्रवन्त्यो नद्यः। देवखातं पुष्करादि। उदकप्रवाहाभिघातकृतसजलो महानिम्नप्रदेशो ह्रदः। पर्वताद्युच्चप्रदेशात्प्रसृतमुदकं प्रस्रवणम्। एतेषु पञ्चपिण्डानुद्धरणेनैव स्नायात्। एतच्च नित्यस्नानविषयं सति संभवे। (मनुः ४। २०३) नदीषु देवखातेषु तडागेषु सरःसु च। स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च' ॥ इति नित्यग्रहणात्। शौचार्थे तु यथासंभवं परवारिषु पिण्डानुद्धरणे सर्वस्य न निषेधः ॥ १५९ ॥

(वी० मि०) अपि च—

परशय्यासनोद्यानगृहपानानि वर्जयेत् ॥
अदत्तान्यग्निहीनस्य नाऽन्नमद्यादनापदि ॥ १६० ॥

अदत्तानि स्वामिना स्वस्वत्वानास्पदीकृतानीति यावत्। परोपभुक्तानि शय्यादीनि नोपभुञ्जीत। अनापद्यन्नान्तरसम्भवे अग्निहीनस्य उत्सृष्टश्रौतस्मार्ताग्नेरन्नं नाद्यादित्यर्थः ॥ १६० ॥

(मिता०) परेत्यादि। शय्या काशिपुः। आसनं पीठादि। उद्यानमाम्रादिवनम्। गृहं प्रसिद्धम्। यानं रथादि। परसम्बन्धीन्येतान्यदत्तान्यननुज्ञातानि वर्जयेत् नोपभुञ्जीत। अभोज्यान्नान्याह—अग्निहीनस्येति। अग्निहीनस्य श्रौतस्मार्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलोमजस्य च अधिकारवतोऽप्यग्निरहितस्यान्नमनापदि न भुञ्जीत प्रतिगृह्णीयाच्च। 'तस्मात्प्रशस्तानां स्वकर्मणा शुद्धजातीनां ब्राह्मणो भुञ्जीत प्रतिगृह्णीयाच्च' इति गौतमवचनात् ॥ १६० ॥

---

(१) मन्तरेणापि क०।

(वी० मि०) किञ्च--

कदर्यबद्धचौराणां क्लीवरङ्गावतारिणाम् ॥
वैणाभिशस्तवार्द्धुष्यगाणिक्यागणदीक्षिणाम् ॥ १६१ ॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् ॥
क्रुद्धोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम् ॥ १६२ ॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् ॥
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम् ॥ १६३ ॥
नृशंसराजरजकक्रुतघ्नवधजीविनाम् ॥
चैलधावसुराजीवि(१)सद्दोपपतिवेश्मनाम् ॥ १६४ ॥
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ॥
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ १६५ ॥

कदर्यः—

आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ।
लोभाद्यः प्रचिनोत्यर्थान् स कदर्य इति स्मृतः ॥

इति देवलेन परिभाषितः । बद्धो निगडादिना, रङ्गावतारी नट-मल्लादिः, वैणो वेणुच्छेदनोपजीवी, अभिशस्तः पातककारित्वेनाक्षिप्तः, वार्द्धुष्यः निषिद्धवृद्ध्युपजीवी, गणिका वेश्या, गणः समुदायः, दीक्षी दीक्षावान् । अयं चाऽग्नीषोमीयवपाहोमात्प्रागेघाभोज्यान्नः । 'अशितव्यं वपायां हुतायां'मिति श्रुतेः । गणदीक्षी गणयाजक इति शूलपाणिः, तन्न ग्रामयाजिपदेन पौनरुक्त्यापातात् । चिकित्सकः चिकित्सावृत्तिः, आतुरोऽपस्मारादिमहारोगग्रस्तः, क्रुद्धो विद्यमानकोपः, पुंश्चली व्यभिचारिणी, मत्तो मद्यादिना गर्वितश्च, विद्विट् शत्रुः, क्रूरः मर्मघाती, उग्रः परोद्वेजनशीलः, पतितो ब्रह्म-हा(२)दिः, व्रात्यो दाम्भिकश्च उक्तः, उच्छिष्टभोजी परभुक्तोज्झिता-

(१) सुराजीव-इति मुद्रितपुस्तके पाठः ।
(२) ब्रह्महत्यादिः-इति क० पु० पाठः ।

शनशीलः, अवीरा स्त्री निष्पतिपुत्रा स्त्री, स्वर्णकारः स्वर्णालङ्कारादिघटकः, स्त्रीजितः स्त्रीवशतया मातापित्रादिनिर्भर्त्सनादिशीलः, ग्रामयाजी बहुयाजनशीलो बहूनामुपनेता वा, शस्त्रविक्रयी खड्गादिविक्रयवृत्तिः, कर्मारो लोहकारः, तथा च तन्तुवायः सूचीशिल्पवृत्तिः, श्वजीवी कुक्कुरवृत्ताखेटकाद्युपजीवी। केचित्तु श्ववृत्तीनामिति पठित्वा सेवावृत्तीनामिति व्याचक्षते। नृशंसो निर्दयः, रजको वस्त्रादिरञ्जनकर्ता, कृतघ्नः परकृतस्योपकारस्य हन्ताऽनादर्ता, वधजीवी प्राणिहिंसावृत्तिः, चैलधावो वस्त्रनिर्णेजनवृत्तिः, सुराजीवी सुराविक्रयवृत्तिः, सहोपपति वेश्याजारेण सहैकवेश्मनि वर्त्तमानः, पिशुनः परदोषसूचनशीलः, अनृती मिथ्यावचनशीलः, चाक्रिकः चक्रोपजीवी शाकटिकादिः, वन्दी स्तुतिपाठवृत्तिः। एषां पूर्वोक्तानां सर्वेषां सोमविक्रयिणः सोमलतावित्रेतुश्चाऽन्नं न भोक्तव्यमिति। तथाशब्देन शूद्रवृषलीपत्यादीनां स्मृत्यन्तरोक्तानामभोज्यान्नानां परिग्रहः। ते च विस्तरभयाच्च लिख्यन्ते ॥ १६१-१६५ ॥

(मिता०) कदर्येत्यादि। कदर्यो लुब्धः—'आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत्। लोभाद्यः पितरौ भृत्यान्स कदर्य इति स्मृतः' ॥ इत्युक्तः। बद्धो निगडादिना वाचा संनिरुद्धश्च। चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी। क्लीबो नपुंसकः। रङ्गावतारी नटचारणमल्लादिः। वेणुच्छेदजीवी वैणः। अभिशस्तः पतनीयैः कर्मभिरभियुक्तः। वार्धुष्यो निषिद्धवृद्ध्युपजीवी। गणिका पण्यस्त्री। गणदीक्षी बहुयाजकः। एतेषामन्नं नाश्नीयादित्यनुवर्तते ॥ १६१ ॥

(मिता०) चिकित्सकेत्यादि। चिकित्सको भिषग्वृत्त्युपजीवी। आतुरो महारोगोपसृष्टः। 'वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः। अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः' इति। क्रुद्धः कुपितः। पुंश्चली व्यभिचारिणी। मत्तो विद्यादिना गर्वितः। विद्विट् शत्रुः। क्रूरो दृढाभ्यन्तरकोपः। वाक्कायव्यापारेणोद्वेजक उग्रः। पतितो ब्रह्महादिः। व्रात्यः पतितसावित्रीकः। दाम्भिको वञ्चकः। उच्छिष्टभोजी परभुक्तोज्झितभोजी। एतेषां चिकित्सकादीनामन्नं नाश्नीयात् ॥ १६२ ॥

---

(१) वृत्त्युपजीवी क०।

(मिता०) अवीरेत्यादि। अवीरा स्त्री स्वतन्त्रा व्यभिचारमन्तरेणापि। पतिपुत्ररहितेत्यन्ये। स्वर्णकारः सुवर्णस्य विकारान्तरकृत्। स्त्रीजितः सर्वत्र स्त्रीवशवर्ती। ग्रामयाजी ग्रामस्य शान्त्यादिकर्ता बहूनामुपनेता वा। शस्त्रविक्रयी शस्त्रविक्रयोपजीवी। कर्मारो लोहकारः तक्षादिश्च। तन्तुवायः सूचीशिल्पोपजीवी। श्वभिर्वृत्तिर्वर्तनं जीवनमस्यास्तीति श्ववृत्ती। एतेषामन्नं नाश्नीयात् ॥ १६३ ॥

(मिता०) नृशंसेत्यादि। नृशंसो निर्दयः। राजा भूपतिः। तत्साहचर्यात्पुरोहितश्च। यथाह शङ्खः—'भीतावगीतरुदिताक्रन्दितावधुष्टक्षुधितपरिभुक्तविस्मितोन्मत्तावधूतराजपुरोहितान्नानि वर्जयेत्' इति। रजको वस्त्रादीनां नीला(१)दिरागकारकः। कृतघ्न उपकृतस्य हन्ता। वधजीवी प्राणिनां वधेन वर्तकः। चैलधावो वस्त्रनिर्णेजनकृत्। सुराजीवो मद्यविक्रयजीवी। उपपतिर्जारः। सहोपपतिना वेश्म यस्यासौ सहोपपतिवेश्मा। पिशुनः परदोषस्य ख्यापकः। अनृती मिथ्यावादी। चाक्रिकस्तैलिकः। शाकटिकश्चेत्येके। अभिशस्तः पतितश्चाक्रिकस्तैलिक इति भेदेनाभिधानात्। वन्दिनः स्तावकाः। सोमविक्रयी सोमलताया विक्रेता। एतेषामन्नं न भोक्तव्यम्। सर्वे चैते कदर्यादयो द्विजा एव कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः। इतरेषां प्राप्त्यभावात्प्राप्तिपूर्वकत्वाच्च निषे(२)धस्य ॥ १६४–१६५ ॥

(वी० मि०) तथाशब्देनाऽभोज्यान्नत्वेनाऽभिहिते शूद्रे। प्रतिप्रसवमाह—

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ॥
भोज्यान्ना नापितश्चैव यश्चाऽऽत्मानं निवेदयेत् ॥ १६६ ॥

शूद्रेष्विति निर्द्धारणे सप्तमी, तेन शूद्राणां मध्ये दासादय एव भोज्यान्ना इत्यर्थः। दासो गृहदासादिः पञ्चदशविधो। नारदोक्तः स च स्वकीयः।

स्वदासो नापितो गोपः कुम्भकारः कृषीवलः।
ब्राह्मणैरपि भोज्यान्ना पञ्चैते शूद्रयोनयः ॥

इति देवलवचनात्। गोपालो गोरक्षण(३)वृत्तिः, कुलमित्रं

---

(१) नील्यादिरागकरः क.। (२) प्रतिषेधस्य क.।
(३) गोरक्षकवृत्ति-इति क० पु० पाठः।

पितामहादिक्रमागतमित्रम्, अर्द्धसीरी संभूयसमुत्थायितयाऽर्धकर्षकः, नापितः क्षुरकर्मादिवृत्तिः चकारेण कुम्भकारादिपरिग्रहः। एवकारः शूद्रान्तरव्यवच्छेदार्थः। आत्मानं निवेदयेत्तवाऽहमित्युपगच्छेत्। द्वितीयचकारो नापितविशेषणत्वभ्रमवारणार्थः ॥ १६६ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने स्नातकप्रकरणम्।

(मिता०) अग्निहीनस्य नान्नमद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तं तत्र प्रतिप्रसवमाह—

शूद्रेष्विति। दासा गर्भदासादयः। गोपालो ग(१)वां पालनेन यो जीवति। कुलमित्रं पितृपितामहादिक्रमायातः। अर्धसारी हलपर्यायसीरोपलक्षितकृषिफलभागग्राही। नापितो गृहव्यापारका(२)रयिता नापितश्च। यश्च वाङ्मनःकायकर्मभिरात्मनं निवेदयति तवाहमिति। एते दासादयः शूद्राणां मध्ये भोज्यान्नाः। चकारात्कुम्भकारश्च। 'गोपनापितकुम्भकारकुलमित्रार्धिकनिवेदितात्मानो भोज्यान्नाः' इति वचनात् ॥ १६६ ॥

इति स्नातकव्रतप्रकरणम्।

(वी० मि०) इदानीं गृहस्थस्य द्विजातेर्भक्ष्याभक्ष्यान्याह पञ्चदशभिः श्लोकैः 'मुनिर्मांसविवर्जना'दित्यन्तैः—

अनर्चितं वृथामांसं केशकीटसमन्वितम् ॥
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ॥ १६७ ॥
उदक्यास्पृष्टसङ्घुष्टं पर्यायान्नं च वर्जयेत् ॥
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥ १६८ ॥

अनर्चितमवज्ञया दत्तं, वृथामांसं देवपित्रर्चनादिप्रयोजनशून्यं मांसं, केशेन कीटेन वा समन्वितं दुष्टं, शुक्तं स्वयमनम्लं द्रव्यान्तरसंसर्गादिवशादम्लतां प्राप्तं, पर्युषितं साधितं रात्र्यन्तरितं, उच्छिष्टं प्रसि(३)द्धम्। केचित्-'उच्छिष्टमगुरोरभोज्य'मिति वसिष्ठनाम्ना वचनं

(१) गवां पालकः गवां पालनेन ख.। (२) कर्मस्थायी क.।
(३) प्रसिद्धमित्यारभ्य स्पृष्टमित्यन्तं नास्ति क० पुस्तके।

लिखन्ति। उदक्यया रजस्वलया स्पृष्टं, सङ्घुष्टं च को भोजनर्थीति उद्घुष्य दत्तं, पर्यायान्नं अन्यसम्बन्धि यदन्नमन्यव्यपदेशेन दत्तम्। यथाहुः—

ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्।
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्॥

पर्याचान्तमिति क्वचित्पाठः। तत्र प्रत्यपोशानानन्तरं शुद्ध्यर्थाचमनात्प्रागुपात्तमित्यर्थः। पार्श्वाचान्तमिति पाठे तु एकस्यां पङ्क्तौ पार्श्वस्थे आचान्ते यदुपात्तमित्यर्थः। गवा आघ्रातं, शकुनेन काकादिना उच्छिष्टं, कामत इच्छया, पदा चरणेन स्पृष्टम्। अत्र प्रथमचकारेण अप्रयतोपहृतादिपरिग्रहः। तदाहाऽऽपस्तम्बः—'अप्रयतोपहृतमन्नमप्रयतमभोज्य'मिति। एवं वचनान्तराण्यपि स्मृत्यन्तरेषु द्रष्टव्यानि। द्वितीयचकारेण तु—'अमेध्यपतितचण्डालरजस्वलाकुनखिकुष्ठिसंस्पृष्ट'मिति शङ्खादिवचनबलात् चण्डालादिस्पृष्टपरिग्रहः॥ १६७—१६८॥

(मिता०) न स्वाध्यायविरोध्यर्थमित्यत आरभ्य ब्राह्मणस्य षट्कर्मतत्रतान्यभिधायेदानीं द्विजातिधर्मानाह—

अनर्चितमिति। उदक्येत्यादि च। अनर्चितं अर्चार्हाय यदवज्ञया दीयते। वृथामांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण देवाद्यर्चनावशिष्टं च यन्न भवति आत्मार्थमेव यत्साधितम्। केशकीटादिभिश्च समन्वितं संयुक्तम्। यत्स्वयमनम्लं केवलं कालपरिवासेन, द्रव्यान्तरसंसर्गकालपरिवासाभ्यां वाऽम्लीभवति तच्छुक्तदध्यादिव्यतिरेकेण। 'न पापीयसोऽन्नमश्नीयान्न द्विःपक्वं न शुक्तं न पर्युषितं अन्यत्र रागखाण्डवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्यः' इति शङ्खस्मरणात्। पर्युषितं राज्यन्तरितम्। उच्छिष्टं भुक्तोज्झितम्। श्वस्पृष्टं शुना स्पृष्टम्। पतितेक्षितं पतितादिभिरीक्षितम्। उदक्या रजस्वला तया स्पृष्टम्। उदक्याग्रहणं चण्डालाद्युपलक्षणार्थम्। 'अमेध्यपतितचण्डालपुक्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेत्' इति शङ्खस्मरणात्। को भुङ्क्ष इति यदाघुष्य दीयते तत्संघुष्टान्नम्। अन्यसंबन्ध्यन्यव्यपदेशेन यद्दीयते तत्पर्यायान्नम्। यथा—'ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्'॥ इति। पर्याचान्तमिति पाठे परिगतमाचान्तं गण्डूषग्रहणं यस्मिन्

तत्पर्याचान्तं तन्न भोक्तव्यम् । एतदुक्तं भवति—गण्डूपग्रहणादूर्ध्वं आचमनात्प्राक् न भोक्तव्यमिति । पार्श्वाचान्तमिति पाठे एकस्यां पङ्क्तौ पार्श्वस्थे आचान्ते न भोक्तव्यं भस्मोदकादिविच्छेदेन विना । वर्जयेदिति प्रत्येकं संबध्यते । तथा गोघ्रातं गवा आघ्रातम् । शकुनोच्छिष्टं शकुनेन काकादिना भुक्तमास्वादितम् । पदा स्पृष्टं बुद्धिपूर्वं पादेन स्पृष्टं वर्जयेत् ॥ १६७—१६८ ॥

(वी० मि०) अत्र पर्युषिते प्रतिप्रसवमाह—

अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ॥
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥ १६९ ॥

गोरसविक्रिया इत्यत्रे दर्शनादन्नपदमत्राऽदनीयमात्रपरं, तेन सर्वं पर्युषितं चिरसंस्थितमपि घृतादिस्नेहाक्तं सद्भोक्तव्यमित्यर्थः । न केवलमेकरात्र्यन्तरितमेव भोज्यमपि तु द्वित्रादिरात्र्यन्तरितमपि स्नेहाक्तं भक्ष्यमिति चिरसंस्थितमित्यनेन दर्शयति । गोधूमादिविकारास्तु पर्युषिता अस्नेहाक्ता अपि भोज्याः । इदमुपलक्षणं शुक्तमपि दध्यादि भोक्तव्यम् ।

दधि भक्ष्यं च शुक्तेषु यच्चैव दधिसम्भवम् ।

इति बृहस्पतिवचनात् । अश्नीयादित्यनुवृत्तौ 'न द्विःपक्वं न शुक्तं न पर्युषितमन्यत्र रागखाण्डवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्य' इति शङ्खवचनाच्च ।

पिप्पली शुण्ठीयुक्तश्च मुद्गयूपस्तु खाण्डवः ।
रागखाण्डवतां याति शर्करासहितश्च सः ॥

दध्याद्यतिरिक्तं च शुक्तं केवलमभक्ष्यं द्रव्यान्तरसंसृष्टं तु भक्ष्यमेव, 'शुक्तन्तु केवल'मिति गौतमवचनात्-इत्यपि द्रष्टव्यम् ॥ १६९ ॥

(मिता०) पर्युषितस्य प्रतिप्रसवमाह—

अन्नमिति । अन्नमदनीयं पर्युषितं धृतादिस्नेहसंयुक्तं चिरकालसंस्थितमपि भोज्यम् । गोधूमयवगोरसविक्रियाः मण्डसक्तुकिलाटकूर्चिकाद्या अस्नेहा अपि चिरकालसंस्थिता भोज्याः, यदि विकारान्तरमनापन्नाः । 'अपूपधानाकरम्भसक्तु(१)यावकतैलपायसशाकानि शुक्तानि वर्जयेत्' इति वसिष्ठस्मरणात् ॥ १६९ ॥

---

(१) सक्तुपाचकैतल० ख ।

(वी० मि०) किञ्च--

सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ॥
औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥ १७० ॥
देवतार्थं हविः शिग्रुं लोहितान् व्रश्चनांस्तथा ॥
अनुपाकृतमांसानि विड्जानि कवकानि च ॥ १७१ ॥
क्रव्यादपक्षिदात्यूहशुकमद्गुदिट्टिभान् ॥
सारसैकशफान् हंसान् सर्वांश्च ग्रामवासिनः ॥ १७२ ॥
कोयष्टिप्लवचक्राव्हबलाकावकनिष्किरान् ॥
वृथा कृसरसंयावपायसाऽपूपशष्कुलीः ॥ १७३ ॥
कलविङ्कं सकाकोलं कुररं रज्जुदालकम् ॥
जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान् ॥ १७४ ॥
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ॥
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ॥ १७५ ॥

सन्धिनी वृषभेन सन्धियोग्या ऋतुमती, अनिर्दशा प्रसवानन्तरमनिःक्रान्तदशाहा, अवत्सा क्षीरपायित्वाऽपत्यरहिता । आसां गवां प्रत्येकं पयो वर्जयेत् न भक्षयेत् । गोरिति छान्दसत्वात्सः मासान्तविधेरनित्यत्वाद्वा समाधेयम् । एकवचनं जात्यभिप्रायम् । 'गोक्षीरमनिर्दशायाः सूतकेऽजामहिष्योश्चे'ति गौतमवचनादजामहिष्योरपि दशाहपर्यन्तं पयोऽभक्ष्यमिति द्रष्टव्यम् । पय इति तद्विकारस्याप्युपलक्षकम् ।

क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रं व्रतं कुर्यात्तेषु यत्परिकीर्त्तितम् ॥

इति भवदेवलिखितवचनात् । इदमेवाभिप्रेत्य परिवर्जयेदित्यत्र परीत्युपसर्गोपादानं कृतम् । औष्ट्रमुष्ट्रीभवं, ऐकशफं एकशफा वड़वादयस्तत्प्रभवं, स्त्रैणं मानुषस्त्रीसम्भवम् । केचित्तु अजाव्यतिरिक्तद्विस्तनीपरं स्त्रीपदं, 'सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्ज'मिति शङ्खवचनादित्याहुः । आरण्याः चमरीमृग्यादयस्तत्सम्बन्धि आरण्यकम् ।

आरण्यानां च सर्वेषां मृगाणां महिषीं विना।

इति मनुः। अथशब्देन स्यन्दिनीयमलसूसन्धिनीनां च क्षीरमित्यादिनिषिद्धपयोऽन्तरसमुच्चयः। देवतार्थं होमनैवेद्याद्यर्थं हविः पुरोडाशादि, तच्च होमादेः प्राक् तदुत्तरं प्रतिपत्तेर्विहितत्वात्। शिग्रुः शोभाञ्जनः, लोहिता वृक्षनिर्यासा, अलोहिता अपि वृश्चनप्रभवा वृक्षच्छेदनोद्भवाः, तथेत्यनेन चाऽयमेव भेदः स्पष्टीकृतः। तथा च मनुः—

लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवांस्तथा।

लोहितग्रहणात्कर्पूरहिङ्ग्वादीनामनिषेधः। अनुपाकृतं मांसं मन्त्रेणाऽप्रोक्षितस्य पशोर्मांसं, विड्जानि साक्षाद्विष्ठाभवानि तण्डुलीयकादानि, कवकानि छत्राकसदृशानि, क्रव्यादपक्षिणो गृध्रादयः, दात्यूहश्चातकः, चञ्च्वा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनाद्याः, टिट्टिभः टिट्टिभ इति शब्दानुकारी, एकशफा अश्वादयः, ग्रामवासिनः पारावतादयः, कोयष्टिः कोवकः प्लवो जलकुक्कुटः,? चक्राह्वः चक्राङ्गः, बलाका अल्पवकी, नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादयो विशिष्य भक्ष्यत्वेनाऽविहिताः, कृसरः तिलमुद्गसाधितौदनः, संयावो घृतक्षीरगोधूमचूर्णसाधितः, पायसं परमान्नं, अपूपः तण्डुलादिचूर्णगुडसाधितः पूअ इति मिथिलादौ प्रसिद्धः, शष्कुली गोधूमविकारः स्नेहपक्वः, वृथा देवताद्यनुद्देशेन साधिताः। एतच्च कृसरादौ शष्कुलयन्तेऽन्वेति। कलविङ्को ग्रामचटकः, काकोलो द्रोणकाकः तत्सहित इति कलविङ्कविशेषणं, तेन कलविङ्कं काकोलं चेति पर्यवस्यति। कुरर उत्क्रोशः, रज्जुदालको वृक्षकुक्कुटकः कठफोडा इति मध्यदेशे प्रसिद्धः, जालपादा जालाकारचरणाः शरारिप्रभृतयः। एवं च हंसादेः पृथगुपादानं निन्दातिशयार्थम्। अज्ञाताः जातितो रसवीर्यविपाकतो वाऽपरिचिताः। एतच्च मृगद्विजविशेषणम्। मृगाः आरण्यपशवो, द्विजाः पक्षिणः, चाषः किकीदिविः, रक्तपादोः कादम्बप्रभृतयः, सौनं प्राणिवधस्थानभवं मांसं, वल्लूरं शुष्कमांसं, मत्स्याः विशेषतो विहिताः सिंहतुण्डादिव्यतिरिक्ता विशिष्य स्मृत्यन्तरनिषिद्धा वा सर्वानेतान्वर्जयेदित्यन्वयः। अवर्जने प्रायश्चित्तमाह एतान्कामतः स्वतन्त्रेच्छया जग्ध्वा सोपवासो दिनत्रयं तिष्ठेत्। अकामतस्त्वेकाहम्। 'शेषेपूपवसेदह'रिति मनुवचनात्। अत्र चकाराः परस्परसमुच्चयार्थाः। एवकारश्च परिवर्जयेदित्यत्राऽन्वितः॥१७०-१७५॥

(मिता०) सन्धिनीति । गौः या वृषेण सन्धीयते सा सन्धिनी 'वशां वन्ध्यां विजानीयाद्वृषाक्रान्तां च सन्धिनीम्' इति त्रिकाण्डीस्मरणात् । या चैकां वेलामतिक्रम्य दुह्यते, या च वत्सान्तरेण सन्धीयते सापि सन्धिनी । प्रसूता अनतिक्रान्तदशाहा अनिर्दशा । अवत्सा मृतवत्सा । सन्धिनी च अनिर्दशा च अवत्सा च सन्धिन्यनिर्दशावत्सास्ताश्च गावश्च तासां पयः क्षीरं परिवर्जयेत् । सन्धिनीग्रहणं स्यन्दिनीयमलस्वोरुपलक्षणार्थम् । यथाह गौतमः—'स्यन्दिनीयमलसूसन्धिनीनां च' इति । स्रवत्पयःस्तनी स्यन्दिनी । यमलसूर्यमलप्रसविनी । एवमजामहिष्योश्चानिर्दशयोः पयो वर्जयेत् । 'गोमहिष्यजानामनिर्दशानाम' इति वसिष्ठस्मरणात् । पयोग्रहणात्तद्विकाराणामपि दध्यादीनां निषेधः । न हि मांसनिषेधे तद्विकाराणामनिषेधो युक्तः । विकारनिषेधे प्रकृतेरनिषे(१)धः । पयोनिषेधाच्छकृन्मूत्रादेरनिषेधः । उष्ट्राज्जातमौष्ट्रं पयोमूत्रादि । एकशफा वडवादयः तत्प्रभवमैकशफम् । स्त्रीभवं स्त्रैणम् । स्त्रीग्रहणमजाव्यतिरिक्तसकलद्विस्तनीनामुपलक्षणार्थम् । 'सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्जम्' इति शङ्खस्मरणात् । अरण्ये भवा आरण्यकास्तदीयमारण्यकं क्षीरं माहिषव्य(२)तिरेकेण । 'आरण्यानां च सर्वेषां मृगाणां माहिषं विना' इति वचनात् । अवेर्जातमाविकम् । वर्जयेदिति प्रत्येकमभिसम्बध्यते । औष्ट्रमित्यादिविकारप्रत्ययनिर्देशात्तद्विकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः । 'नित्यमाविकमपेयमौष्ट्रमेकशफं च' इति गौतमस्मरणात् ॥ १७० ॥

(मिता०) देवतार्थमिति । देवतार्थं बल्युपहारनिमित्तं साधितम् । हविः हवनार्थं सिद्धं प्राक् होमात् । शिग्रुः सौभा(३)ञ्जनः । लोहितान् वृक्षनिर्यासान् । वञ्चनप्रभवान् वृक्षच्छेदनजातानलोहितानपि । यथाह मनुः—'लोहितान्वृक्षनिर्यासान्वञ्चनप्रभवांस्तथा' इति । लोहितग्रहणात् हिङ्गुकर्पूरादीनामनिषेधः । अनुपाकृतमांसानि यज्ञेऽहुतस्य पशोर्मांसानि । विड्जानि मनुष्यादिजग्धबीजपुरीषोत्पन्नानि पुरीषस्थाने उत्पन्नानि तन्दुलीयकप्रभृतीनि च । कवकानि छत्राकाणि । वर्जयेदिति प्रत्येकमभिसम्बध्यते ॥ १७१ ॥

---

(१) रनिषेधो युक्त ख० । (२) व्यतिरिक्तम् क० । (३) शोभाञ्जनः क० ।

(मिता०) क्रव्यादेति । क्रव्यादा आममांसादनशीलाः । पक्षिणो गृध्रादयः । दात्यूहश्चातकः । शुकः कीरः । चञ्च्वा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनादयः । टिट्टिभस्तच्छब्दानुकारी । सारसो लक्ष्मणः । एकशफा अश्वादयः । हंसाः प्रसिद्धाः । ग्रामवासिनः पारावतप्रभृतयः । एतान्क्रव्यादादीन्वर्जयेत् ॥ १७२ ॥

(मिता०) कायेष्टीति । कोयष्टिः क्रौञ्चः । प्लवो जलकुक्कुटः । चक्राह्वश्चक्रवाकः । बलाकावकौ प्रसिद्धौ । नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादय एव गृह्यन्ते । लावकमयूरादीनां भक्ष्यत्वात्; ग्रामकुक्कुटस्य ग्रामवासित्वादेव निषेधाच्च । एतान्कोयष्ट्यादीन्वर्जयेत् । वृथा देवताद्युद्देशमन्तरेण साधिताः कृसरसंयावपायसाऽपूपशष्कुलीर्वर्जयेत् । कृसरं तिलमुद्गसिद्ध(१) ओदनः । संयावः क्षीरगुडघृतादिकृत उत्करिकाख्यः पाकविशेषः । पायसं पयसा शृतमन्नम् । अपूपः स्नेहपक्वगोधूमविकारः । शष्कुली स्नेहपक्वो गोधूमविकारः । 'न पचेदन्नमात्मने' इति कृसरादीनां निषेधे सिद्धे पुनरभिधानं प्रायश्चित्तगौरवार्थम् ॥ १७३ ॥

(मिता०) कलविङ्कमिति । कलविङ्को ग्रामचटकः । ग्रामनिवासित्वेन प्रतिषेधे सिद्धे सत्यु(२)भयचारित्वात्पुनर्वचनम् । काकोलो द्रोणकाकः । कुरर उत्क्रोशः । रज्जुदालको वृक्षकुट्टकः । जालपादो जालाकारपादः । अजालपादा अपि हंसाः सन्तीति हंसानां पुनर्वचनम् । खञ्जरीटः खञ्जनः । जातितो ये अज्ञाता मृगाः पक्षिणश्च । एतान्कलविङ्कादीन्वर्जयेत् ॥ १७४ ॥

(मिता०) चापानिति । चापाः किकीदिवयः । रक्तपादाः कादम्बप्रभृतयः । सूनिनां त्यक्तं सौनं घातस्थानभवं मांसं भक्ष्याणामपि । वल्लूरं शुष्कमांसम् । मत्स्या मीनाः । एतांश्चापादीन्वर्जयेत् । चकारान्नालिकाशणछत्राककुसुम्भादीन् । 'नालिकाशणछत्राककुसुम्भालावुविड्भवान् । कुम्भी(३)कन्दुकवृन्ताककोविदारांश्च वर्जयेत्' ॥ इति, 'तथाऽकालप्ररूढानि पुष्पाणि च फलानि च । विकारवच्च यत्किंचित्प्रयत्नेन विवर्जयेत्' ॥ तथा-'वटप्लक्षाश्वत्थक(४)कपित्थनीपमातुलिङ्गफलानि वर्जयेत्' इति स्मरणात् । एतान् सन्धिनीक्षीरप्र-

(१) तिलमुद्गमिश्र ओदनः क० । (२) उभयपरत्वात् ख० ।
(३) कम्बुक क० । (४) दधित्थ क० ।

(मिता०) अवीरेत्यादि। अवीरा स्त्री स्वतन्त्रा व्यभिचारमन्तरेणापि। पतिपुत्ररहितेत्यन्ये। स्वर्णकारः सुवर्णस्य विकारान्तरकृत्। स्त्रीजितः सर्वत्र स्त्रीवशवर्ती। ग्रामयाजी ग्रामस्य शान्त्यादिकर्ता बहूनामुपनेता वा। शस्त्रविक्रयी शस्त्रविक्रयोपजीवी। कर्मारो लोहकारः तक्षादिश्च। तन्तुवायः सूचीशिल्पोपजीवी। श्वभिर्वृत्तिर्वर्तनं जीवनमस्यास्तीति श्ववृत्ती। एतेषामन्नं नाश्नीयात् ॥ १६३ ॥

(मिता०) नृशंसेत्यादि। नृशंसो निर्दयः। राजा भूपतिः। तत्साहचर्यात्पुरोहितश्च। यथाह शङ्खः—'भीतावगीतरुदिताक्रन्दितावघुष्टक्षुधितपरिभुक्तविस्मितोन्मत्तावधूतराजपुरोहितान्नानि वर्जयेत्' इति। रजको वस्त्रादीनां नीला(१)दिरागकारकः। कृतघ्न उपकृतस्य हन्ता। वधजीवी प्राणिनां वधेन वर्तकः। चैलधावो वस्त्रनिर्णेजनकृत्। सुराजीवो मद्यविक्रयजीवी। उपपतिर्जारः। सहोपपतिना वेश्म यस्यासौ सहोपपतिवेश्मा। पिशुनः परदोषस्य ख्यापकः। अनृती मिथ्यावादी। चाक्रिकस्तैलिकः। शाकटिकश्चेत्येके। अभिशस्तः पतितश्चाक्रिकस्तैलिक इति भेदेनाभिधानात्। वन्दिनः स्तावकाः। सोमविक्रयी सोमलताया विक्रेता। एतेषामन्नं न भोक्तव्यम्। सर्वे चैते कदर्यादयो द्विजा एव कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः। इतरेषां प्राप्त्यभावात्प्राप्तिपूर्वकत्वाच्च निषे(२)धस्य ॥ १६४–१६५ ॥

(वी० मि०) तथाशब्देनाऽभोज्यान्नत्वेनाऽभिहिते शूद्रे। प्रतिप्रसवमाह—

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ॥
भोज्यान्ना नापितश्चैव यश्चाऽऽत्मानं निवेदयेत् ॥ १६६ ॥

शूद्रेष्विति निर्द्धारणे सप्तमी, तेन शूद्राणां मध्ये दासादय एव भोज्यान्ना इत्यर्थः। दासो गृहदासादिः पञ्चदशविधो। नारदोक्तः स च स्वकीयः।

स्वदासो नापितो गोपः कुम्भकारः कृषीवलः।
ब्राह्मणैरपि भोज्यान्ना पञ्चैते शूद्रयोनयः ॥

इति देवलवचनात्। गोपालो गोरक्षण(३)वृत्तिः, कुलमित्रं

(१) नील्यादिरागकरः फ.। (२) प्रतिषेधस्य क.।
(३) गोरक्षकवृत्ति—इति क० पु० पाठः।

पितामहादिक्रमागतमित्रम्, अर्द्धसीरी संभूयसमुत्थायितयाऽर्धकर्षकः; नापितः क्षुरकर्मादिवृत्तिः चकारेण कुम्भकारादिपरिग्रहः। एवकारः शूद्रान्तरव्यवच्छेदार्थः। आत्मानं निवेदयेत्तवाऽहमित्युपगच्छेत्। द्वितीयचकारो नापितविशेषणत्वभ्रमवारणार्थः॥ १६६॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने स्नातकप्रकरणम्।

(मिता०) अग्निहीनस्य नान्नमद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तं तत्र प्रतिप्रसवमाह—

शूद्रेष्विति। दासा गर्भदासादयः। गोपालो ग(१)वां पालनेन यो जीवति। कुलमित्रं पितृपितामहादिक्रमायातः। अर्धसारी हलपर्यायसीरोपलक्षितकृषिफलभागग्राही। नापितो गृहव्यापारका(२)रयिता नापितश्च। यश्च वाङ्मनःकायकर्मभिरात्मनं निवेदयति तवाहमिति। एते दासादयः शूद्राणां मध्ये भोज्यान्नाः। चकारात्कुम्भकारश्च। 'गोपनापितकुम्भकारकुलमित्रार्धिकानिवेदितात्मानो भोज्यान्नाः' इति वचनात्॥ १६६॥

इति स्नातकव्रतप्रकरणम्।

(वी० मि०) इदानीं गृहस्थस्य द्विजातेर्भक्ष्याभक्ष्यान्याह पञ्चदशभिः श्लोकैः 'मुनिर्मांसविवर्जना'दित्यन्तैः—

अनर्चितं वृथामांसं केशकीटसमन्वितम्॥
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम्॥ १६७॥
उदक्यास्पृष्टसङ्घुष्टं पर्यायान्नं च वर्जयेत्॥
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः॥ १६८॥

अनर्चितमवज्ञया दत्तं, वृथामांसं देवपित्रर्चनादिप्रयोजनशून्यं मांसं, केशेन कीटेन वा समन्वितं दुष्टं, शुक्तं स्वयमनम्लं द्रव्यान्तरसंसर्गादिवशादम्लतां प्राप्तं, पर्युषितं साधितं रात्र्यन्तरितं, उच्छिष्टं प्रसि(३)द्धम्। केचित्-'उच्छिष्टमगुरोरभोज्य'मिति वसिष्ठनाम्ना वचनं

(१) गवां पालकः गवां पालनेन ख.। (२) कर्मस्थायी क.।
(३) प्रसिद्धमित्यारभ्य स्पृष्टमित्यन्तं नास्ति क० पुस्तके।

लिखन्ति। उदक्यया रजस्वलया स्पृष्टं, सङ्घुष्टं च को भोजनर्थीति उद्घुष्य दत्तं; पर्यायान्नं अन्यसम्बन्धि यदन्नमन्यव्यपदेशेन दत्तम्। यथाहुः—

ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्।
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्॥

पर्याचान्तमिति क्वचित्पाठः। तत्र प्रत्यपोशानानन्तरं शुद्ध्यर्थाचमनात्प्रागुपात्तमित्यर्थः। पार्श्वाचान्तमिति पाठे तु एकस्यां पङ्क्तौ पार्श्वस्थे आचान्ते यदुपात्तमित्यर्थः। गवा आघ्रातं, शाकुनेन काकादिना उच्छिष्टं, कामत इच्छया, पदा चरणेन स्पृष्टम्। अत्र प्रथमचकारेण अप्रयतोपहृतादिपरिग्रहः। तदाहाऽऽपस्तम्बः—'अप्रयतोपहृतमन्नमप्रयतमभोज्य'मिति। एवं वचनान्तराण्यपि स्मृत्यन्तरेषु द्रष्टव्यानि। द्वितीयचकारेण तु—'अमेध्यपतितचण्डालरजस्वलाकुनखिकुष्ठिसंस्पृष्ट'मिति शङ्खादिवचनबलात् चण्डालादिस्पृष्टपरिग्रहः॥ १६७—१६८॥

(मिता०) न स्वाध्यायविरोध्यर्थमित्यत आरभ्य ब्राह्मणस्य स्नातकव्रतान्यभिधायेदानीं द्विजातिधर्मानाह—

—अनर्चितमिति। उदक्येत्यादि च। अनर्चितं अर्चार्हाय यदवज्ञया दीयते। वृथामांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण देवाद्यर्चनावशिष्टं च यन्न भवति आत्मार्थमेव यत्साधितम्। केशकीटादिभिश्च समन्वितं संयुक्तम्। यत्स्वयमनम्लं केवलं कालपरिवासेन, द्रव्यान्तरसंसर्गकालपरिवासाभ्यां वाऽम्लीभवति तच्छुक्तदध्यादिव्यतिरेकेण। 'न पापीयसोऽन्नमश्नीयान्न द्विःपक्वं न शुक्तं न पर्युषितं अन्यत्र रागखाण्डवच्चुक्रदधिगुडगोधूमयवपिष्टविकारेभ्यः' इति शङ्खस्मरणात्। पर्युषितं रात्र्यन्तरितम्। उच्छिष्टं भुक्तोज्झितम्। श्वस्पृष्टं शुना स्पृष्टम्। पतितेक्षितं पतितादिभिरीक्षितम्। उदक्या रजस्वला तया स्पृष्टम्। उदक्याग्रहणं चण्डालाद्युपलक्षणार्थम्। 'अमेध्यपतितचण्डालपुक्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेत्' इति शङ्खस्मरणात्। को भुङ्क्ते इति यदाघुष्य दीयते तत्संघुष्टान्नम्। अन्यसंबन्ध्यन्यव्यपदेशेन यद्दीयते तत्पर्यायान्नम्। यथा—'ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्'॥ इति। पर्याचान्तमिति पाठे परिगतमाचान्तं गण्डूषग्रहणं यस्मिन्

तत्पर्याचान्तं तन्न भोक्तव्यम्। एतदुक्तं भवति—गण्डूषग्रहणादूर्ध्वं आचमनात्प्राक् न भोक्तव्यमिति। पार्श्वाचान्तमिति पाठे एकस्यां पङ्क्तौ पार्श्वस्थे आचान्ते न भोक्तव्यं भस्मोदकादिविच्छेदेन विना। वर्जयेदिति प्रत्येकं संबध्यते। तथा गोघ्रातं गवा आघ्रातम्। शकुनोच्छिष्टं शकुनेन काकादिना भुक्तमास्वादितम्। पदा स्पृष्टं बुद्धिपूर्वं पादेन स्पृष्टं वर्जयेत्॥ १६७—१६८॥

(वी० मि०) अत्र पर्युषिते प्रतिप्रसवमाह—

अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम्॥

अस्नेहा अपि गोधूमयवगोरसविक्रियाः॥ १६९॥

गोरसविक्रिया इत्यग्रे दर्शनादन्नपदमन्नाऽदनीयमात्रपरं, तेन सर्वं पर्युषितं चिरसंस्थितमपि घृतादिस्नेहाक्तं सद्भोक्तव्यमित्यर्थः। न केवलमेकराज्यन्तरितमेव भोज्यमपि तु द्वित्रादिराज्यन्तरितमपि स्नेहाक्तं भक्ष्यमिति चिरसंस्थितमित्यनेन दर्शयति। गोधूमादिविकारास्तु पर्युषिता अस्नेहाक्ता अपि भोज्याः। इदमुपलक्षणं शुक्तमपि दध्यादि भोक्तव्यम्।

दधि भक्ष्यं च शुक्तेषु यच्चैव दधिसम्भवम्।

इति बृहस्पतिवचनात्। अश्नीयादित्यनुवृत्तौ 'न द्विःपक्वं न शुक्तं न पर्युषितमन्यत्र रागखाण्डवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्य' इति शङ्खवचनाच्च।

पिप्पली शुण्ठीयुक्तश्च मुद्गयूपस्तु खाण्डवः।

रागखाण्डवतां याति शर्करासहितश्च सः॥

दध्याद्यतिरिक्तं च शुक्तं केवलमभक्ष्यं द्रव्यान्तरसंसृष्टं तु भक्ष्यमेव, 'शुक्तन्तु केवल'मिति गौतमवचनात्—इत्यपि द्रष्टव्यम्॥ १६९॥

(मिता०) पर्युषितस्य प्रतिप्रसवमाह—

अन्नमिति। अन्नमदनीयं पर्युषितं घृतादिस्नेहसंयुक्तं चिरकालसंस्थितमपि भोज्यम्। गोधूमयवगोरसविक्रियाः मण्डसक्तुकिलाटकूर्चिकाद्या अस्नेहा अपि चिरकालसंस्थिता भोज्याः, यदि विकारान्तरमनापन्नाः। 'अपूपधानाकरम्भसक्तु(१)यावकतैलपायसशाकानि शुक्तानि वर्जयेत्' इति वसिष्ठस्मरणात्॥ १६९॥

---

(१) सक्तुपाचकतैल० ख।

(वी० मि०) किञ्च--

सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ॥
औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥ १७० ॥
दैवतार्थं हविः शिग्रुं लोहितान् वश्चनांस्तथा ॥
अनुपाकृतमांसानि विड्जानि कवकानि च ॥ १७१ ॥
क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् ॥
सारसैकशफान् हंसान् सर्वांश्च ग्रामवासिनः ॥ १७२ ॥
कोयष्टिप्लवचक्राव्हबलाकावकविष्किरान् ॥
वृथा कृसरसंयावपायसाऽपूपशष्कुलीः ॥ १७३ ॥
कलविङ्कं सकाकोलं कुररं रज्जुदालकम् ॥
जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान् ॥ १७४ ॥
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ॥
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ॥ १७५ ॥

सन्धिनी वृषभेन सन्धियोग्या ऋतुमती, अनिर्दशा प्रसवानन्तरमनिःक्रान्तदशाहा, अवत्सा क्षीरपायित्वाऽपत्यरहिता । आसां गवां प्रत्येकं पयो वर्जयेत् न भक्षयेत् । गोरिति छान्दसत्वात्समासान्तविधेरनित्यत्वाद्वा समाधेयम् । एकवचनं जात्यभिप्रायम् । 'गोक्षीरमनिर्दशायाः सूतकेऽजामहिष्योश्चे'ति गौतमवचनादजामहिष्योरपि दशाहपर्यन्तं पयोऽभक्ष्यमिति द्रष्टव्यम् । पय इति तद्विकारस्याप्युपलक्षकम् ।

क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रं व्रतं कुर्यात्तेषु यत्परिकीर्त्तितम् ॥

इति भवदेवलिखितवचनात् । इदमेवाभिप्रेत्य परिवर्जयेदित्यत्र परीत्युपसर्गोपादानं कृतम् । औष्ट्रमुष्ट्रीभवं, ऐकशफं एकशफा वडवादयस्तत्प्रभवं, स्त्रैणं मानुषस्त्रीसम्भवम् । केचित्तु अजाव्यतिरिक्तद्विस्तनीपरं स्त्रीपदं, 'सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्ज'मिति शङ्खवचनादित्याहुः । आरण्याः चमरीमृग्यादयस्तत्सम्बन्धि आरण्यकम् ।

आरण्यानां च सर्वेषां मृगाणां महिषीं विना।

इति मनुः। अथशब्देन स्यन्दिनीयमलसूसन्धिनीनां च क्षीरमित्यादिनिषिद्धपयोऽन्तरसमुच्चयः। देवतार्थं होमनैवेद्याद्यर्थं हविः पुरोडाशादि, तच्च होमादेः प्राक् तदुत्तरं प्रतिपत्तेर्विहितत्वात्। शिग्रुः शोभाञ्जनः, लोहिता वृक्षनिर्यासा, अलोहिता अपि व्रश्चनप्रभवा वृक्षच्छेदनोद्भवाः, तथेत्यनेन चाऽयमेव भेदः स्पष्टीकृतः। तथा च मनुः—

लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा।

लोहितग्रहणात्कर्पूरहिङ्ग्वादीनामनिषेधः। अनुपाकृतं मांसं मन्त्रेणाऽप्रोक्षितस्य पशोर्मांसं, विड्जानि साक्षाद्विष्ठाभवानि तण्डुलीयकादानि, कवकानि छत्राकसदृशानि, क्रव्यादपक्षिणो गृध्रादयः, दात्यूहश्चातकः, चञ्चवा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनाद्याः, टिट्टिभः टिट्टिभ इति शब्दानुकारी, एकशफा अश्वादयः, ग्रामवासिनः पारावतादयः, कोयष्टिः कोचकः प्लवो जलकुक्कुटः,? चक्राव्हः चक्राङ्गः, बलाका अल्पबकी, नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादयो विशिष्य भक्ष्यत्वेनाऽविहिताः; कृसरः तिलमुद्गसाधितौदनः, संयावो घृतक्षीरगोधूमचूर्णसाधितः, पायसं परमान्नं, अपूपः तण्डुलादिचूर्णगुडसाधितः पूअ इति मिथिलादौ प्रसिद्धः, शष्कुली गोधूमविकारः स्नेहपक्वः, वृथा देवताद्यनुद्देशेन साधिताः। एतच्च कृसरादौ शष्कुल्यन्तेऽन्वेति। कलविङ्को ग्रामचटकः, काकोलो द्रोणकाकः तत्सहित इति कलविङ्कविशेषणं, तेन कलविङ्कं काकोलं चेति पर्यवस्यति। कुरर उत्क्रोशः, रज्जुदालको वृक्षकुक्कुटकः कठफोडा इति मध्यदेशे प्रसिद्धः, जालपादा जालाकारचरणाः शरारिप्रभृतयः। एवं च हंसादेः पृथगुपादानं निन्दातिशयार्थम्। अज्ञाताः जातितो रसवीर्यविपाकतो वाऽपरिचिताः। एतच्च मृगद्विजविशेषणम्। मृगाः आरण्यपशवो, द्विजाः पक्षिणः, चाषः किकीदिविः, रक्तपादाः कादम्बप्रभृतयः, सौनं प्राणिवधस्थानभवं मांसं, वल्लूरं शुष्कमांसं, मत्स्याः विशेषतो विहिताः सिंहतुण्डादिव्यतिरिक्ता विशिष्य स्मृत्यन्तरनिषिद्धा वा सर्वानेतान्वर्जयेदित्यन्वयः। अवर्जने प्रायश्चित्तमाह एतान्कामतः स्वतन्त्रेच्छया जग्ध्वा सोपवासो दिनत्रयं तिष्ठेत्। अकामतस्त्वेकाहम्। 'शेषपूपवसेदह'रिति मनुवचनात्। अत्र चकाराः परस्परसमुच्चयार्थाः। एवकारश्च परिवर्जयेदित्यत्राऽन्वितः॥१७०-१७५॥

(मिता०) सन्धिनीति । गौः या वृषेण सन्धीयते सा सन्धिनी 'वशां वन्ध्यां विजानीयाद्वृषाक्रान्तां च सन्धिनीम्' इति त्रिकाण्डीस्मरणात् । या चैकां वेलामतिक्रम्य दुह्यते, या च वत्सान्तरेण सन्धीयते सापि सन्धिनी । प्रसूता अनतिक्रान्तदशाहा अनिर्दशा । अवत्सा मृतवत्सा । सन्धिनी च अनिर्दशा च अवत्सा च सन्धिन्यनिर्दशावत्सास्ताश्च गावश्च तासां पयः क्षीरं परिवर्जयेत् । सन्धिनीग्रहणं स्यन्दिनीयमलस्वोरुपलक्षणार्थम् । यथाह गौतमः—'स्यन्दिनीयमलसूसन्धिनीनां च' इति । स्रवत्पयःस्तनी स्यन्दिनी । यमलसूर्यमलप्रसविनी । एवमजामहिष्योश्चानिर्दशयोः पयो वर्जयेत् । 'गोमहिष्यजानामनिर्दशानाम्' इति वसिष्ठस्मरणात् । पयोग्रहणात्तद्विकाराणामपि दध्यादीनां निषेधः । न हि मांसनिषेधे तद्विकाराणामनिषेधो युक्तः । विकारनिषेधे प्रकृतेरनिषे(१)धः । पयोनिषेधाच्छकृन्मूत्रादेरनिषेधः । उष्ट्राज्जातमौष्ट्रं पयोमूत्रादि । एकशफा वडवादयः तत्प्रभवमैकशफम् । स्त्रीभवं स्त्रैणम् । स्त्रीग्रहणमजाव्यतिरिक्तसकलद्विस्तनीनामुपलक्षणार्थम् । 'सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्जम्' इति शङ्खस्मरणात् । अरण्ये भवा आरण्यकास्तदीयमारण्यकं क्षीरं माहिषव्य(२)तिरेकेण । 'आरण्यानां च सर्वेषां मृगाणां माहिषं विना' इति वचनात् । अवेर्जातमाविकम् । वर्जयेदिति प्रत्येकमभिसम्बध्यते । औष्ट्रमित्यादिविकारप्रत्ययनिर्देशात्तद्विकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः । 'नित्यमाविकमेपेयमौष्ट्रमेकशफं च' इति गौतमस्मरणात् ॥ १७० ॥

(मिता०) देवतार्थमिति । देवतार्थं बल्युपहारनिमित्तं साधितम् । हविः हवनार्थं सिद्धं प्राक् होमात् । शिग्रुः सौभा(३)ञ्जनः । लोहितान् वृक्षनिर्यासान् । वृश्चनप्रभवान् वृक्षच्छेदनजातानलोहितानपि । यथाह मनुः—'लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा' इति । लोहितग्रहणात् हिङ्गुकर्पूरादीनामनिषेधः । अनुपाकृतमांसानि यज्ञेऽहुतस्य पशोर्मांसानि । विड्जानि मनुष्यादिजग्धबीजपुरीषोत्पन्नानि पुरीषस्थाने उत्पन्नानि तन्दुलीयकप्रभृतीनि च । कवकानि छत्रकाणि । वर्जयेदिति प्रत्येकमभिसम्बध्यते ॥ १७१ ॥

---

(१) रनिषेधो युक्त ख० । (२) व्यतिरिक्तम् क० । (३) शोभाञ्जनः क० ।

(मिता०) क्रव्यादेति । क्रव्यादा आममांसादनशीलाः । पक्षिणो गृध्रादयः । दात्यूहश्चातकः । शुकः कीरः । चञ्च्वा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनादयः । टिट्टिभस्तच्छब्दानुकारी । सारसो लक्ष्मणः । एकशफा अश्वादयः । हंसाः प्रसिद्धाः । ग्रामवासिनः पारावतप्रभृतयः । एतान्क्रव्यादादीन्वर्जयेत् ॥ १७२ ॥

(मिता०) कायेष्टीति । कोयष्टिः क्रौञ्चः । प्लवो जलकुक्कुटः । चक्राह्वश्चक्रवाकः । बलाकावकौ प्रसिद्धौ । नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादय एव गृह्यन्ते । लावकमयूरादीनां भक्ष्यत्वात्, ग्रामकुक्कुटस्य ग्रामवासित्वादेव निषेधाच्च । एतान्कोयष्ट्यादीन्वर्जयेत् । वृथा देवताद्युद्देशमन्तरेण साधिताः कृसरसंयावपायसाऽपूपशष्कुलीर्वर्जयेत् । कृसरं तिलमुद्गसिद्ध(१) ओदनः । संयावः क्षीरगुडघृतादिकृत उत्करिकाख्यः पाकविशेषः । पायसं पयसा शृतमन्नम् । अपूपः स्नेहपक्वगोधूमविकारः । शष्कुली स्नेहपक्वो गोधूमविकारः । 'न पचेदन्नमात्मने' इति कृसरादीनां निषेधे सिद्धे पुनरभिधानं प्रायश्चित्तगौरवार्थम् ॥ १७३ ॥

(मिता०) कलविङ्कामिति । कलविङ्को ग्रामचटकः । ग्रामनिवासित्वेन प्रतिषेधे सिद्धे सत्यु(२)भयचारित्वात्पुनर्वचनम् । काकोलो द्रोणकाकः । कुरर उत्क्रोशः । रज्जुदालको वृक्षकुट्टकः । जालपादो जालाकारपादः । अजालपादा अपि हंसाः सन्तीति हंसानां पुनर्वचनम् । खञ्जरीटः खञ्जनः । जातितो ये अज्ञाता मृगाः पक्षिणश्च । एतान्कलविङ्कादीन्वर्जयेत् ॥ १७४ ॥

(मिता०) चाषानिति । चाषाः किकीदिवयः । रक्तपादाः कादम्बप्रभृतयः । सूनिनां त्यक्तं सौनं वातस्थानभवं मांसं भक्ष्याणामपि । वल्लूरं शुष्कमांसम् । मत्स्या मीनाः । एतांश्चापादीन्वर्जयेत् । चकारान्नालिकाशणछत्राककुसुम्भादीन् । 'नालिकाशणछत्राककुसुम्भालाबुविड्भवान् । कुम्भी(३)कन्दुकवृन्ताककोविदारांश्च वर्जयेत्' ॥ इति, 'तथाऽकालप्ररूढानि पुष्पाणि च फलानि च । विकारवच्च यत्किंचित्प्रयत्नेन विवर्जयेत्' ॥ तथा-'वटप्लक्षाश्वत्थक(४)कपित्थनीपमातुलिङ्गफलानि वर्जयेत्' इति स्मरणात् । एतान् सन्धिनीक्षीरप्र-

(१) तिलमुद्गमिश्र ओदनः क० । (२) उभयपरत्वात् ख० ।
(३) कम्बुक क० । (४) दधित्थ क० ।

भृतीननुक्रान्तान् कामतो भक्षयित्वा त्रिरात्रमुपवसेत् । अकामतस्त्वहोरात्रम् । 'शेषेषूपवसेदहः' इति मनुस्मरणात् । यत्पुनः शङ्खेनोक्तम्-'वकबलाकाहंसप्लवचक्रवाककारण्डवगृहचटककपोतपारावतपाण्डुशुकसारिकासारसट्टिट्टिभोलूककङ्कुरक्तपादचाषभासवायसकोकिलशाङ्खालिकुक्कुटहारीतभक्षणे द्वादशरात्रमनाहरः पिबेद्गोमूत्रयावकम्' इति, तद्बहुकालाभ्यासे मतिपूर्वे समस्तभक्षणे वा वेदितव्यम् ॥ १७५ ॥

(वी० मि०) किञ्च—

पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ॥
लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत् ॥ १७६ ॥

पलाण्डुः लशुनानुकारी रक्तकन्दः पिआजुरिति मध्यदेशे प्रसिद्धः, विड्वराहो ग्राम्यशूकरः, छत्राकं छत्रसदृशं भूमिजं काष्ठजं वा(१), ग्रामकुक्कुटलशुने प्रसिद्धे, गृञ्जनं गाजर इति प्रसिद्धं, तस्य च पलाण्डुत्वेपि पुनरुपादानं गोवलीवर्दन्यायात्, लोके पलाण्डुत्वेनाऽप्रसिद्धेः । जग्ध्वा कामतः सकृद्भक्षयित्वा । कामतो भक्षणाभ्यासे तु मनुः—

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥

तथा—

अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ।
यतिचान्द्रायणं वापि शेषेषूपवसेदहः ॥

इदं चाऽमतिपूर्वकभक्षणाभ्यासपरम् । अमत्या सकृद्भक्षणे तु शङ्खः—'लशुनपलाण्डुगृञ्जनविड्वराहग्रामकुक्कुटकुम्भीकभक्षणे द्वादशरात्रं पयः पिबेत्' । 'छत्राकमित्यादि मनूक्तं मतिपूर्वकचिरतराभ्यासे, शङ्खोक्तं त्वमतिपूर्वाभ्यासे' इति तु मिताक्षरा ॥ १७६ ॥

(मिता०) पलाण्डुमिति । पलाण्डुः स्थूलकन्दनालो लशुनानुकारी । विड्वराहो ग्रामसूकरः । छत्राकं सर्पछत्रम् । ग्रामकुक्कुटः प्रसिद्धः । लशुनं रसोनं सूक्ष्मश्वेतकन्दनालम् । गृञ्जनं लशुनानुकारिलोहितसूक्ष्मकन्दम् । एतानि षट् सकृत्कामतो जग्ध्वा भक्षयित्वा चान्द्रायणं वक्ष्यमाणलक्षणं चरेत् । ग्रामकुक्कुटछत्राकयोः पूर्व(२)प्रति-

(१) च—इति ख० पु० पाठः । (२) प्रतिषिद्धयोः क० ।

पेधितयोरिहाभिधानं पलाण्ड्वादिसमानप्रायश्चित्तार्थम्। मतिपूर्वं चिरतराभ्यासे तु—'छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्। पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः' ॥ इति (५।१९) मनूक्तम्। अमतिपूर्वाभ्यासे—'अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सान्तपनं चरेत्'। तृतीयाध्याये वक्ष्यमाणं—'यतिचान्द्रायणं वापि' इति द्रष्टव्यम्। अमतिपूर्वाभ्यासे तु शङ्खोक्तं—'लशुनपलाण्डुगृञ्जनविड्वराहग्रामकुक्कुटकुम्भीकभक्षणे द्वादशरात्रं पयः पिबेत्' इति ॥ १७६ ॥

(वी० मि०) अपि च—

भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्य(१)काः ॥
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥ १७७ ॥
तथा पाठीनराजीवसशल्काश्च द्विजातिभिः ॥

सेधादयः पञ्चैव पञ्चनखा द्विजातिभिर्भक्ष्याः। सेधा शल्लकीसदृशः, गोधा स्थलचारिणी सनगोह इति मध्यदेशे प्रसिद्धा, कच्छपः कूर्मः, शल्यकः सेही इति प्रसिद्धा, (२)शशः प्रसिद्धः, चकारेण खड्गिपरिग्रहः।

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेषु राघव।
शशकः शल्लकी गोधा कूर्मः खड्गी च पञ्चमः ॥

इति रामायणवचनात्। 'खड्गे तु विवदन्त्येके' इति शङ्खवचनं तु चतुर्नखखड्गविषयम्। 'आद्धादान्यत्रे'ति तु मिताक्षरा। मत्स्येष्विति निर्द्धारणे सप्तमी। अपिशब्देन पञ्चनखेषु इति पूर्ववाक्यार्थघटकमवधारणं समुच्चीयते। हिशब्देन निश्चयार्थेन मत्स्यानां सामान्यतएवाभक्ष्यत्वमिति दाक्षिणात्याभिधानादिमूलशङ्काव्युदासः। सिंहतुण्डा अलिप्रभृतयः, रोहित ईषल्लोहितवर्णो रोहु इति प्रसिद्धः, पाठीनः सहस्रदंष्ट्रः, राजीवो राजियुक्तः राइखट् इति ख्यातः, सशल्काः शल्को मत्स्यानां स्थूलरोम खुलिचा इति प्रसिद्धः, तद्युक्ताः शफरादयः।

उक्तमेतत्तु सर्वेषां भक्ष्याभक्ष्यमशेषतः।
वर्णानां सानुलोमानां सस्त्रीणां च विशेषतः ॥

अत्र सशल्कपदेनैव प्राप्तस्य रोहितस्य पृथगुपादानं पाविज्या-

---

(१) शल्लकाः—इति मुद्रितपुस्तके पाठः। (२) शशः प्रसिद्धः—इति क० पुस्तके नास्ति।

तिशयज्ञापनार्थम् ॥

(वी० मि०) इह मत्स्यमांसयोर्भक्षणे विधिनिषेधावुक्ताविति परस्परविरोधमाशङ्कमानानन्तेवासिनः सम्यक् बोधितुं व्यवस्थामाह—

अतः शृणुध्वं मांसस्य विधिं भक्षणवर्जने ॥१७८॥
प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ॥
देवान् पितॄन् समभ्यर्च्य खादन्मांसं न दोषभाक् ॥१७९॥
वसेत्स नरके घोरे दिनानि पशुरोमभिः ॥
संमितानि दुराचारो यो हन्त्यविधिना पशून् ॥ १८० ॥
सर्वान्कामानवाप्नोति हयमेधफलं तथा ॥
गृहेऽपि निवसन्विप्रो मुनिर्मांसविव(?)र्जनात् ॥ १८१ ॥

भक्षणे वर्जने च विधिं प्रकारमतः परं शृणुध्वं, तत्र प्रथमतो भक्षणप्रकारमाह प्राणात्यये इति श्लोकेन। भक्षव्यतिरेकेण मांसभक्षणनिवर्त्तनीयव्याधिवशेन प्राणात्यये संभाविते। श्राद्धे श्राद्धनियोगे। तथाशब्देन प्राणात्यय इव श्राद्धनियोगे भोजनावश्यकत्वं दर्शयति। तथा च (२) मनुः—

नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥

प्रोक्षितं पशुयागाद्यर्थं प्रोक्षितस्य पशोः सम्बन्धि च, अभक्षणे यागवैगुण्यात्। द्विजकाम्यया प्रत्याख्येयब्राह्मणानुरोधेन। इदं च सकृदेव 'सकृद्ब्राह्मणकाम्यये'ति यमवचनात्। देवान्पितॄन् वा समभ्यर्च्य च मांसवर्जनसङ्कल्पाभावे मांसं खादन्न दोषभाग्भवति गृहीतसङ्कल्पस्तेष्वपि निमित्तेषु मांसं भक्षयन्दुष्यति। यथाह यमः—

भक्षयेत्प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया।
दैवे नियुक्तं श्राद्धे वा नियमे तु विवर्जयेत् ॥

भृत्यभरणावशिष्टं च मांसं देवपित्रर्चनावशिष्टवद्भक्ष्यमेव।

तथा च मनुः—

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः।

---

(१) विसर्जनात्—इति क० पु० पाठः। (२) तथा च—इति ख० पुस्तके नास्ति।

भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा ॥

वध्या इत्येननाऽष्टविधं घातनमनुज्ञातं, पूर्वं वृथामांसपदेनैतन्निमित्तविनाकृतं मांसं वर्ज्यमुक्तमित्यावरोध इत्यभिप्रेत्याह वसेदित्यादि । अविधिना शास्त्रानुमतनिमित्तव्यतिरेकेण यो हन्ति स दुराचारः पशुरोमसमसङ्ख्यानि दिनानि नरके वसेदित्यर्थः । हन्तीत्यनेन भोजननपि विवक्षितम् ।

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥

इति मनुवचनात् । विहितस्यापि मांसभक्षणस्य वर्जने फलमाह सर्वानित्यादिना । सर्वानश्वमेधफलातिरिक्तान् कामान् अभिलषितार्थान् अश्वमेधफलं चाप्नोति । गृहस्थोऽपि सन्मांसस्य विधिवद्य सङ्कल्पपूर्वकं वर्जनात् मुनितुल्यो वानप्रस्थतुल्यो भवतीत्यर्थः ॥ १७७-१८१ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने भक्ष्याभक्ष्यप्रकरणम् ॥

(मिता०) भक्ष्या इति । तथेति च । सेधा श्वावित् । गोधा कृकलासानुकारिणी महती । कच्छपः कूर्मः । शल्लकः शल्लि(१)की । शशः प्रसिद्धः । पञ्चनखादीनां श्वमार्जारवानरादीनां मध्ये एते सेधादयो भक्ष्याः । चकारात्खड्गोऽपि । यथाह गौतमः—'पञ्चनखाः शशशल्लकश्वाविद्गोधाखड्गकच्छपाः' इति । यथाह मनुरपि-'श्वाविधं शल्लि(२)कं गोधां खड्गकूर्मशशांस्तथा । भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः' ॥ इति । यत्पुनर्वसिष्ठेन 'खड्गे तु विवदन्ते' इत्यभक्ष्यत्वमुक्तं तच्छ्राद्धादन्यत्र । 'खड्गमांसैर्भवेद्दत्तमक्षय्यं पितृकर्मणि' इति श्राद्धे फलश्रुतिदर्शनात् । तथा मत्स्यानां मध्ये सिंहतुण्डादयो भक्ष्याः । सिंहतुण्डः सिंहमुखः । रोहितो लोहितवर्णः । पाठीनश्चन्द्रकाख्यः । राजीवः पद्मवर्णः । सह शल्लकैः शुक्त्याकारैर्वर्तत इति सशल्कः । एते च सिंहतुण्डादयो नियु(३)क्ता एव भक्ष्याः । 'पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः । राजीवाः सिंहतुण्डाश्च सशल्काश्चैव सर्वशः' ॥ इति (५।१६) मनुस्मरणात् । द्विजातिग्रहणं शूद्रव्युदासार्थम् ॥ १७७ ॥

---

(१) शालुकः शाली । (२) शल्यकम् । (३) नियुक्तस्यैव क० ।

(मिता०) अनर्चितं वृथामांसमित्यारभ्य द्विजातिधर्मानुक्त्वेदानीं (१)चातुर्वर्ण्यधर्मानाह—

अत इति । मांसस्य प्रोक्षितादेर्भक्षणे तद्व्यतिरिक्तस्य च निषिद्धस्य वर्जनं प्रोक्षितादिव्यतिरेकेण मांसं न भक्षयामीत्येवं सङ्कल्परूपेण विधिं सामश्रवःप्रभृतयः हे मुनयः शृणुध्वम् ॥ १७८ ॥

(मिता०) तत्र भक्षणे विधिं दर्शयति—

प्राणात्यय इति । अन्नाभावेन व्याध्यभिभवेन वा मांसभक्षणमन्तरेण यदा प्राणबाधा भवति तदा मांसं नियमेन भक्षयेत् । 'सर्वत एवात्मानं गोपायेत्' इत्यात्मरक्षाविधानात् । 'त(२)स्मादुह न पुरायुषः स्वःकामी प्रेयात्' इति मरणनिषेधाच्च । तथा श्राद्धे मांसं निमन्त्रितो नियमेन भक्षयेत् । अभक्षणे दोषश्रवणात् । 'यथाविधि नियुक्तस्तु यो मांसं नात्ति मानवः । स प्रेत्य पशुतां याति संभवानेकविंशतिम्' ॥ इति मनुस्मरणात् । प्रोक्षणाख्यश्रौतसंस्कारसंस्कृतस्य पशोर्यागार्थस्याग्नीषोमीयादेर्हुतावशिष्टं मांसं प्रोक्षितं तद्भक्षयेत् । अभ(३)क्षणे यागानिष्पत्तेः । द्विजकाम्यया ब्राह्मणभोजनार्थं च यत्साधितं तेन तानभ्यर्च्यावशिष्टं भक्षयन्न दोषभाग्भवति । एवं भृत्यभरणावशिष्टमपि । 'यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः । भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पु(४)त्पुरा' ॥ इति (५।२२) मनुस्मरणात् । न दोषभागिति दोषाभावमात्रं वदता अतिथ्यादयर्चनावशिष्टस्याभ्यनुज्ञामात्रं न प्रोक्षितादिवन्नियम इति दर्शितम् । एवमप्रतिषिद्धानामपि शशादीनां प्राणात्ययव्यतिरेकेणाभक्ष्यत्वावगमात् शूद्रस्यापि मांसप्रतिबद्धः सर्वविधिनिषेधाधिकारोऽवगम्यते ॥१७९॥

(मिता०) इदानीं प्रोक्षितादिव्यतिरिक्तस्य वृथामांसमित्यनेन प्रतिषिद्धस्य भक्षणे निन्दार्थवादमाह—

वसेदिति । अविधिना देवताद्युद्देशमन्तरेण यः पशून् हन्ति स तस्य पशोर्यावन्ति रोमाणि तावन्ति दिनानि घोरे नरके वसेत् । हन्तीत्यष्टविधोऽपि घातको गृह्यते । यथाह मनुः—(५ ५१) 'अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः' ॥ इति ॥ १८० ॥

---

(१) चातुर्वर्ण्यं प्रत्याह क० । (२) तस्मादिह ख० । (३) अभक्षणायागा० ख० ।
(४) ह्याचरत्तथा ख० ।

(मिता०) इदानीं वर्जने विधिमाह—

सर्वानिति। यः प्रोक्षितादिव्यतिरेकेण मया मांसं न भक्षितव्यमिति सत्यसङ्कल्पो भवति स सर्वान्कामान् प्रवृत्तो निर्विघ्नं प्राप्नोति विशुद्धाशयत्वात्। यथाह मनुः—(५४७) 'यद्ध्यायते यत्कुरुते रतिं बध्नाति यत्र च॥ तदवाप्नोत्यविघ्नेन यो हिनस्ति न किञ्चन'॥ इति। एतच्च सांवत्सरिकसङ्कल्पस्य। 'वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोः पुण्यफलं समम्' ॥ इति (५।५३) मनुस्मरणात्। तथा गृहेऽपि निवसन्ब्राह्मणादिश्चातुर्वर्णिको मुनिवन्माननीयो भवति मांसत्यागात्। एतच्च न प्रतिषिद्धमांसविषयं नापि प्रोक्षितादिविषयम्, किंतु (१)पारिशेष्यादतिथ्यार्चनावशिष्टाभ्यनुज्ञातविषयमिति॥ १८१॥

इति भक्ष्याभक्ष्यप्रकरणम्।

(वी० मि०) अथ वर्णाश्रमे(२)तराणां धर्मः प्रायशो द्रव्यशुद्धिनिबन्धन इत्यनेनाचमनरूपो धर्मः शुद्धिहेतुरपीत्यनेन वा प्रसङ्गेन सौवर्णरजतादीनामपि द्रव्याणां शुद्धिहेतून् स्वभावशुद्धिं चाऽभिदधान इवाचमनरूपं धर्ममाह 'सौवर्णराजताञ्जाना'मित्यादिना 'पक्वेष्टकाचितानि चे'त्यन्तेन शुद्ध्यभिधानबाहुल्याल्लब्धशुद्धिप्रकरणाभिधानेन प्रकरणेन—

सौवर्णराजताञ्जानामूर्ध्वपात्रग्रहाश्मनाम्॥
शाकरज्जुमूलफलवासोविदलचर्मणाम्॥ १८२॥
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते॥

सौवर्णराजते सुवर्णरजतविकारौ, अञ्जं शङ्ख्युक्त्यादि, ऊर्ध्वपात्रं यज्ञियं द्रोणकलशोलूखनादि ग्रहसाहचर्यात्, ग्रहाः षोडशिप्रभृतयो यज्ञपात्रविशेषाः, अश्मा पाषाणः, शाको वास्तुकादिः, रज्जुर्वल्वजादिरचिता, विदलं वंशादि, विदलचर्मणी तन्निर्मितछत्र-

---

(१) परिशेषात् ख०।

(२) वर्णाश्रमेतराणामित्यारभ्य प्रसङ्गेनेत्यन्तं क० पुस्तके नास्ति।

भस्त्रादेरप्युपलक्षणं, पात्राणि प्रोक्षणीपात्रादीनि, चमसा होतृचमसादयो यज्ञपात्रविशेषाः। एषामुच्छिष्टस्य घृतादिस्नेहस्य वा लेपाभावे केवलेन वारिणा क्षालनाच्छुद्धिः॥

चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा॥ १८३॥

चरुः स्थाली, स्रुक् जुह्वादिः, स्रुवः प्रसिद्धः, सस्नेहानि आज्यादिलिप्तानि पात्राणि आज्यपात्रादीनि। एतान्युच्छिष्टलेपरहितानि उष्णोदकेन क्षालनात् शुद्ध्यन्तीति शेषः। सलेपानां तु—

तैजसानां मणीनां च सर्वस्याश्ममयस्य च।
भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः॥

इति मनूक्ता शुद्धिः। अत्र मृद्भस्मनोर्विकल्प एकार्थत्वात्। जलेन तु समुच्चयः, व्यापारभेदात्॥ १८२-१८३॥

(मिता०) इदानीं द्रव्यशुद्धिमाह—

सौवर्णेति। पात्राणामिति च। सौवर्णं सुवर्णकृतम्। अब्जं मुक्ताफलशङ्खशुक्त्यादि। ऊर्ध्वपात्रं यज्ञियोलूखलादि, ग्रहादिसाहचर्यात्। ग्रहाः पोड(१)शिप्रभृतयः। अश्मा ह्युपदादिः। शाकं वास्तुकादि। रज्जुः वल्वजादिनिर्मिता। मूलमार्द्रकादि। फलमाम्रादि। वासो वस्त्रम्। विदलं वैणवादि। चर्म अजादीनाम्। विदलचर्मणोर्ग्रहणं तद्विकाराणां छत्रवस्त्रादीनामुपलक्षणार्थम्। पात्राणि प्रोक्षणीपात्रप्रभृतीनि। चमसा होतृचमसादयः। एतेषां सौवर्णादीनां लेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणा प्रक्षालनेन शुद्धिः। चरुश्चरुस्थाली। स्रुक्स्रुवौ प्रसिद्धौ। सस्नेहानि पात्राणि प्राशित्रहरणादीनि। एतानि च लेपरहितान्युष्णेन वारिणा शुध्यन्ति। 'निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति। अब्जमश्ममयं चैव राजतं चानुपस्कृतम्'॥ इति (५।११२) मनुस्मरणात्। अनुपस्कृतमखातपूरितम्। सलेपानां तु—'तैजसानां मणीनां च सर्वस्याश्ममयस्य च। भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः'॥ इति (५।१११) मनूक्तं द्रष्टव्यम्। मृद्भस्मनोरेककार्यत्वाद्विकल्पः। आपस्तु समुच्चीयन्ते। काकादिमुखापघाते तु—'कृष्णशकुनिमुखा(२)वमृष्टं पात्रं निर्लिखेत्, श्वापदमुखावमृष्टं पात्रं न प्रयुञ्जीत' इति द्रष्टव्यम्। एतच्च मार्जारा-

(१) षोडशी यज्ञियपात्रविशेषः। (२) मुखावघृष्टं ख०।

दन्यत्र । 'मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः' । इति मनुस्मरणात् ॥१८२-१८३॥

स्फ्यशूर्पाऽजिनधान्यनां मुसलोलूखलाऽनसाम् ॥
प्रोक्षणं संहतानां च बहूनां धान्यवाससाम् ॥ १८४ ॥

(वी०मि०) स्फ्यः खादिरखड्गः, शूर्पं प्रसिद्धं, अजिनं चर्म, तदतिरिक्तस्य शुद्ध्यन्तरकथनात् । धान्यं व्रीह्यादि यज्ञियं स्वल्वपि, मुसलोलूखले प्रसिद्धे, अनः शकटं, संहतं राशीकृतं, बहु अनेकपुरुषोद्वाह्यं यद्धान्यं वासश्चायज्ञियमपि, एषां प्रोक्षणं शुद्धिहेतुः । तदाह बौधायनः—'चण्डालादिस्पर्शेऽनेकपुरुषहार्याणां प्रोक्षणम्' । अत्र मिताक्षरायां व्यवस्थान्तरम् । तथा हि—यदा धान्यानि वस्त्राणि च राशीकृतानि तत्र चण्डालादिस्पृष्टान्यल्पानि अस्पृष्टानि बहूनि तदा स्पृष्टानामुक्तैव शुद्धिरस्पृष्टानां तु प्रोक्षणाच्छुद्धिः । यदा पुनः स्पृष्टानि बहूनि अल्पान्यस्पृष्टानि तदा सर्वेषामेव क्षालनम् । यदा पुनः स्पृष्टानामस्पृष्टानां च तुल्यता तदा प्रोक्षणमेव । इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव । पाक्षिकस्यापि दोषस्य परिहर्तव्यत्वादिति लिखितानि तत्रैव तदव्यवस्थायां कानिचिद्वचनानीति ॥ १८४ ॥

(मिता०) यज्ञपात्रादीनां प्रोक्षणेन शुद्धिः—

स्फ्यशूर्पेत्यादि । स्फ्यो वज्रो यज्ञाङ्गम् । अनः शकटम् । शेषं प्रसिद्धम् । एतेषामुष्णेन वारिणा शुद्धिः । पुनरजिनग्रहणं यज्ञाङ्गाजिनप्राप्त्यर्थम् । संहतानामशुद्धिद्रव्या(१)रब्धावयविनां बहूनां धान्यानां वाससां च । वासोग्रहणमुक्तशुद्धीनामुपलक्षणार्थम् । उक्तशुद्धीनां धान्यवासःप्रभृतीनां बहूनां राशीकृतानां प्रोक्षणेनैव शुद्धिः । बहुत्वं च स्पृष्टापेक्षया । एतदुक्तं भवति—यदा धान्यानि वस्त्रादीनि वा राशीकृतानि तत्र चण्डालादिस्पृष्टान्यल्पानि बहूनि चास्पृष्टानि तत्र स्पृष्टानामुक्तैव शुद्धिरितरेषां प्रोक्षणमिति । तथा च स्मृत्यन्तरम्—'वस्त्रधान्यादिराशीनामेकदेशस्य दूषणात् (२) । तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति' ॥ इति । यदा पुनः स्पृष्टानां बहुत्वं अस्पृष्टानां चाल्पत्वं तदा सर्वेषामेव क्षालनम् । यथाह मनुः (५।११८)—'अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् । प्रक्षालनेन त्वल्पानामद्भिः शौचं विधी-

(१) द्रव्याणा बहूना ख० । (२) दूषणे—इति मुद्रितपुस्तक पाठः ।

यते' । इति । स्पृष्टानामस्पृष्टानां च समत्वेऽपि प्रोक्षणमेव । बहूनां प्रोक्षणविधानेनाल्पानां क्षालने सिद्धे पुनरल्पानां क्षालनवचनस्य समेषु (१)क्षालननिवृत्त्यर्थत्वात् । इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव । पाक्षिकस्यापि दोषस्य परिहर्तव्यत्वात् । अनेकपुरुषैर्धार्यमाणानां तु धान्यवासःप्रभृतीनां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेवेति निबन्धकृतः ॥ १८४ ॥

तक्षणं दारुशृङ्गास्थ्नां गोवालैः फलसम्भुवाम् ॥
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥ १८५ ॥

दारु काष्ठं, शृङ्गं मेषमहिषादिसम्बन्धि, अस्थि करिवराहादिसम्बन्धि । अस्थिपदं दन्तादेरप्युपलक्षकमिति मिताक्षरा । एषां मूत्रादिभिरेकदेशोपघाते तक्षणमुपहतभागमात्रस्याऽपनयनं शुद्धिहेतुः । सम्पूर्णोपघाते तु यमः—

अलाबुदारुपात्राणां वैदलानां तथैव च ।
अत्यन्तोपहतानां च परित्यागो विधीयते ॥

फलसम्भुवां विल्वालाबुप्रभृतिफलनिष्पन्नानां पात्राणामुच्छिष्टाद्युपघाते गोवालैर्गोपुच्छवालैर्घर्षणाच्छुद्धिः । तेषां च मूत्रादिभिरेकदेशोपघाते वायुपुराणम्—

तथा चर्मास्थिदारूणां शृङ्गाणां चावलेखनम् ।

मूत्रादिना सम्पूर्णोपघाते तु प्राग्लिखितयमवचनात्परित्याग एव । यज्ञकर्मणि विनियुज्यमानानां यज्ञपात्राणां स्रुवादीनां पाणिना मार्जनं लेपापकर्षणं शुद्धिहेतुस्तदनन्तरं चोष्णोदकेन क्षालनं प्रागभिहितमिति शूलपाणिः । प्रक्षालनेन शुद्धानां दर्भैर्दशापवित्रेण वा यथा शास्त्रं मार्जनं संस्कारार्थमिति मिताक्षरा ॥ १८५ ॥

(मिता०) निर्लेपानां स्पर्शमात्रदुष्टानां शुद्धिमुक्त्वेदानीं सलेपानां शुद्धिमाह—

तक्षणमिति । दारूणां मेषमहिषादिशृङ्गाणां करिवाराहशङ्खास्थ्नाम् । अस्थिग्रहणेन दन्तानामपि ग्रहणम् । उच्छिष्टस्नेहादिभिर्लिप्तानां मृद्भस्मोदकादिभिरनपगतलेपानाम् । (मनुः ५ । १२६)—'यावन्नापैत्यमेध्यानां गन्धो लेपश्च तत्कृतः । तावन्मृद्वारि चादेयं स-

(१) क्षालनवचननिवृ० ख० ।

र्वासु द्रव्यशुद्धिषु' ॥ इति सामान्यतः शुद्धिविधानात्। तक्षणं तावन्मा-
त्रावयवापनयनं शुद्धिः। फलसम्भवां विल्वालाबुनालिकेरादिफल-
सम्भूतानां पात्राणां गोवालैरुद्घर्षणाच्छुद्धिः। यज्ञपात्राणां स्रुक्स्रुवा-
दीनां यज्ञकर्मणि प्रयुज्यमानानां दक्षिणेन हस्तेन दर्भैर्दशापवित्रेण
वा यथाशास्त्रं कर्माङ्गतया मार्जनं कर्तव्यम्। एतच्च श्रौतमुदाहरण-
मन्येषामपि सौवर्णादीनां पात्राणां स्मार्तलौकिककर्मसु कृतशौचा-
नामेवाङ्गत्वमिति दर्शयितुम्। यज्ञाङ्गानां पुनः कृतशौचानामिदं दशा-
पवित्रादिभिर्मार्जनं संस्कारार्थमिति विशेषः ॥ १८५ ॥

सोषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकम् ॥
सश्रीफलैरंशुपट्टैः सारिष्टैः कुतपं तथा ॥ १८६ ॥

सगौरसर्षपैः क्षौमं पुनः पाकेन(१)मृण्मयम् ॥

(वी० मि०) ऊषः क्षारमृत्तिका तत्सहितैरुदकैर्लेपाधिक्ये गोमू-
त्रैर्वा। आविकमूर्णामयं, कौशिकं कोशप्रभवं त्रसरपट्टादि क्षाल-
नेन शुद्ध्यति। अंशुपट्टमतसीभिन्नघल्कलतन्तुनिर्मितं, सश्रीफलैर्वि-
ल्वफलसहितैरुदकगोमूत्रैः कुतपः कम्बलविशेषश्छागलोमनिर्मितः,
अरिष्टफलफेणकयुक्तैरुदकगोमूत्रैः। क्षुमाऽतसी तत्सूत्रनिर्मितं श्वेत-
सर्षपपिष्टसहितैरुदकगोमूत्रैः शुद्ध्यति। इदं चात्यन्तोपघाते। अ-
न्यथा तु देवलः—

ऊर्णापट्टांशुकक्षौमदुकूलानां च कर्षणात्।
अल्पाशौचे भवेच्छुद्धिः शोषणप्रोक्षणादिभिः ॥
तान्येवाऽमेध्यलिप्तानि निर्णिज्यात् क्षारगर्षणैः।

अत्र 'क्षालयेच्छोधनैः स्वकैः'।

धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपि।

इति लिखितं मिताक्षरायाम्। मृण्मयं च भाण्डं पुनरग्निपक्वेन शु-
द्ध्यति। एतच्चोच्छिष्टाद्युपघाते तु म(२)नुः—

मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः।
संस्पृष्टं नैव शुद्ध्येत पुनःपाकेन मृण्मयम् ॥

---

(१) पुनःपाकान्मही मयम्—इति मुद्रित पुस्तके पाठः।
(२) यमः—इति क० पु० पाठः।

अत्रैव देवलः—

तूलिकामुपधानं च पुष्परक्ताम्बरं तथा।
शोषयित्वातपे किञ्चित्करैः संमार्जयेन्मुहुः॥
पश्चात्तु वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि।
तान्यप्यतिमलिष्टानि यथावत्परिशोधयेत्॥

(वी० मि०) स्वभावशुद्धिमाह—

कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखं तथा॥ १८७॥

कारुः शिल्पी मालाकारनापितादिस्तद्धस्तः प्रक्षालनादिहेतूपनिपातेऽपि विनैव प्रक्षालनादिकं शुचिस्तत्तत्कर्मार्हः। पण्यं विक्रयदेशे प्रसारितं विक्रेयं सिद्धान्तव्यतिरिक्तं यवव्रीह्यादि अशुचिस्पृष्टमपि शुचि। भैक्षं भिक्षासमूहस्तद्द्रव्याक्रमणेऽपि शुचि।

ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति स्थितिः।

इति मनुः। योषिन्मुखं रतिकाले शुचि 'स्त्रीमुखं रतिचुम्बने' इति पैठीनसिवचनात्। योषित् स्वकीया भार्या। तथाशब्देन—

अदोषं च मुखं स्त्रीणां गवां पृष्ठमजामुखम्।
एतानि नित्यशुद्धानि यच्च वाचा प्रशस्यते॥

इति यमबोधितगोपृष्ठादिसमुच्चयः॥ १८६-१८७॥

(मिता०) इदानीं सलेपानामेव केषांचिल्लेपापकर्षणे विशेष(१)हेतूनाह—

सोषैरिति। ऊषरमृत्तिकासहितेन गोमूत्रेणोदकेन वा लेपापेक्षया। आविकमूर्णामयम्, कौशिकं कौशप्रभवं तसरीपट्टादि, प्रक्षालितं शुद्ध्यति। उदकगोमूत्रैरिति बहुवचनं पश्चादप्युदकप्राप्त्यर्थम्। अंशुपट्टं वल्कलतन्तुकृतम्। सश्रीफलैर्विल्वफलसहितैः। कुतपः पार्वतीयच्छागरोमनिर्मितकम्बलः,—अरिष्ट(२)सहितैरुदकगोमूत्रैः शुद्ध्यतीत्यनुवर्तते। एतच्चोच्छिष्टस्नेहादियोगे सति वेदितव्यम्। अल्पोपघाते तु प्रोक्षणादि क्षालनासहत्वात्। सर्वत्र द्रव्याविनाशेनैव शुद्धेरिष्टत्वात्। तथा च देवलः—'ऊर्णाकौशेयकुतपपट्टक्षौमदुकूलजाः। अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः' ॥ इत्यभिधायाह—'तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः। धान्यकल्कैस्तु फलजै रसैः

(१) हेतुलक्षणेनाह क०। (२) अनिष्टफलसहितैः ख० अरिष्टसहितैः फेनकसहितैः क०।

क्षारानुगैरपि' ॥ इति । क्षौमवदेव शाणस्य समानयोनि(१)त्वात् । ऊर्णादिग्रहणं तदारब्धतूलिकादिप्राप्त्यर्थम् । अतस्तस्याल्पोपघाते-नैव क्षालनं कार्यम् । अमेध्यलेपादन्यत्र—'तूलिकामुपधानं च पुष्प-रक्ताम्बरं तथा । शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः ॥ पश्चा-च्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि । तान्यष्यतिमलिष्ठानि य-थावत्परिशोधयेत्' ॥ इति देवलस्मरणात् । पुष्परक्तानि कुङ्कुमकु-सुम्भादिरक्तानि । पुष्परक्तग्रहणमन्यस्यापि हरिद्रादिरक्तस्य क्षालना-सहस्य प्राप्त्यर्थं न मञ्जिष्ठादेः, तस्य क्षालनसहत्वात् । शङ्खनाप्यु-क्तम्—'रागद्रव्याणि प्रोक्षितानि शुचीनि' इति ॥ १८६ ॥

(मिता०) सगौरेति । गौरसर्षपसहितैरुदकैर्गोमूत्रैः क्षौमं क्षुमा अतसी तत्सूत्रनिर्मितं पटादि शुद्ध्यति । पुनःपाकेन मृण्मयं घटादि । एतच्चोच्छिष्टस्नेहलेपे वेदितव्यम् । मनुः (५।१२३)—'(२)मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः । संस्पृष्टं नैव शुद्ध्येत पुनःपाकेन मृण्मयम्' ॥ इति स्मरणात् । चण्डालाद्युपघाते तु त्याग एव । यथाह पराशरः—'चण्डालाद्यैस्तु संस्पृष्टं धान्यं वस्त्रमथापि वा । प्रक्षालनेन शुद्ध्येत परित्यागान्महीमयम्' ॥ इति । कारवो रजकचैलधावकसूप-काराद्यास्तेषां हस्तः सदा शुचिः । शुचित्वं तत्साध्ये कर्मणि । वस्त्र-धावनादौ सूतकादिसम्भवेऽपि । तथा च स्मृत्यन्तरम्—'कारवः शिल्पिनो वैद्या दास्यो दासास्तथैव च । राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः' ॥ इति । पण्यं पणार्हं विक्रेयं यवव्रीह्यादि । अने-क्रेतृजनकरपरिघट्टितमप्यप्रयतं न भवति । सूतकादिनिमित्तेन च वणिजाम् । भिक्षाणां समूहो भैक्षं तद्ब्रह्मचार्यादिहस्तगतं अनाचान्त-स्त्रीप्रदानाऽशुचिरथ्याक्रमणादिना निमित्तेनापि न दुष्यति । तथा योषिन्मुखं संभोगकाले शुचि । 'स्त्रियश्च रतिसंसर्गे' इति स्मर-णात् ॥ १८७ ॥

भूशुद्धिर्मार्जनाद्दाहात्फालाद्गोक्रमणात्तथा ॥
सेकादुल्लेखनाल्लेपाद् गृहं मार्जनलेपनात् ॥ १८८ ॥

मार्जनमवकरापनयनं, दाहः परितोऽग्निसंयोगः, कालो यावता कालेनाऽपाविद्यहेतुलेपक्षयो भवति तावान्, गोक्रमणं गवां पाद-

---

(१) योगत्वात् ख० । (२) मद्यमूत्रपुरीषैश्च श्लेष्मपूयाश्रशोणितैः क० ।

परिघट्टनं, सेको वृष्टिजलेन क्षालनं, उल्लेखनं तक्षणं, लेपो गोमयाद्युपलेपनम् । एतैर्मार्जनादिभिर्व्यस्तैः समस्तैर्वा भूमेः शुद्धिः ।

तथा हि, भूमिस्तावत्त्रिविधाअमेध्या दुष्टा मलिना चेति । तत्राऽमेध्याया दहनादिभिः पञ्चभिश्चतुर्भिर्वा, दुष्टाया दहनादिभिस्त्रिभिः खननोपलेपनाभ्यां वा, मलिनायास्तूपलेपेनैकेन शुद्धिः । तदाह देवलः—

पञ्चधा वा चतुर्धा वा भूरमेध्या विशुद्ध्यति ।
दुष्टा द्विधा त्रिधा वापि शोध्यते मलिनैकधा ॥
दहनं खननं भूमेरुपलेपनवापनम् ।
पर्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम् ॥

अमेध्यादिस्वरूपमाह स एव—

प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः ।
चण्डालैरुषितं यत्र यत् विन्यस्यते शवः ॥
विण्मूत्रोपहतं यत्र कुणपो यत्र दृश्यते ।
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते ॥
कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी ।
द्रप्सापकर्षणैः क्षिप्तैर्वान्तैर्वा दुष्टतां व्रजेत् ॥
नखदन्ततनूजत्वक्तुषपांशुरजोमलैः ।
भस्मपङ्कतृणैर्वापि प्रच्छन्ना मलिना भवेत् ॥

द्रप्सं घनीभूतं श्लेष्म । तनूजं लोम । अत्र चोपघातभूयस्त्वाल्पत्वाभ्यां पञ्चभिर्वा चतुर्भिर्वेत्यादिविकल्पः । अत्र मलिनाया एकधोल्लेखनाच्छुद्धिः । मार्जनोपलेपने तु सर्वत्र समुच्चीयेते इति तु मिताक्षरा । गृहं तु मार्जनलेपनाभ्यां शुद्ध्यति । गृहस्य पृथगभिधानं मार्जनोपलेपनयोः प्राप्त्यर्थम् । शवदूषितगृहशुद्धौ विशेषमाह संवर्तः—

गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिते ।
प्रोत्सृज्य मृण्मयं भाण्डं सिद्धमन्नं तथैव च ॥
गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत् ।
गोमयेनोपलिप्याऽथ छागेन घ्रापयेद् बुधः ॥
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा ।
सर्वमभ्युक्षयेद्भूमं ततः शुद्ध्यत्यसंशयम् ॥

शवोऽत्र गोमनुष्यादिलक्षणः शिष्टाचारानुसारादिति प्रतिभाति ॥ १८८ ॥

(मिता०) इदानीं भूशुद्धिमाह—

भूशुद्धिरिति। मार्जन्या पांसुतृणादीनां प्रोत्सारणं मार्जनम्। दाहस्तृणकाष्ठाद्यैः। कालो यावता कालेन लेपादिक्षयो भवति तावान्। गोक्रमणं गवां पादपरिवहनम्। सेकः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणं वा। उल्लेखनं तक्षणं खननं वा। लेपो गोमयादिभिः। एतैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा अमेध्यादिदुष्टा मलिना च भूमिः शुद्ध्यति। तथा च देवलः—'यत्र प्रसूयते नारी म्रियते दह्यतेऽपि वा। चण्डालाद्युषितं यत्र यत्र विष्ठादि(१)संहतिः॥ एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता। श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत्॥ अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत्' ॥ इत्यमेध्या दुष्टा मलिनेति शोध्यभूमेस्त्रैविध्यमभिधाय शुद्धिविभागं दर्शयति—'पञ्चधा वा चतुर्धा वा भूरमे(२)ध्यापि शुद्ध्यति। दुष्टान्विता त्रिधा ज्ञेया शुद्ध्यते मलिनैकधा' ॥ इति। यत्र मनुष्या दह्यन्ते यत्र चण्डालैरध्युषितं(३)तत्र पञ्चभिर्दहनकालगोक्रमणसेकोल्लेखनैः शुद्धिः। यत्र मनुष्या जायन्ते यत्र म्रियन्ते यत्र चात्यन्तं विष्ठादिसंहतिः तासां दाहवर्जितैस्तैरेव चतुर्भिः। श्वसूकरखरैश्चिरकालमध्युषितायाः गोक्रमणसेकोल्लेखनैस्त्रिभिः। उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः। अङ्गारतुषकेशादिभिश्चिरकालमधिवासितायाः उल्लेखनेन शुद्धिः। मार्जनानुलेपने तु सर्वत्र समुच्चीयेते। एवं गृहं मार्जनलेपाभ्यां शुद्ध्यति। गृहस्य पृथगुपादानं संमार्जनलेपनयोः प्रतिदिवसं प्राप्त्यर्थम्॥ १८८॥

गोघ्रातेऽन्ने तथा केशमक्षिककीटदूषिते।
सलिलं भस्म मृद्वा(४)रि प्रक्षेप्तव्यं विशुद्धये॥ १८९॥

(वी० मि०) गोघ्रातादावन्नेऽदनीये सलिलभस्मनी मृद्वारिणी वा विशुद्ध्यर्थं प्रक्षेप्तव्ये। 'नित्यमभोज्यं केशकीटावपन्न'मिति गौतमवचनं तु केशादिभिः सह यत्पक्वं तद्विषयम्। मृद्वापीति क्वचित्पाठः। तत्र मृद्वानपक्षेऽप्यपिकारेण सलिलसमुच्चयः॥ १८९॥

---

(१) संगतिः ख.। (२) विशुद्ध्यति क.।
(३) तस्याः पञ्च क. तयोः पञ्च ख.।
(४) मृद्वापि—इति मुद्रितपुस्तके पाठः।

(मिता०) गोघ्रात इति। गोघ्राते गोनिःश्वासोपहतेऽन्ने अदनीयमात्रे। तथा केशमक्षिकाकीटैर्दूषिते। केशग्रहणं लोमादिप्राप्त्यर्थम्। कीटाः पिपीलिकादयः। उदकं भस्म मृद्वा यथासम्भवं प्रक्षेप्तव्यं शुद्ध्यर्थम्। यत्तु गौतमेनोक्तम्-'नित्यमभोज्यं केशकीटावपन्नम्' इति, तत्केशकीटादिभिः सह यत्पक्वं तद्विषयम्॥ १८९॥

त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः॥
भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु॥१९०॥

(वी०मि०) त्रपु रङ्गम्। सीसकादानि प्रसिद्धानि। एषां क्षारादिभिः कांस्यलोहानां (१)तु भस्माद्भिः शुद्धिः। क्षारो भस्म। अम्लोदकं जम्बीरादिरसवारि। अत्रोपघातापेक्षया व्यस्तानां वा शुद्धिहेतुत्वमवसेयम्। अत्र ब्रह्मपुराणम्—

सुवर्णरूप्यशङ्खाश्मशुक्तिरत्नमयानि च।
निर्लेपानि तु शुद्ध्यन्ति केवलेन जलेन तु॥
शूद्रोच्छिष्टानि शोध्यानि क्षाराम्लोदकवारिभिः।
सूतिकाशवविण्मूत्ररजस्वलहतानि च॥
प्रक्षेप्तव्यानि तान्यग्नौ यच्च यावत्सहेदपि।

बौधायनः-'तैजसानां तु पात्राणामुच्छिष्टोपहतानां त्रिःसप्तकृत्वः परिमार्जनं, परिमार्जनद्रव्याणि मृद्भ्रोशकृद्भस्मानि'। मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां पुनःकरणं गोमूत्रे वा सप्तरात्रं परिस्थानं महानद्यां वा। शङ्खः-

सूतिकोच्छिष्टभाण्डस्थ सुरामद्यहतस्य च।
त्रिःसप्तमार्जनैः शुद्धिर्न तु कांस्यस्य भाजने॥
तेन कांस्यस्य सकृदुपघातेऽग्नौ प्रतापनमसकृदुपघाते तु पुनर्घटनम्। अङ्गिराः—

गण्डूषं पादशौचं तु यः कुर्यात्कांस्यभाजने।
भूमौ निःक्षिप्य षण्मासान् पुनराकरमादिशेत्॥

आकरमादिशेदग्नौ दहेत्। स्मृतिः—

गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च।
शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च॥

---

(१) तु—इत्यारभ्य व्यस्तानां—इत्यन्तं क० पुस्तके नास्ति।

मनुः—

ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च।
शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः॥

यथार्हं यस्य येन मलापकर्षणं तस्य तेनेत्यर्थः।

मलसंयोगजं तज्जं यस्य येनोपहन्यते।
तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्॥

इति वचनादित्यास्तां विस्तरः। विशिष्टव्यवस्था पश्चाल्लिखनीया। प्लावो द्रवस्य त्विति। द्रवस्य द्रवद्रव्यस्य घृतादेः श्वकाकाद्युपहतस्य प्लावः समानजातीयद्रवद्रव्येण तदाधार भाण्डस्य यावन्निस्सरणमभिपूरणं शुद्धिरित्यनुपज्यते। शुद्धिहेतुरिति तदर्थः। ईयं च शुद्धिः प्रभूतस्य घृतादेः।

द्रवद्रव्याणि भूरीणि परिप्लाव्यानि चाम्भसा।

इति ब्रह्मपुराणात्। अत्राम्भःपदं समानजातीयद्रवद्रव्यपरमन्यथा शोधनीयस्य कार्याक्षमत्वापत्तेः। अल्पस्य त्याग एव। भूरित्वं च देशकालाद्यपेक्षया द्रष्टव्यम्।

देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥

इति वौधायनवचनात्। कीटाद्युपहतस्य तूत्पवनमाह मनुः—

द्रव्याणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्।

उत्पवनं वस्त्रान्तरितभाण्डे प्रक्षेपः, अन्यथा कीटाद्युपगमासम्भवात्। शूद्रादिभाण्डास्थितस्य तु मध्यादेः शौचमाह वौधायनः—'मधूदके पयस्तद्विकाराश्च पात्रात्पात्रान्तरानयनाच्छुद्धिः'।

यमश्च—

आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः।
म्लेच्छभाण्डस्थिता दुष्या निःक्रान्ताः शुचयः स्मृताः॥

अत्र चोत्पवनमप्यावश्यकम्। 'अभ्यवहार्याणां घृताधारितानां पुनः पवनमेव स्नेहानां स्नेहवद्रसानाम्' इति शङ्खवचनात्॥ १९०॥

(मिता०) त्रपुसीसकेत्यादि। त्रपुप्रभृतीनि प्रसिद्धानि। तेषां क्षारोदकेनाम्लोदकेन(१) वारिणा वोपघातापेक्षया समस्तैर्व्यस्तैर्वा शुद्धिः कार्या। कांस्यलोहानां भस्मोदकेन। ताम्रग्रहणाद्रीतिका-

(१) दकवारिणा क.

वृत्तलोह(१)योर्ग्रहणं, एकयोनित्वात्। एतच्च ताम्रादीनामम्लोदकादिभिः शुद्ध्यभिधानं न नियमार्थम्। 'मलसंयोगजं तज्जं यस्य येनोपहन्यते। तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्' ॥ इत्यविशेषेण स्मरणात्। अतो न ताम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसम्भवे नियमेनाम्लोदकादिना(२)शुद्धिः कार्या। अत एव मनुना सामान्येनोक्तम्—'ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च। शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः' ॥ इति। यत्तु 'भस्मना शुद्ध्यते कांस्यं ताम्रमाम्लेन शुद्ध्यति' इति, तत्ताम्रादेः शौचस्य परां काष्ठां प्रतिपादयितुं नान्यस्य निषेधाय। यदा तूपघातातिशयस्तदाम्लोदकादीनामावृत्तिः। 'गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च' ॥ इति स्मरणात्। दश(३)क्षारानाह—'तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः। काकजङ्घा तथावञ्चिश्चाश्वत्थवटस्य च ॥ एभिस्तु दशभिः क्षारैः शुद्धिर्भवति कांस्यके'। शुद्धिः प्लावो द्रवस्य त्विति। द्रवस्य द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्य अमे(४)ध्यसंस्पृष्टस्य च प्लावः प्लावनं समानजातीयेन द्रवद्रव्येण भाण्डस्यातिपूरणं यावन्निःसरणं शुद्धिरित्यनुवर्तते। ततोऽल्पस्य त्यागः। बह्वल्पत्वं च देशकालाद्यपेक्षयापि वेदितव्यम्। यथाह बौधायनः—देशं काल (५)तथा मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्' ॥ इति। कीटाद्युपहतस्य तूत्पवनम्। यथाह मनुः—'द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्' इति। उत्पवनं चात्र वस्त्रान्तरिते पात्रे प्रक्षेपः। अन्यथा कीटाद्युपगमस्यासंभवात्। शूद्रभाण्डस्थितस्य मधूदकादेः पात्रान्तरानयनाच्छुद्धिः। 'मधूदके पयस्तद्विकाराश्च पात्रात्पात्रान्तरानयने शुद्धाः' इति बौधायनस्मरणात्। मधुघृता(६)देर्वर्णापसदहस्तात्प्राप्तस्य पात्रान्तरानयनं पुनःप(७)वनं च कार्यम्। यथाह शङ्खः—'अभ्यवहार्याणां घृतेनाभिघारितानां पुनःपवनमेवं स्नेहानां स्नेहवद्रसानाम्' इति॥१९०॥

---

(१) पित्तलयोरिति मुद्रितपुस्तकपाठः। (२) दकादिभिः क.।
(३) इदं क. पुस्तकेऽधिकम्.। (४) अमेध्यद्रव्य क.।
(५) तथात्मानं ख.। (६) घृतादेर्हीनवर्णा क.।
(७) पचनं कार्यं ख.।

अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्ध्यादि(१)कर्षणात् ॥

(वी० मि०) अमेध्याः—

वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः ।
श्लेश्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥
मानुष्यास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा ।
स्वेदाश्रुदूषिका श्लेश्म मद्यं चाऽमेध्यमुच्यते ॥

इति मनुदेवलाद्युक्ताः। तैरक्तं लिप्तं भाण्डं शरीरादि तस्य मृदा तोयैश्च। गन्धस्य आदिपदाल्लेपस्य कर्षणादपनयनाच्छुद्धिः। अत्र विशेष्यो द्वादशमनभिधाय मनुदेवलोक्तः—

आददीत मृदो यश्च षट्सु पूर्वेषु शुद्धये ।
उत्तरेषु च षट्स्वद्भिः केवलाभिर्विशुद्ध्यति ॥

अमेध्यत्वं च वसादीनां स्वस्थानच्युतानामेव। 'देहाच्चैव मलाश्च्युता' इति मनुवचनात्। परकीयमलस्पर्शे तु देवलः—

मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी ।
मज्जानं शोणितं वापि परस्य यदि संस्पृशेत् ॥
स्नात्वाप्यमृज्य लेपादीनाचम्य च शुचिर्भवेत् ।
तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्जनात् ॥

इति ॥

(वी० मि०) विशेषानुक्ते शुद्धिमाह—

वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचि ॥ १९१ ॥

वाक्शस्तं शुद्धमिति चातुर्वर्ण्येन प्रतिपादितम्। शुद्धं भवत्विदमिति वाचा शस्तमिति मिताक्षरा। अम्बुना निर्णिक्तं क्षालितं भाण्डादि। चकारात् प्रोक्षितक्षालनाद्यसहं शर्करादि। अज्ञातं स्वयमपवित्रतयाऽज्ञातम्। सदा शुचि अशौचनिमित्ते जातेऽपि क्षारादिसम्बन्धं विना शुचि। एताच्चालपोपयोगयोग्यविषयम्।

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥

इत्यज्ञातेपि भुक्ते प्रायश्चित्ताभिधानात् ॥ १९१ ॥

---

(१) शुद्धिर्गन्धापकर्षणात्-इति क० पु० पाठः।

(मिता०) एवं सौवर्णराजतादीनां एतत्प्रकरणप्रतिपादितानां सर्वेषामुच्छिष्टलेहाद्युपघाते शुद्धिमुक्त्वेदानीं तेषामेवामेध्योपहतानां शुद्धिमाह—

अमेध्याक्तस्येति। अमेध्याः शरीरजा मला वसाशुक्रादयः। 'वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः' ॥ तथा 'मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा। स्वेदाश्रुदूषिका श्लेष्मं मद्यं चामेध्यमुच्यते' ॥ इति अमेध्यादयो मला मनुदेवलादिभिः प्रतिपादिताः। तैर्वसादिभिरक्तं लिप्तममेध्याक्तं तस्य मृदा तोयेन च शुद्धिः कर्तव्या गन्धा(१)पकर्षणेन। आदिग्रहणाल्लेपस्यापि ग्रहणम्। यथाह गौतमः—'लेपगन्धापकर्षणैः शौचममेध्यलिप्तस्य' इति। सर्वशुद्धिषु च प्रथमं मृत्तोयैरेव लेपगन्धापकर्षणं कार्यम्। यदि गन्धादि मृत्तोयैर्न गच्छति तदान्येन। 'अशक्तावन्येन मृद्वद्धिः पूर्वं मृदा च' इति गौतमस्मरणात्। वसादिग्रहणं च सर्वेषाममेध्यत्वं प्रतिपादयितुं न समानोपघाताय। 'मद्यैर्मूत्रपुरीषैश्च श्लेष्मपूयाश्रुशोणितैः। संस्पृष्टं नैव शुद्ध्येत पुनःपाकेन मृन्मयम्' ॥ इत्युपघाते विशेषाभिधानात्। 'अमेध्यत्वं चैवमेषां देहाच्चैव मलाश्च्युताः' इति वचनाद्देहच्युतानामेव न स्वस्थानावस्थितानाम्। पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तादी(२)नामन्यामेध्यस्पर्शे स्नानम्। यथाह देवलः —'मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत्' ॥ इति। 'तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुद्ध्यति' इति। तथा—'ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते। तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुद्ध्यति' ॥ इति। कृतेऽपि यथोक्तशौचे मनसोऽपरितोषाद्यत्र शुद्धिसन्देहो भवति तद्वाक्शस्तं शुचि, शुद्धमेतदस्त्विति ब्राह्मणवचनेन शुद्धं भवतीत्यर्थः। अम्बुनिर्णिक्तं यत्र प्रतिपदोक्ता शुद्धिर्नास्ति तस्य प्रक्षालनेन शुद्धिः। प्रक्षालनासहस्य प्रोक्षणेन। अज्ञातं च सदा यत्काकाद्युपहतमु(३)पयुक्तं न कदाचिदपि ज्ञायते तच्छुचि। तदुपयोगाददृष्टदोषो नास्तीत्यर्थः। न(४)न्वेतद्विरुध्यते। 'संवत्सरस्यैकमपि चरेत्कृ-

(१) गन्धोपकर्षणात् क.। (२) ङ्गानामन्या क.।
(३) उपभुक्तं ख.। (४) न तु तद्वि ख.।

च्छं द्विजोत्तमः। अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः' ॥ इत्यदृष्टदोषेऽपि प्रायश्चित्तप्रतिपादनात्। नैतत्, प्रायश्चित्तस्य जाग्रद्विषयत्वात् दोषाभाव(१)स्य चान्योपयोगिविषयत्वात् ॥ १९१ ॥

शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ॥
तथा मांसं श्वचण्डालक्रव्यादादिनिपातितम् ॥ १९२ ॥

(वी० मि०) अशुचि महीगतमपि जलं गोतृप्तिक्षमं प्रकृतिस्थं शुचि। प्रकृतिस्थत्वं च—

अव्याप्ताश्चेदमेध्येन गन्धरूपरसान्विताः।

इति मनूक्तम्। चण्डालाद्यस्पृष्टत्वमपीह विशेषणमिति मिताक्षरा। देवलः—

तत्राक्षोभ्यतडागानि नदीवाप्यः सरांसि च।
कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत् ॥

कश्मलं शवादि, अशुचि मूत्रादि। तीर्थ इति सप्तम्यन्तात्तसिः, तेन कश्मलादिस्पृष्टघट इत्यर्थः। उशनाः—

नद्यः कूपतडागानि सरांसि सरितस्तथा।
असंवृतान्यदोषाणि मनुः स्वायंभुवोऽब्रवीत् ॥

विष्णुः—

मृतपञ्चनखात्कूपादत्यन्तोपहतात्तथा।
आपः समुद्धरेत्सर्वाः शेषं शास्त्रेण शोधयेत् ॥
वह्निप्रज्वलनं कृत्वा कूपे पक्वेष्टकाचिते।
पञ्चगव्यं न्यसेत्पश्चान्न च तोयं समुद्धरेत् ॥
जलाशयेषु चान्येषु दूषितेषु विशोधनम्।
घटानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ॥

यमः—

अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका।
दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम् ॥

तथा मांसमित्यादि। श्वादिभिः स्पर्शपूर्वकं निपातितमपि मांसं शुचि। क्रव्यादा गृध्रादयः। आदिशब्देन पुक्कसादिपरिग्रहः ॥१९२॥

---

(१) भावस्य वान्यप्रयोग क.।

(मिता०) शुचीति । महीयतं भूमिस्थमुदकं एकगवीतृप्तिजननसमर्थं चण्डालादिभिरस्पृष्टं प्रकृतिस्थं रूपरसगन्धस्पर्शान्तरमनापन्नं शुचि आचमनादियोग्यं भवति । महीगतमित्यशुचि । भूगतस्य शुचित्वनिषेधार्थं नत्वान्तरिक्षोदकस्य शुद्धत्वव्यावृत्त्यर्थम् । नाप्युद्धृतस्य—'उद्धृताश्चापि शुद्ध्यन्ति शुद्धैः पात्रैः समुद्धृताः । एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयम्' ॥ इति देवलवचनात् । तथा चण्डालादिकृते तडागादौ न दोषः । 'अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके तथा । तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते' ॥ इति शातातपस्मरणात् । तथा मांसं श्वचण्डालक्रव्यादादिभिर्निपातितं शुचि । आदिग्रहणात्पुल्कसादेरपि ग्रहणम् । निपातितग्रहणं भक्षितस्य निराकरणार्थम् ॥ १९२ ॥

रश्मिरग्नी रजः छाया गौरश्वो वसुधानिलः ॥
विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्रवणे(१)शुचिः ॥१९३॥

चण्डालमेध्यादिस्पृष्टोपि रश्म्यादिः स्पर्शे शुचिः । तत्र रश्मिः सूर्यादिकिरणः । रजः—

श्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणाम् ।
अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ॥

इति विशिष्य निषिद्धव्यतिरिक्तम् । अग्निरज इति पाठेऽजः छागः, छाया वृक्षादेः । चण्डालादिच्छाया तु स्पर्शे निषिद्धा ।

चण्डालपतितच्छायास्पर्शे दुष्टा तनुर्भवेत् ।

इति ब्रह्मपुराणात् । एतच्च छायाया द्रव्यत्वमाभिप्रेत्य । विप्रुषोऽवश्यायबिन्दवः । मुखजानामग्रे वक्ष्यमाणत्वात् । मक्षिकापदं च दंशमशकादीनामप्युपलक्षकम् । प्रस्रवणे ऊधःस्थक्षीराकर्षणे वत्सः शुचिः, तेन वत्सोच्छिष्टस्तननिःसृतं क्षीरं नाऽशुचीति तात्पर्यम् । वत्सपदं बालोपलक्षकम् ।

बालैरनुपरिक्रान्तं नित्यं मेध्यमिति स्थितिः ।

इति वचनात् ॥ १९३ ॥

(मिता०) रश्मिरिति । रश्मयः सूर्यादेः प्रकाशकद्रव्यस्य । अग्निः प्रसिद्धः । रजः अजादिसम्बन्धव्यतिरेकेण । तत्र—'श्वकाकोष्ट्रख-

---

(१) प्रस्रवने—इति मुद्रितपुस्तके पाठः ।

रौलूकसूकरग्राम्यपक्षिणाम्। अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते'॥ इति दोषश्रवणात्तत्स्पर्शे संमार्जनादि कार्यम्। छाया वृक्षादेः। गौः। अश्वः। वसुधा भूमिः। अनिलो वायुः। विप्रुषोऽवश्यायबिन्दवः। मुखजानां वक्ष्यमाणत्वात्। मक्षिकाश्च। एते चण्डालादिस्पृष्टा अपि स्पर्शे शुचयः। वत्सः प्रस्रवने ऊधोगतदुग्धापकर्षणे शुचिः। वत्सग्रहणं बालस्योपलक्षणार्थम्। 'बालैरनुपरिक्रान्तं स्त्रीभिराचरितं च यत्। अविज्ञातं च यत्किंचिन्नित्यं मेध्यमिति स्थितिः'॥ इति वचनात्॥ १९३॥

अजा(२)श्वं मुखतो मेध्यं न गौर्न नरजा मलाः॥

अजश्चाश्वश्च मुखप्रदेशे मेध्यः। अजस्यापि कथञ्चित्तेनाङ्गत्वादजाश्वमित्येकवद्भावः। गौर्मुखेन मेध्या मेध्यो वा नरो मनुष्यस्तज्जा मलाः पुरीषादयः। नरपदं च स्मृत्यन्तरे विशिष्योपात्तानां शूकरादीनामप्युपलक्षकम्। 'न नरजा मला' इति भङ्ग्या गोपुरीषादेर्मेध्यत्वं दर्शयति। तथा च यमः—

पृष्ठतो गौर्गजः स्कन्धे सर्वतोऽधः शुचिस्तथा।
नृणां मूत्रपुरीषे च अमेध्ये मलमेव च॥
गोः पुरीषं च मूत्रं च नित्यमेध्यमिति स्थितिः।

बृहस्पतिः—

पादौ शुची ब्राह्मणानामजाश्वानां मुखं शुचि।
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम्॥
पन्थानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः॥ १९४॥

चण्डालादिस्पर्शे पन्थानः यथासम्भवं सूर्यांशुप्रभृतिभिः शुद्ध्यन्ति। चकाराज्जलसमुच्चयः।

सूर्येन्दुरश्मिपातेन मारुतस्पर्शनेन च।
गवां मूत्रपुरीषेण शुद्ध्यत्याप इति स्मृतिः(३)॥ १९५॥

(मिता०) अजाश्वयोरिति। अजाश्वयोर्मुखं मेध्यम्। न गोः। न नरजा मलाः। नरशब्दो लक्षणया देहमभिधत्ते। नरजा मला वसादयो मेध्या न भवन्ति। पन्थानो मार्गाः श्वचण्डालादिभिः स्पृ-

---

(१) अजाश्वयोर्मुखं मेध्यं—इति मुद्रितपुस्तके पाठः।

(२) स्थितिः—इति ख० पु. पाठः।

ष्टा अपि रात्रौ सोमांशुसिर्मारुतेन च शुद्ध्यन्ति। दिवा तु सूर्यांशुभिर्मारुतेन च ॥ १९४ ॥

मुखजा विप्रुषो मेध्यास्तथाचमनबिन्दवः ॥
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥ १९५ ॥

(वी० मि०) मुखजा जलविन्दवो भूमिपातिताः स्पृष्ट्वा अपि मेध्याः शुचयः। अङ्गलग्नास्तु रोमद्वयक्लेदसमर्था आचमने हेतवः। तथा च भूमिगता विन्दवः परास्पृष्टा विप्रुषः शुद्धाः। द्विरोमक्लिन्नेष्वाचमेत्। आचमनविन्दवः—

स्पृशन्ति विन्दवः पादौ य आचामयतः परान्।
भूमिगैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥

इति मनूक्ताः आचमनसम्बन्धिनः। श्मश्रु स्वस्थानास्थितमास्यप्राप्तमपि हस्तास्पृष्टं मेध्यम्। हस्तस्पृष्टे त्वशौचमेव। तदाहाऽऽपस्तम्बः—'न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सन्दिर्यावन्न हस्तेनोपस्पृशति'। दन्तत्यक्तमन्नादि स्वतश्च्युतं त्यक्त्वा ततः त्यागमात्रेण शुचिर्भवति। अच्युतं तु दन्तसक्ततेः समम्। 'दन्तोच्छिष्टं दन्तवदन्यत्र जिह्वाभिमर्षणा'दिति गौतमवचनात्। दन्तलग्नं जिह्वास्पृष्टमाचमनार्थमाकर्षणीयं यदि च्यवते तदा दन्तलग्ने सत्यप्याचमनं कार्यम्। तथा देवलः—

भोजने दन्तलग्नस्यानिर्वृत्याचमनं चरेत्।
दन्तलग्नमसंहार्यं लेह्यमन्ते तदन्तवत् ॥
न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः।
भवेदशौचमत्यर्थं तृणवेद्याद्व्रणे कृते ॥

एतच्चानुपलभ्यमानरसविषयम्। उपलभ्यमानरसे त्वशौचमेव। 'दन्तलग्नेषु रसवर्ज'मिति शङ्खवचनात् ॥ १९५ ॥

(मिता०) मुखजा इति। मुखे जाता मुखजाः श्लेष्मविप्रुषो मेध्याः नोच्छिष्टं कुर्वन्ति अनिपतिताश्चेदङ्गे। 'न मुखविप्रुष उच्छिष्टे कुर्वन्ति न चेदङ्गे निपतन्ति' इति गौतमवचनात्। तथा च ये आचमनतोयविन्दवः पादौ स्पृशन्ति ते मेध्याः। श्मश्रु चास्यगतं मुखप्रविष्टमुच्छिष्टं न करोति। दन्तसक्तं चान्नादिकं स्वयमेव च्युतं त्य-

क्त्वा शुचिर्भवति । अच्युतं दन्तस(१)मम् । तथा च गौतमः—दन्तश्लिष्टं तु दन्तवदन्यत्र जिह्वाभिमर्शनात्प्राक् च्युतेरित्येके । 'च्युतेष्वास्रावबद्धिद्यान्निगिर(२)न्नेव तच्छुचि' इति । निगरणं पुनरनेन याज्ञवल्क्योक्तेन त्यागेन विकल्प्यते । निगिरन्नेवेत्येवकारः—'चर्वणे त्वाचमेन्नित्यं मुक्त्वा ताम्बूलचर्वणम् । ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च' ॥ इति विष्णूक्ताचमननिषेधार्थः । ताम्बूलग्रहणं फलाद्युपलक्षणार्थम् । यथाह शातातपः—'ताम्बूले च फले चैव भुक्ते स्नेहावशिष्टके । दन्तलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विजः' ॥ इति ॥१९५॥

(वी० मि०) प्रकृतमाचमनरूपं धर्ममाह—

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ॥
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥ १९६ ॥

स्नानादौ कृते सति आचान्त आचामेत्, द्विराचामेदित्यर्थः । पुनःशब्दस्त्वर्थः, तेन श्मश्रुगते तदसक्ते च पूर्वोक्त आचमनव्यवच्छेदः । पीत्वेत्यपोशानातिरिक्तपरम् ।

मधुपर्के च सोमे च अक्ष(३)प्राणाहुतीषु च ।
नोच्छिष्टस्तु भवेद्विप्रो यथान्नेर्वचनं तथा ॥

इत्यङ्गिरोवचनात् । रथ्योपसर्पणे राजमार्गगमने । विपरिधानं विशेषेण परिधानं, तेनाऽधरीयवस्त्रपरीधान एवाचमनं न तूत्तरीयपरीधाने । आचारोऽप्येवम् । चकारेण 'भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामे'दित्यापस्तम्बवचनादिसिद्धानां च सकृदाचमनानां शुद्ध्यर्थं कर्माङ्गनैमित्तिकभेदेन विविधानां च सङ्ग्रहः । विशिष्य च तेषामनभिधानमतिप्रसिद्धत्वात् ॥ १९६ ॥

(मिता०) स्नात्वेति । स्नानपानक्षुतस्वप्नभोजनरथ्योपसर्पणवासोविपरिधानेषु कृतेष्वाचान्तः पुनराचामेत्, द्विराचामेदित्यर्थः । चकाराद्रोदनाध्ययनारम्भ(४)चाप्रत्यानृतोक्त्यादिषु । तथा च वसिष्ठः—'सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा रुदित्वा चाचान्तः पुनराचामेत्' इति । मनुरपि—'सुप्त्वा क्षुत्वा च भुक्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः । पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन्' ॥ इति ।

---

(१) दन्तेभ्यः पतितं त्यजति गिलति वा एतावता शुद्ध्यति विना आचमनं इति ग०पु०विशेषः ।
(२) निर्गिरन्नेव क० निगरन्नेव ख० । (३) अश्रुप्रा०—इति ख० पुस्तके पाठः । (४) चाप्रत्यानृतो ख० ।

भोजने त्वाद्यावपि द्विराचमनम्, 'भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचामेत्' इत्यारम्भस्मरणात् । स्नानपानयोरादौ सकृत् । अध्ययने त्वारम्भे द्विः । शेषेष्वन्ते एव यथोक्तं द्विराचमनम् ॥ १९६ ॥

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः ॥
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥ १९७ ॥

(वी० मि०) रथ्या मार्गमात्रं, तद्गताः कर्दमाः, तोयानि च, पक्वेष्टकचितानि मठादीनि चाऽन्त्यादिभिः स्पृष्टानि मारुतेनैव शुद्ध्यन्ति । एवकारेण तत्स्प्रष्टुराचमनव्यवच्छेदः स्पृश्यस्य शोधकान्तरव्यवच्छेदश्च । अन्त्याश्चण्डालादयः । चकारेण—

रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च ।
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥

इति व्यासोक्तनौकादिसमुच्चयः । एवं च—

रथ्याकर्दमतोयेन ष्ठीवनाद्येन वाऽप्यथ ।
नाभेरूर्ध्वं नरः स्पृ(१)ष्टः सद्यःस्नानेन शुद्ध्यति ॥

इति शङ्खवाक्यमुपलभ्यमान गन्धलपामध्यसम्बन्धपरम् ।

सकर्दमन्तु वर्षासु प्रविश्य ग्रामसङ्करम् ।
जङ्घयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणाः स्मृताः ॥

इति यमवचनं च स्वरूपतो गन्धतश्चाऽनुपलभ्यमानस्याऽमेध्यस्य सम्बन्धे सति शुद्धिप्रतिपादकमित्यविरोधः ॥ १९७ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने द्रव्यशुद्धिप्रकरणम् ।

(मिता०) रथ्येत्यादि । रथ्या मार्गमात्रम् । कर्दमः पङ्कः । तोयमुदकम् । रथ्यास्थितानि कर्दमतोयानि अन्त्यैश्चण्डालादिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुद्ध्यन्ति शुद्धिमुपयान्ति । बहुवचनं तद्गतगोमयशर्करादिप्राप्त्यर्थम् । पक्वेष्टकादिभिश्चितानि प्रासादधवलगृहादीनि चण्डालादिस्पृष्टानि मारुतेनैव शुद्ध्यन्ति । एतच्च 'प्रोक्षणं संहतानाम्' इत्युक्तप्रोक्षणनिषेधार्थम् । तृणकाष्ठपर्णादिमयानां तु प्रोक्षणमेवेति ॥ १९७ ॥

इति द्रव्यशुद्धिप्रकरणम् ।

---

(१)स्पृष्टः—इत्यारभ्य प्रविश्य—इत्यन्तं नास्ति ख० पुस्तके ।

(वी मि०) पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणमित्युक्तं, पात्रे दातव्यमर्चितमिति च वक्ष्यतीति वक्तव्यदानरूपधर्माङ्गस्य पात्रस्य ब्राह्मणत्वं मुख्यं विशेषणमिति ब्राह्मणान् प्रशंसति—

तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान् वेदगुप्तये ॥
तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥ १९८ ॥
सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः(१) ॥
तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः॥ १९९॥

ब्रह्मा तपस्तप्त्वा विधाय तपसैव प्रधानसहकारिणा तदव्यवधानेनैव ब्राह्मणानसृजत्। किमर्थं ? वेदस्य मन्त्रब्राह्मणात्मकस्य गुप्तये अध्यापनादिना सम्प्रदायरक्षणार्थम्। पितॄणां श्राद्धादौ पात्रादिभावेन देवानां यज्ञादौ ऋत्विगादिभावेन च तृप्त्यर्थं प्रीतिनिष्पत्त्यर्थम्। धर्मस्य कर्तृत्वेन उपदेष्टृत्वेन रक्षणार्थम्। चकारेणादेवपित्र्यकर्मण्युपनयनादावाचार्यादिभावार्थं च। विप्राः सर्वस्य क्षत्रियादेः प्रभवः ईश्वराः श्रेष्ठा इति यावत्। तेष्वपि श्रुतं वेदार्थानां गुरुद्वाराऽवधारणम्। अध्ययनं तत्प्रयोजको वेदपाठः तद्युक्ताः। श्रेष्ठा इत्यग्रतनं सर्वत्रान्वेति। तेभ्यः केवलं श्रुताध्ययनशालिविप्रेभ्यः क्रियापरा विहितकर्मानुष्ठा विप्राः श्रेष्ठाः। तेभ्योपि केवलं श्रुताध्ययनशालिक्रियापरेभ्योऽप्यध्यात्म आत्मतत्त्वं तद्विदामुत्कृष्टाः।

तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च।
युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिः स्थिरा भवेत् ॥
इत्युक्तमनोनाशादिविशिष्टाः ॥ १९९ ॥

(मिता०) इदानीं दानधर्मं प्रतिपादयिष्यंस्तदङ्गभूतपात्रप्रतिपादनार्थं तत्प्रशंसामाह—

तप इति। ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृत्वा कान्सृ(२)जामीति पूर्वं ब्राह्मणान्सृष्टवान्। किमर्थम् वेदगुप्तये वेदरक्षणार्थम्। पितॄणां देवतानां च तृप्त्यर्थम् अनुष्ठानोपदेशद्वारेण धर्मसंरक्षणार्थं च। अतस्तेभ्यो दत्तमक्षय्यफलं भवतीत्यभिप्रायः॥१९८॥

(मिता०) सर्वस्येति। सर्वस्य क्षत्रियादेर्विशः प्रभवः श्रेष्ठाः जात्या कर्मणा च। ब्राह्मणेष्वपि श्रुताध्ययनशीलिनः श्रुताध्ययनसं-

---

(१) श्रुताध्ययनशीलिनः—इति मुद्रितपुस्तके पाठः। (२) कृत्वा मुख्यान् सृजामीति ख०।

पन्ना उत्कृष्टाः । तेभ्योऽपि क्रियापरा विहितानुष्ठानशीलाः । तेभ्योऽप्यध्यात्मविच्तमाः वक्ष्यमाणमार्गेण शमदमादियोगेनात्मतत्त्वज्ञाननिरताः। श्रेष्ठा इत्यनुषज्यते ॥ १९९ ॥

(वी० मि०) एवं ब्राह्मणान् प्रशंस्य प्रकृतपात्रलक्षणमाह—

न विद्यया केवलया तपसा वापि पात्रता ॥
यत्र वृत्तमिमे चोभे तद्धि पात्रं(१)प्रकीर्तितम् ॥ २०० ॥

विद्यया श्रुताध्ययनसंपत्त्या, केवलया तपोवृत्तरहितया, तपसा शमदमादिरूपेण वा, केवलेन श्रुताध्ययनवृत्तरहितेन। अपिशब्दात् केवलेन(२)वृत्तेन ब्राह्मणत्वेन वा न पात्रता लोके वेदे च न पात्रत्वेन व्यवह्रियमाणत्वम्(३)। हि यतः, यत्र यस्मिन्विप्रे, वृत्तमाचारनिष्ठत्वमिमे च श्रुताध्ययनतपसी तत्पात्रमिति मन्वादिभिः प्रकीर्तितम्। प्रचक्षत इति क्वचित्पाठः ॥ २०० ॥

(मिता०) एवं जातिविद्यानुष्ठानतपसां प्रशंसामुखेनैकैकयोगे-(४)न पात्रतामभिधायाधुना तेषां समुच्चये संपूर्णपात्रतामाह—

नेति। केवलया विद्यया श्रुताध्ययनसंपत्त्या नैव संपूर्णपात्रत्वम्। नापि केवलेन तपसा शमदमादिना। अपिशब्दात्केवलेनानुष्ठानेन केव(५)लया जात्या वा नैव संपूर्णपात्रता। कथं तर्हि ? यत्र पुरुषे वृत्तमनुष्ठानं इमे चोभे विद्यातपसी स्तः चशब्दाद्ब्राह्मणजातिश्च तदेव मन्वादिभिः संपूर्णपात्रं प्रकीर्तितम्। हि यस्मादतः परमुत्कृष्टं पात्रं नास्ति। अत्र जातिविद्यानुष्ठानतपःसमुच्चयानामुत्तरोत्तरप्राशस्त्येन फलतारतम्यं द्रष्टव्यम् ॥ २०० ॥

कन्यादानन्तु क्षत्रियादिभ्योपि विशेषवचनात्, पात्रलक्षणमुक्त्वाऽपात्रे दानं व्युदस्यन्नेव पात्राङ्गकन्यादानमाह—

गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम् ॥
नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता ॥ २०१ ॥

आदिपदेन सर्वेषां देयानां विशिष्यानुक्तानां परिग्रहः। अर्चितं

---

(१) प्रचक्षते—इति क० पु० पाठः।

(२) केवलवृत्तेन केवलब्राह्मणत्वेन वा—इति ख० पुस्तके पाठः। (३) व्यवह्रियमाणत्वं—इति ख० पु० पाठः। (४) योगे पात्रतां ग०। (५) केवलजात्या क०।

पूजितम्। इदं च देयविशेषणम्।

योऽर्चितः प्रतिगृह्णाति योऽर्चयित्वा प्रतीच्छति।

इति वचनात्। अर्चितं शास्त्रोक्तेतिकर्त्तव्यतया विशिष्टतया प्रशस्तं यथास्यादिति क्रियाविशेषणं वा। एवं च प्रतिग्रहविषय एव पात्रनियम इत्येतादृशदाने पात्रदोषेण दातुर्न दोषसङ्क्रान्तिरिति विवेक्तव्यम्। तथा च यमः—

सममब्राह्मणे दानं द्विगुणं ब्राह्मण(१)ब्रुवे।
प्राधीते शतसाहस्रमनन्तं वेदपारगे॥
शूद्रे समगुणं दानं वैश्ये द्विगु(२)णमुच्यते।
क्षत्रिये पञ्चगुणं प्रोक्तं विप्रे दशगुणं स्मृतम्॥
अन्नस्य क्षुधितः पात्रम्—

इत्यादि। सति संभवे क्षुधिताय याचमानायाऽब्राह्मणायाऽपि यथाकथञ्चिदवश्यमन्नं दातव्यमित्येतत्परम्। अत एवानुपदं प्रतिग्रह इत्यादि वक्ष्यति। यथोक्तपात्रासंपत्तावपात्रताप्रयोजकदोषशून्यायाऽन्यस्मा अपि दातव्यमित्यभिप्रेत्य निषेधति नापात्र इत्यादि। विदुषा ज्ञानवता। श्रेयः स्वर्गादिकम्॥ २०१॥

(मिता०) सत्पात्रे गवादिदानं देयम्—

गोभूतीत्यादि। पूर्वोक्ते पात्रे गवादिकमर्चितं शास्त्रोक्तो(३)दकदानादीतिकर्तव्यतासहितं देयम्। अपात्रे क्षत्रियादौ ब्राह्मणे च पतितादौ विदुषा पात्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णफलमिच्छता किंचिदल्पमपि न दातव्यम्। श्रेयोग्रहणादपात्रदानेऽपि किम(४)पि तामसं फलमस्तीति सूचितम्। यथाह कृष्णद्वैपायनः—'अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्'॥ इति। अपात्रे न दातव्यमिति वदता विशिष्टदेशकालद्रव्यसन्निधौ पात्रस्यासन्निधाने द्रव्यस्य वा तदुद्देशेन त्यागं तस्मै प्रतिश्रवणं वा कृत्वा समर्पयेत् न त्वपात्रे दातव्यमिति सूचितम्। तथा प्रतिश्रुतमपि पश्चात्पातकादिसंयोगे ज्ञाते न देयम्, 'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्' इति निषेधात्॥ २०१॥

---

(१) ब्राह्मणाब्रुवे—इति ख० पु० पाठः। (२) त्रिगुणमुच्यते—इति ख० पु० पाठः।
(३) दकपात्रादीति क०। (४) किंचित्तामसं क०।

(वी०मि०) न केवलमपात्रप्रतिग्रहणाच्छ्रेयोऽनुत्पत्तिमात्रमपि तु दातुर्नरकोऽपीति दर्शयन् प्रतिग्रहीतुरपि तादृशस्य दोषमाह—

विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ॥
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥ २०२ ॥

विद्यातपोभ्यामितिवृत्तस्याप्युपलक्षकम् । तुशब्देन प्रतिग्रहातिरिक्तस्य ग्रहणस्य निषेधो व्यवच्छिन्नः । प्रतिग्रहः प्रतिगृह्यमाणद्रव्यं, कर्मव्युत्पत्तेः । अत्र हेतुमाह गृह्णन् प्रतिगृह्णन् प्रदातारं प्रकर्षेण दातारं प्रतिग्राहयितारमिति यावत् । अधो नयति नरकं प्रापयति । एवकारोऽध इत्यत्रान्वितः, तेनेष्टं फलं व्यवच्छिनत्ति । चो हेतौ॥२०२॥

(मिता०) अपात्रे दातुर्निषेधमुक्त्वा प्रतिग्रहीतारं प्रत्याह—

विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादिर्न ग्राह्यः । यस्माद्विद्यादिहीनः प्रतिगृह्णन् दातारमात्मानं चाधो नरकं नयति प्रापयतीति॥२०२॥

(वी० मि०) दानस्य कालमाह—

दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ॥

प्रत्यहं प्रतिदिवसं शक्तितो दातव्यं, निमित्तेषु संक्रान्त्यादिषु विशेषतोऽतिप्रयत्नेनादरेण च ॥

(वी० मि०) दाने श्रद्धायाः प्रधानाङ्गत्वमाह—

याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः ॥२०३॥

श्रद्धया फलावश्यंभावनिश्चयरूपया ।
सत्कृतिरनसूया च सदा श्रद्धेति कीर्त्यते ।

इति देवलपरिभाषितया अनसूयया च पूतं निर्दोषं गुणवदिति यावत् । एवं यथास्यात्तथा दातव्यम् । शक्तितः शक्त्यनुसारेण याचितेन संप्रदानप्रेरितेन । अपिकारोऽयाचितदानादपकर्षं सूचयति । तथा च शातातपः—

अभिगम्य तु यद्दानं यत्तु दानमयाचितम् ।
विद्यते सागरस्यान्तस्यान्तरे नैव विद्यते ॥

तथा—

गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचिते तु तदर्द्धकम् ॥

तुशब्देन श्रद्धापूर्वकदानं सम्पूर्णदानफलार्थिनो व्यवच्छिनत्ति २०३

(मिता०) गवादिपात्रे दातव्यमित्युक्तं तत्र विशेषमाह—

दातव्यमिति । प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकुटुम्बाविरोधेन दातव्यम् । निमित्तेषु चन्द्रोपरागादिषु विशेषेतोऽधिकं यत्नेन दातव्यम् । याचितेनापि श्रद्धापूतमनसूयापवित्रीकृतं शक्त्या दातव्यम् । याचितेनापि दातव्यमिति वदता यथोक्तं पात्रं स्वयमेव गत्वा आहूय वा यद्दानं तन्महाफलमुक्तम् । तथा च स्मरणम्—'गत्वा यदीयते दानं तदनन्तफलं स्मृतम् । सहस्रगुणमाहूय याचिते तु तदर्धकम्' ॥ इति ॥ २०३ ॥

(वी० मि०) गोदानरूपं धर्ममाह पञ्चाभिः—

हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ॥
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥ २०४ ॥

हेमयुक्ते शृङ्गे यस्याः सा हेमशृङ्गी । रौप्यैः रूप्यमयैः शफैः खुरैरुपलक्षिता । सुशीला प्रहरणादिप्राङ्मुखा । वस्त्रसंयुता वस्त्राच्छादिता । सकांस्यपात्रा कांस्यमयदोहनपात्रसहिता गौर्दातव्या ॥ २०४ ॥

(मिता०) गवादिकं देयमित्युक्तं तत्र गोदाने विशेषमाह—

हेमशृङ्गीति । हेममये शृङ्गे यस्याः सा हेमशृङ्गी शफैः खुरैः रौप्यैः राजतैः संयुता वस्त्रेण च संयुता कांस्यपात्रसहिता बहुक्षीरा(१) सुशीला गौर्यथाशक्तिदक्षिणासहिता दातव्या ॥ २०४ ॥

दाताऽस्याः स्वर्गमाप्नोति वत्सराँल्लोम(२)संमितान् ॥

अस्या उक्तसकलविशेषणविशिष्टाया गोर्दाता, तस्या लोमभिः संमितान् वत्सरानभिव्याप्य स्वर्गमाप्नोति ॥

(वी० मि०) सफलं कपिलादानमाह—

कपिला चेत्तारयति भूयश्चासप्तमं कुलम् ॥ २०५ ॥

उक्तविशेषणविशिष्टा सा चेत् कपिला तदा सप्तपुरुषपर्यन्तं दातुः कुलं तारयति । भूयःशब्दोऽप्यर्थः, तेन पूर्वोक्तफलसमुच्चयः । चशब्दः कपिलागतपूर्वोक्तविशेषणार्थः ॥ २०५ ॥

(मिता०) गोदानफलमाह—

दातेति । अस्या गोः रोमसंमितान् रोमसंख्याकान्वत्सरान्स्वर्ग-

---

(१) बहुक्षीरा गौर्यथा० क० ख०। (२) वत्सरान्रोमसंमितान्—इति मुद्रितपुस्तके पाठः।

माप्नोति दाता । सा यदि कपिला तदा न केवलं दातारं तारयति किं तु कुलमपि आसप्तमं सप्तममभिव्याप्य पित्रादीन् षट् आत्मानं च सप्तमम् । अप्यर्थे भूयःशब्दः ॥ २०५ ॥

(वी० मि०) उभयतोमुखीदानमाह—

सवत्सारोमतुल्यानि युगान्युभयतोमुखीम् ॥
दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥२०६॥
यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्र(१)दृश्यते ॥
तावद्द्यौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥२०७॥

उभयतोमुखीं पूर्वेण प्रागुक्तेन कपिलात्वव्यतिरिक्तविशेषणसमुदायेन विशिष्टां गां कपिलामकपिलां वा विधिना शास्त्रोक्तोतिकर्तव्यतया ददत्स्या गोर्दाता दीयमानसवत्सगोरोमतुल्यानि युगान्यभिव्याप्य स्वर्गमाप्नाति । उभयतोमुखीत्वं महिष्या साधारणमतस्तद्व्यावर्तनायोक्तमस्या दातेति । उभयतोमुखीलक्षणं सूचयन्नेव वाच्यमानविशेषणविशिष्टां गां स्तौति । फलाधिक्यौचित्यप्रतिपादनाय फलान्तरसूचनाय यावदिति । वत्सस्य द्वौ पादौ मुखं च गोर्योनिस्थं प्रदृश्यते स्पष्टं द्रष्टुं शक्यते तावत्सा गौः पृथिवी तुल्या ज्ञेया । एतेन पृथिवीदानजन्यफलसमानमपि फलं तद्दाने सूचितम् ।

यावद्वत्सो योनिगतो यावद्वत्सं न मञ्चति ।
तावद्द्यौः पृथिवी ज्ञेया सशैलवनकानना ॥
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ।

इति मत्स्यपुराणात् गर्भनिःसृतस्य वत्सस्य निमित्तविशेषवशाद्योन्यां मुखस्य पादयोर्दर्शनेऽपि नोभयमुखीत्वमित्याह यावद्गर्भं न मुञ्चतीति । तेन गर्भाशयस्थितार्द्धयोनिदृश्यमानपादद्वयमुखवत्सकोभयतोमुखीति पर्यवस्यति ॥ २०६—२०७ ॥

(मिता०) उभयतोमुखीदानफलम्—

सवत्सेत्यादि । सवत्सारोमतुल्यानि वत्सेन सह वर्तत इति सवत्सा तस्या रोमतुल्यानि वत्सस्य गोश्च यावन्ति रोमाणि तावत्संख्याकानि युगानि कृतत्रेतादीनि उभयतोमुखीं ददत्स्वर्गमाप्नोत्यनुभवति पूर्वेण विधना दाता चेत् ॥ २०६ ॥

---

(१) च दृश्यते —इति मुद्रितपुस्तके पाठः ।

(मिता०) का पुनरुभयतोमुखी कथं तावत्तद्दानं महाफलमित्यत आह—

यावदिति। गर्भान्निर्गच्छतो वत्सस्य द्वौ पादौ मुखं च यावत्कालं योन्यां दृश्यते तावत्कालं उभयतोमुखमस्या अस्तीत्युभयतोमुखी। यावत्कालं गर्भं न मुञ्चति तावत्सा गौः पृथिवीसमा ज्ञेया। अतः फलातिशयो युक्तः ॥ २०७ ॥

(वी० मि०) पूर्वोक्तहेमशृङ्गत्वादिविशेषणविशिष्टाया गोर्दानं सफलमाह—

यथाकथञ्चिद्दत्वा गां धेनुं वाऽधेनुमेव वा ॥
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥ २०८ ॥

यथाकथञ्चित्पूर्वोक्तविशेषणमपुरस्कृत्यापि धेनुं क्षीरिणीमक्षीरिणीं वा। एवकारो वन्ध्याव्यवच्छेदकः। अरोगां स्वौरकादिरोगरहिताम्। अपरिक्लिष्टामनतिदुर्बलाम्। गां दत्त्वा दाता स्वर्गे महीयते पूजितो भवति। अस्मिन्नधेनुधेनुसाधारणे फले धेनुदानफलभूमा न्यायादवगन्तव्यः। कर्त्राकाङ्क्षापूरणाय दातेत्युक्तम् ॥ २०८ ॥

(मिता०) सामान्यगोदाने फलम्—

यथाकथञ्चिदिति। यथाकथञ्चिद्धेमशृङ्गाद्यभावेऽपि यथासंभवं पूर्वोक्तेन विधिना धेनुं दोग्ध्रीं, अधेनुं वा अवन्ध्यां, अरोगां रोगरहितां, अपरिक्लिष्टां अत्यन्तादुर्बलां गां दत्त्वा दाता स्वर्गे महीयते पूज्यते ॥ २०८ ॥

(वी० मि०) गोदानफलमन्यत्राप्यतिदिशति—

श्रान्तसंवाहनं रोगिपरिचर्या सुरार्चनम् ॥
पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत् ॥ २०९ ॥

श्रान्तस्य परिश्रान्तस्य संवाहनमासनशयनदानादिना श्रमापनयनं, रोगिणः परिचर्या औषधादिना, सुराणां हरिहरदुर्गादीनामर्चनं पूजनं, पादशौचं द्विजस्य पादावनेजनं, समस्तस्यापि द्विजशब्दस्य निःकृष्यानुषङ्गः। द्विजोच्छिष्टस्य मार्जनमपनयनं च प्रत्येकं गोप्रदानवत् गोप्रदानफलसमफलमित्यर्थः ॥ २०९ ॥

(मिता०) गोदानसमान्याह—

श्रान्तसंवाहनमिति । श्रान्तस्यासनशयनादिदानेन श्रमापनयनं श्रान्तसंवाहनम् । रोगिणां परिचर्या यथाशक्त्यौषधादिदानेन । सुरार्चनं हरिहरहिरण्यगर्भादीनां गन्धमाल्यादिभिराराधनम् । पादशौचं द्विजानां समानामधिकानां च । तेषामेवोच्छिष्टस्य मार्जनम् । एतान्यनन्तरोक्तेन गोदानेन समानि ॥ २०९ ॥

(वी०मि०) दानान्तराणि फलसहितान्याह त्रिभिः—

भूदीपा(१)श्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ॥
नैवेशिकं(२)स्वर्णधुर्यं दत्त्वा स्वर्गे महीयते ॥ २१० ॥

श्वादयोऽष्टौ सिद्धाः, प्रतिश्रयो वासगृहं, नैवेशिकं परस्य विवाहार्थं द्रव्यं, स्वर्णं सुवर्णं, धुर्यो भारक्षमो बलीवर्दः ॥ २१० ॥

(मिता०) भूदीपेत्यादि । भूः फ(३)लप्रदा । दीपा देवायतनादिषु । प्रतिश्रयः प्रवासिनामाश्रयः । निवेशनार्थं गार्हस्थ्यार्थं यत्कन्या दीयते तन्नैवेशिकम् । स्वर्णं सुवर्णम् । धुर्यो भा(४)रसहो बलीवर्दः । शेषं प्रसिद्धम् । एतान्भूदीपादीन्दत्त्वा स्वर्गलोके महीयते पूज्यते । स्वर्गफलं च भूमिदानादीनां न फलान्तरव्युदासार्थम् । मनुः (४।२२९)—'यत्किंचित्कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा । अपि गोचर्ममात्रेण भूमिदानेन शुद्ध्यति' ॥ तथा—'वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः । तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥ वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः । अनड्वहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम्' ॥ इत्यादि फलान्तरश्रवणात् । गोचर्मलक्षणं च बृहस्पतिना दर्शितम्—'सप्तहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम् । दश तान्येव गोचर्म दत्त्वा स्वर्गे महीयते' ॥ इति ॥ २१० ॥

गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ॥
यानं वृक्षं प्रियं शय्यां दत्त्वाऽत्यन्तं सुखी भवेत् ॥ २११ ॥

(वी० मि०) अभयस्य दानं परस्य भयाभावसम्पादनमात्रं विवक्षितम् । वृक्षमुपभोगार्हम् । यद् ग्रहीतुः प्रियम् । अत्यन्तं सुखी स्वर्गभागी ॥ २११ ॥

(मिता०) गृहधान्येत्यादि । गृहं प्रसिद्धम् । धान्यानि च शा-

---

(१) भूदीपाश्चान्न-इति क० पुस्तके पाठः । (२) नैवेशिकस्वर्णधुर्यान्-इति ख. पुस्तके पाठः ।
(३) भूः कृषिफलप्रदा ग. । (४) भारवाहो ग. ।

लिगोधूमादीनि । अभयं भीतत्राणम् । उपानहौ । छत्रम् । माल्यं मल्लिकादेः । अनुलेपनं कुङ्कुमचन्दनादि । यानं रथादि । वृक्षमुपजीव्यमाम्रादिकम् । प्रियं यद्यस्य प्रियं धर्मादिकम् । शय्यां च दत्त्वात्यन्तमतिशयेन सुखी भवति । न च हिरण्यादिवद्धस्ते दातुमशक्यत्वाद्धर्मस्य दानासंभवः। भूमिदानादावपि समानत्वात्। स्मृत्यन्तरेऽपि धर्मदानश्रवणात् । 'देवतानां गुरूणां च मातापित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित्' ॥ अपुण्यदाने तदेव वर्धते प्रतिग्रहीतुरपि लोभादिना प्रवृत्तस्य—'यः पापमबलं ज्ञात्वा प्रतिगृह्णाति दुर्मतिः । गर्हिताचरणात्तस्य पापं तावत्समाश्रयेत् ॥ समद्विगुणसाहस्रमानन्त्यं च प्रदातृषु' ॥ इति स्मरणात् । इह च सर्वत्र देशकालपात्रविशेषाद्दातृविशेषात्-('दाने फलं मया प्रोक्तं हिंसायां तद्वदेव हि') इति प्रतिग्रहीतृवृत्तिविशेषाच्च दातृप्रतिग्रहीत्रोः फलतारतम्यं द्रष्टव्यम् ॥ २११ ॥

सर्वदानमयं(४)ब्रह्म प्रदानेभ्योऽधिकं यतः ॥
तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम् ॥ २१२ ॥

(वी०मि०)दानप्रदानपदे कर्मव्युत्पादेयपरे। यतः सर्वदानमयं सर्वदेयप्रयोज्यफलप्रयोजकमतः प्रत्येकं सर्वदेयेभ्योऽधिकं ब्रह्म वेदः तद्ददत् अध्यापनादिना परस्मिन् सङ्क्रामयन् अविच्युतं कल्पपर्यन्तावस्थायि यथास्यात्तथा ब्रह्मलोकमवाप्नोति ॥ २१२ ॥

(मिता०) दानात्फलमुक्तमिदानीं दानव्यतिरेकेणापि दानफलावाप्तिहेतूनाह—

सर्वधर्मेत्यादि । यस्मात्सर्वधर्ममयं ब्रह्म अवबोधकत्वेन तस्मात्तद्दानं सर्वदानेभ्योऽधिकमतस्तद्ददध्यापनादिद्वारेण ब्रह्मलोकमवाप्नोति । अविच्युतं विच्युतिर्यथा न भवति । आ भूतसंप्लवं ब्रह्मलोकेऽवतिष्ठत इत्यर्थः । अत्र च ब्रह्मदानं परस्वत्वापादनमात्रं दानं, स्वत्वनिवृत्तेः कर्तुमशक्यत्वात् ॥ २१२ ॥

---

(१) धर्मादीनामसंभवः ख. ।
(२) दानेन क. ।
(३) प्रबलं ज्ञात्वा ग. ।
(४) सर्वधर्ममयं ब्रह्म—इति मुद्रितपुस्तकस्थः पाठः ।

(वी० मि०) दानप्रसङ्गेन प्रतिग्रहनिवृत्तिरूपं धर्मं फलसहितमाह—

प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम् ॥
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥२१३॥

विद्यावृत्ततपोभिः प्रतिग्रहे समर्थोऽपि अधिकृतोपि। एतेनाऽसामर्थ्यनिबन्धनं प्रतिग्रहाभावं व्यवच्छिनत्ति। प्रतिग्रहमिति कर्मव्युत्पन्नम्। नादत्ते स्वामिना दीयमानं न प्रतिगृह्णाति यद्यद्द्रव्यदातृणां ये ये लोकास्तत्तद्द्रव्यप्रतिग्रहनिवृत्तः स तान् तान् लोकान् पुष्कलान् समग्रानाप्नोति ॥ २१३ ॥

(मिता०) दातुः फलमुक्तम्, इदानीं दानव्यतिरेकेणापि दानफलावाप्तेर्हेतुमाह—

प्रतिग्रहेत्यादि। यः पात्रभूतोऽपि प्राप्तं प्रतिग्रहं सुवर्णादिकं नादत्ते न स्वीकरोति असौ यत्प्रयाप्तं नोपादत्ते तत्तद्दानशीलानां ये लोकास्तान्समग्रानाप्नोति ॥ २१३ ॥

(वी०मि०) 'न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः' इत्यनेनाऽभिशस्तादेः प्रतिग्रहः प्राङ् निषिद्धस्तत्र प्रतिप्रसवमाह—

कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः ॥
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥ २१४ ॥
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः ॥
अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः ॥ २१५ ॥
देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च ॥
सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥ २१६ ॥

कुशादिकं त्रयोदशविधं वस्तु दुष्कृतकर्मणोऽपि सम्बन्धि अयाचितमाहृतमुपनीतं न प्रत्याख्येयं नोपेक्ष्यम्। अनुपेक्षाप्रकारमेवाह ग्राह्यमिति। पयो दुग्धं, गन्धाश्चन्दनादयः, क्षितिर्भूमिः, धाना भ्रष्टयवाः। शेषं प्रसिद्धम्। चकारेण—

शय्यां गृहं कुशान् गन्धानपः पुष्पं मणीन् दधि।
मत्स्यान् धानाः पयो मांसं शाकं चैव न निर्णुदेत् ॥

एधोदकं मूलफलमन्नमभ्युद्यतं च यत् ।
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥

इति मनूक्तमण्यादिसमुच्चयः । कुलटा स्वैरिणी, पण्ढः क्लीवः, पतितो ब्रह्महादिः, द्विट् शत्रुः । तथाशब्देन चण्डालादिसमुच्चयः । एभ्योऽन्यत्र विना एतेषां कुशादिकमपि न ग्राह्यमित्यर्थः । देवेति । देवस्यातिथेर्वाऽर्चनार्थं, गुरवः मातापित्रादयः, भृत्याः भार्याद्याः तदर्थं च, आत्मनो वृत्तिर्वर्त्तनोपायो भोजनाच्छादनादिः तदर्थं च सर्वतो दुष्कृतकर्मादेरपि प्रतिगृह्णीयादित्यर्थः । प्रथमचकारादवश्यकर्तव्यं ऋणोपाकरणाद्यर्थमिति । द्वितीयचकारादात्मरोगानिवृत्त्याद्यर्थमिति समुच्चीयते । प्रथम इवकारो विशेषविहितातिरिक्ते सर्वतः प्रतिग्रहव्यवच्छेदार्थः । द्वितीयस्तु प्रतिगृह्णीयादित्यत्राऽन्वितः, तेनैतेषु निमित्तेषु पापान्तरासम्भवे दुष्कृतकर्मणोपि प्रतिग्रह आवश्यक इत्येतत्प्रदर्शनार्थः । अत्र कुलटेत्यादिकमत्राप्यन्वेति । तदाह विष्णुः—

गुरून् भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् ।
सर्वतः प्रतिगृह्णीयान्न तृप्येत स्वयं ततः ॥
एतेष्वपि च कार्येषु समर्थस्तत्प्रतिग्रहे ।
नाद्यात्कुलटापण्ढपतितेभ्यस्तथा द्विषः ॥

अत्र च दानान्तराणि दानसामान्येतिकर्तृतापात्रगुणदोषादयश्च विस्तरभयान्नात्र प्रपञ्चिता अग्रे वाच्याः ॥ २१३—२१६ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने दानप्रकरणम् ।

(मिता०) इदानीं सर्वप्रतिग्रहनिवृत्तिप्रसङ्गेऽपवादमाह—

कुशा इति । धानाः (१)भ्रष्टयवाः । क्षितिर्मृत्तिका । शेषं प्रसिद्धम् । एतच्च कुशादिकं स्वयमुपानीतं न प्रत्याख्येयम् । चकाराद् गृहादि । (मनुः ४।२५०)—'शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि । धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत्' ॥ तथा—'एधोदकं मूलफलमन्नमभ्युद्यतं च यत् । सर्वतः प्रतिगृह्णी(२)यान्मध्वथाभयदक्षिणाम्' ॥ इति (४।२४७) मनुस्मरणात् ॥ २१४ ॥

(मिता०) किमिति न प्रत्याख्येयमित्याह—

अयाचिताहृतमिति । यस्माद्ययाचिताहृतमेतत्कुशादि दुष्कृत-

---

(१) भ्रष्टतण्डुलाः क. ग. । (२) मध्वाज्याभय ग. ।

कारिणोऽपि संबन्धि ग्राह्यं, किमुत यथोक्तकारिणः । तस्मान्न प्रत्याख्येयम् । अन्यत्र कुलटाषण्ढपतितेभ्यः शत्रोश्च । कुलात्कुलमटतीति कुलटा स्वैरिण्यादिका । षण्ढस्तृतीयाप्रकृतिः ॥ २१५ ॥

(मिता०) प्रतिग्रहनिवृत्तेरपवादान्तरमाह—

देवेत्यादि । देवातिथ्यर्चनादेरावश्यकत्वात्तदर्थमना(१)त्मकारणात् पतिताद्यत्यन्तकुत्सितवर्जं सर्वतः प्रतिगृह्णीयात् । गुरवो मातापित्रादयः । भृत्याः भरणीयाः भार्यापुत्रादयः ॥ २१६ ॥

इति दानप्रकरणम् ।

(वी०मि०) अथ साङ्गसपरि(२)वारकं श्राद्धरूपं धर्ममभावाम्यावृत्तेत्यादिना प्रीता नृणां पितामहा इत्यन्तेनाऽभिदधानः प्रथमं श्राद्धकालानाह—

अमावास्याऽष्टका वृद्धिः कृष्णापक्षोऽयनद्वयम् ॥
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसङ्क्रमः ॥ २१७ ॥
व्यतीपतो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ॥
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥ २१८ ॥

अमावास्या कृष्णपञ्चदशी सर्वैव । अष्टका पौषमाघफाल्गुनाश्वनेषु कृष्णाष्टमी । वृद्धिः पुत्रजन्मादिः । कृष्णपक्षः सर्वमासीयः । सम्भवे पूर्णः, असम्भवे पञ्चम्यादि(३)स्तदसम्भवेपि या काचित्कृष्णपक्षीया तिथिः । अयनद्वयं उत्तरायणदक्षिणायनसङ्क्रान्तिदिनम् । द्रव्यं खड्गिमांसादि । ब्राह्मणसम्पत्तिः पङ्क्तिपावनादिब्राह्मणलाभः । विषुवत् मेषतुलयोः सूर्यसङ्क्रान्तिः, सूर्यस्य एकस्माद्राशे राश्यन्तरगमनं विषुवत् । अयनयोः सङ्क्रान्तित्वेपि पृथगभिधानं फलातिशयार्थम् । व्यतीपातो विष्कुम्भादिषु पठितो योगविशेषः । सूर्याचन्द्रमसोः सङ्क्रान्तिसाम्यमित्यन्ये । गजच्छाया—

योगो मघात्रयोदश्योः कुञ्जरच्छायसंज्ञकः ।
भवेन्मघायां संस्थेच शशिन्यर्के करे स्थिते ॥

इति लक्षितः कालः । चन्द्रसूर्ययोर्ग्रहणं राहूपरागः । श्राद्धं प्रति

---

(१) मनापत्करणात क. । (२) साङ्गपरिकरं—इति ख० पु० पाठः ।
(३) पञ्चम्यादिदर्शम्यादिः—इति क० पु० पाठः ।

रुचिः श्राद्धेच्छा। चकारेणाऽऽग्रहायणीश्रावण्यादीनामत्रानुक्तानां समुच्चयः। श्राद्धकाला इति। एवञ्च वृद्ध्यादिशब्दे (१)तत्कालपरा इति द्रष्टव्यम्। एवकारेण परस्परसाहित्यव्यवच्छेदः। तेन प्रत्येकममावास्यादेः श्राद्धकालत्वं पर्यवस्यति ॥ २१७-२१८ ॥

(मिता०) इदानीं श्राद्धप्रकरणमारभ्यते। श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः। तच्च द्विविधं पार्वणमेकोद्दिष्टमिति। तत्र त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणम्। एकपुरुषोद्देशेन क्रियमाणमेकोद्दिष्टम्। पुनश्च त्रिविधं नित्यं नैमित्तिकं काम्यं चेति। तत्र नित्यं नियतनिमित्तोपाधौ चोदितं यथाऽहरहरमावस्याष्टकादिषु। अनियतनिमित्तोपाधौ चोदितं नैमित्तिकं यथा पुत्रजन्मादिषु। फलकामनोपाधौ विहि(२)तं काम्यं यथा स्वर्गादिकामनायां कृत्तिकादिनक्षत्रेषु (तिथिषु च)। पुनश्च पञ्चविधं-'अहरहःश्राद्धं पार्वणं वृद्धिश्राद्धमेकोद्दिष्टं सपिण्डीकरणं चे'ति। तत्राहरहःश्राद्धं--'अन्नं पितृमनुष्येभ्यः' इत्यादिनोक्तम्। तथा च मनुः—(३।८२) (३)'कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा। पयोमूलफलैर्वापि पितृभ्यः प्रीति(४)मावहन्' ॥ इति ॥

अधुना पार्वणं वृद्धिश्राद्धं च दर्शयिष्यंस्तयोः कालानाह--

अमावास्येति। व्यतीपात इति च। यत्र दिने चन्द्रमा न दृश्यते सा अमावास्या तस्यामर्द्धव्यापिन्यामपराह्णव्यापिनी ग्राह्या। 'अपराह्णः पितृणाम्' इति वचनात्। अपराह्णश्च पञ्चधाविभक्ते दिने चतुर्थो भागस्त्रिमुहूर्तः। अष्टकाश्चतस्रः 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः' इत्याश्वलायनोक्ताः। वृद्धिः पुत्रजन्मादिः। कृष्णपक्षोऽपरपक्षः। अयनद्वयं दक्षिणोत्तरसंज्ञकम्। द्रव्यं कृस(५)रमांसादिकम्। ब्राह्मणसंपत्तिर्वक्ष्यमाणा। विषुवद्वयं मेषतुलयोः सूर्यगमनम्। सूर्यसंक्रम आदित्यस्य राशेः राश्यन्तरगमनम्। अयनविषुवतोः संक्रान्तित्वे सिद्धेऽपि पृथगुपादानं फलातिशयप्रतिपादनार्थम्। व्यतीपातो योगविशेषः। गजच्छाया—'यदेन्दुः पितृदैवत्ये

(१) वृद्ध्यादिशब्दात्—इति ख० पु० पाठः। (२) चोदितं क.।
(३) दयादिति मुद्रितपुस्तकस्थः पाठः।
(४) प्रीतिमक्षयामिति मुद्रितपुस्तके पाठः, प्रीतिमुदहन्निति क्वचिदन्यत्र।
(५) कृष्णसारमांसादि ख.।

हंसश्चैव करे स्थितः । (१)यस्यां तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तिता' ॥ इति परिभाषिता । हस्तिच्छायेति केचित् । सेह न गृह्यते कालप्रक्रमात् । ग्रहणं सोमसूर्ययोरुपरागः । यदा च कर्तुः श्राद्धं प्रति रुचिर्भवति तदापि । चशब्दाद्युगादिप्रभृतयः । एते श्राद्धकालाः । यद्यपि 'चन्द्रसूर्यग्रहे नाद्यात्' इति ग्रहणे भोजननिषेधस्तथापि भोक्तुर्दोषो दातुरभ्युदयः ॥ २१७—२१८ ॥

(वी० मि०) श्राद्धीयब्राह्मणान् कथयन्नेव पूर्वोक्तां ब्राह्मणसम्पत्तिं विवृणोति—

अग्र्याः सर्वेषु देवेषु श्रोत्रियो ब्रह्मविद् युवा ॥
वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः(२) ॥ २१९ ॥
स्वस्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः ॥
त्रिणाचिकेतदौहित्रशिष्यसम्बन्धिबान्धवाः ॥ २२० ॥
कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः ॥
पितृमातृपराश्चैव ब्राह्मणाः श्राद्ध(३)सम्पदः ॥ २२१ ॥

सर्वेषु ऋगादिषु वेदेषु अग्र्या अस्खलिताध्ययनाः, श्रोत्रियः प्राक् लक्षितः, ब्रह्मवित् आत्मतत्त्वज्ञः, युवा नातिबालो नातिवृद्धः, वेदस्य मन्त्रब्राह्मणात्मकस्याऽर्थवित् , ज्येष्ठसामा ज्येष्ठसाम सामविशेषस्तद्योगात्पुरुषो ज्येष्ठसामा, त्रिमधुः (४)मध्वाख्यग्वेदैकदेशाध्यायी, त्रिसुपर्णः ऋग्यजुषोरेकदशस्तदध्येता त्रिसुपर्णः, स्वस्रीयो भागिनेयः, ऋत्विक् प्राग्लक्षितः, जामाता दुहितुः पतिः, याज्यः आर्त्विज्येन सम्पाद्ययागकः, त्रिणाचिकेतोऽध्वर्यवेदभागस्तदध्येता त्रिणाचिकेतः, सम्बन्धिनो मातामहादयः, बान्धवा मातृष्वस्रेयादयः, कर्मनिष्ठा नित्यनैमित्तिकानुष्ठानपराः, तपोनिष्ठाश्चान्द्रायणाद्याचरणशीलाः, पञ्चाग्निः सत्यावसथ्याहवनीयगार्हपत्यदक्षिणाग्निपञ्चकवान्, पितृमातृपराः पितृभक्ता मातृभक्ताश्च, चकारात् ज्ञाननिष्ठादयः । ब्राह्मणा एव न क्षत्रियादयः । श्राद्धे सम्पत् अक्षयपितृतृप्तिस्तद्धेतवः ॥ २१९—२२१ ॥

---

(१) याम्या तिथिः ख. ग. । (२) त्रिसुपर्णिकः—इति मुद्रितपुस्तके पाठः ।
(३) श्राद्धसम्पदे—इति क० पुस्तके पाठः ।
(४) त्रिमध्वाख्य०— इति ख० पु० पाठः ।

(मिता०) अहरहः श्राद्धव्यतिरिक्तवक्ष्यमाणचतुर्विधश्राद्धेषु ब्राह्मणसम्पत्तिमाह—

अग्र्या इति। सर्वेषु वेदेषु ऋग्वेदादिषु अन्यमनस्कतयाप्यजस्रस्खलिताध्ययनक्षमा अग्र्याः। श्रोत्रियः श्रुताध्ययनसंपन्नः। वक्ष्यमाणं ब्रह्म यो वेत्ति असौ ब्रह्मवित्। युवा मध्यमवयस्कः। सर्वस्येदं विशेषणम्। मन्त्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित्। ज्येष्ठसामेति सामविशेषस्तदध्ययनाङ्गव्रतं च तद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा। त्रिमधुः ऋग्वेदैकदेशस्तद्व्रतं च तद्व्रताचरणेन (१)तदधीते इति त्रिमधुः। त्रिसुपर्णं ऋग्यजुषोरेकदेशस्तद्व्रतं तद्व्रताचरणेन यस्तदधीते स त्रिसुपर्णिकः। एते ब्राह्मणाः श्राद्धसंपद इति (२)वक्ष्यमाणेन संबन्धः ॥ २१९ ॥

(मिता०) स्वस्रीय इति। स्वस्रीयो भागिनेयः। ऋत्विगुक्तलक्षणः। जामाता दुहितुर्भर्ता। त्रिणाचिकेतं यजुर्वेदैकदेशः तद्व्रतं च तद्व्रताचरणेन यस्तदध्यायी स त्रिणाचिकेतः। अन्यत्प्रसिद्धम्। एते च पूर्वोक्ताग्र्यश्रोत्रियाद्यभावे वेदितव्याः। 'एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं प्रोक्तः सदा सद्भिरगर्हितः' ॥ इत्यभिधाय [३।१४७] मनुना स्वस्रीयादीनामभिहितत्वात् ॥ २२० ॥

(मिता०) कर्मनिष्ठा इति। कर्मनिष्ठा विहितानुष्ठानतत्पराः। तपोनिष्ठास्तपःशीलाः। सभ्यावसथ्यौ त्रेताग्नयश्च यस्य सन्ति स पञ्चाग्निः पञ्चाग्निविद्याध्यायी च। ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च। पितृमातृपरास्तत्पूजापराः। चकारात् ज्ञाननिष्ठादयः। ब्राह्मणाः न क्षत्रियादयः। (३)श्राद्धसंपदः श्राद्धेष्वक्ष्यफलसंपत्तिहेतवः ॥ २२१ ॥

(वी० मि०) श्राद्धे पात्रत्वानर्हानाह—

रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा ॥
अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ॥ २२२ ॥
भृतकाध्यापकः क्लीवः कन्यादूष्यभिशस्तकः ॥
मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः ॥ २२३ ॥

---

(१) तदध्यायी क. ग.। (२) वक्ष्यमाणक्रियासंबन्धः ख. ग.।
(३) श्राद्धसंपदे क. ग.।

मातापितृगुरुत्यागी कुण्डाशी वृषलात्मजः ॥
परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निन्दिताः ॥ २२४ ॥

रोगी महारोगवान्, हीनमतिरिक्तं वाऽङ्गं यस्य स तथा, काणो विकलचक्षुः, तेनाऽन्धसाधारण्यम्, पौनर्भवो द्विरूढापुत्रः, तथापदेन माहिष(१)कादिपरिग्रहः, अवकीर्णी स्खलितब्रह्मचर्यः, कुण्डगोलौ-

परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डस्तु मृते तस्मिंस्तु गोलकः ॥

इति मनुनोक्तौ, कुनखी सङ्कुचितनखः, श्यावदन्तकः स्वभावश्यामदशनः, भृतकाध्यापकः वेतनग्रहणेनाऽध्यापकः, क्लीबः-

षण्ढको घातजः षण्ढः पण्डः क्लीबो नपुंसकः ।
कीलकश्चेति षोढाऽसौ क्लीबभेद उदाहृतः ॥

इति देवलोक्तः, कन्यादूषी दोषख्यापनेन संभोगादिना वा कन्याया दूषणकारी, अभिशस्तकः ब्रह्महत्यादिकारित्वेनाक्षेपात्सन्दिह्यमानः, मित्रध्रुक् मित्रद्रोहकारी, पिशुनः परदोषप्रकाशनशीलः, सोमविक्रयी सोमलताविक्रेता, परिविन्दकः-

परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ।

इत्युक्तः, शास्त्रानुमतत्यागनिमित्तं विना मातुः पितुर्गुरोर्वा त्यागकर्ता, कुण्डाशी-

चतुःषष्टिपलैः प्रस्थः कुण्डं प्रस्थचतुष्टयम् ।
तावदाहारको विप्रः कुण्डाशीत्युच्यते बुधैः ॥

इति देवलोक्तः । (२)कुण्डगोलकावुपक्रम्य-

यस्तयोरन्नमश्नाति स कुण्डाशीति कथ्यते ।

इति देवलोक्तश्च, वृषलो धर्मत्यागी तदात्मजः, परपूर्वा पुनर्भूस्त्र्याः परिणेता, स्तेनः चौर्यशीलः, कर्मदुष्टा निषिद्धवाणिज्यादिकरणशीलाः चकारान्वितवदेवलकादीनां स्मृत्यन्तरोक्तानां परिग्रहः ॥ २२२-२२४ ॥

(मिता०) वर्ज्यानाह--

रोगीति । रोगी महारोगोपसृष्टः । हीनमतिरिक्तं वाङ्गं यस्यासौ

---

(१) माहिषिकादिपरिग्रहः-इति ख० पु० पाठः ।
(२) कुण्डगोलकौ-इत्यारभ्य धर्मत्यागी-इत्यन्तं नास्ति ख० पुस्तके ।

हीनातिरिक्ताङ्गः। एकेनाक्षणा यः पश्यति स काणः। एतस्मादेवान्धबधिर(१)विद्धप्रजननख(२)लतिदुश्चर्मप्रभृतयो निरस्ताः। पुनर्भूरुक्तलक्षणा तस्यां जातः पौनर्भवः। अवकीर्णी ब्रह्मचर्य एव स्खलितब्रह्मचर्यः। कुण्डगोलौ-'परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ। पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः'॥ (मनुः ३। १७४) इत्येवमुक्तलक्षणकौ। कुनखी कु(३)त्सितनखः। श्यावदन्तकः स्वभावात्कृष्णदशनः। एते श्राद्धे निन्दिता इति वक्ष्यमाणेन सम्बन्धः॥ २२२॥

(मिता०) भृतकेत्यादि। वेतनग्रहणेन' योऽध्यापयति स भृताध्यापकः। वेतनदानेन च योऽधीते सोऽपि। क्लीवो नपुंसकः। असन्धिः सन्धिर्वा दोषैर्यः कन्यां दूषयति स कन्यादूषी। असता सता वा ब्रह्महत्यादिनाभियुक्तोऽभिशस्तः। मित्रध्रुक् मित्रद्रोही। परदोषसंकीर्तनशीलः पिशुनः। सोमविक्रयी यज्ञे सोमस्य विक्रेता। परिविन्दकः परिवेत्ता। ज्येष्ठेऽकृतदारेऽकृताग्निपरिग्रहे वा यः कनीयान् दारपरिग्रहमग्निपरिग्रहं वा कुर्यात्स परिवेत्ता। ज्येष्ठस्तु परिवित्तिः। यथाह मनुः (३।१७१)-'दाराग्निहोत्रसंयोगं (४)यः करोत्यग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः'॥ इति। एवं दातृयाजकावपि। 'परिवित्तिः परिवेत्ता यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः'॥ इति (३। १७२) मनु(५)वचनात्॥२२३॥

(मिता०) मातेत्यादि। विना कारणेन मातापितृगुरून्यस्त्यजति स मातापितृगुरुत्यागी। एवं भार्यापुत्रत्याग्यपि। 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्'॥ इति समाननिर्देशात्। कुण्डस्यान्नं योऽश्नात्यसौ कुण्डाशी। एवं गोलकस्यापि। 'यस्तयोरन्नमश्नाति स कुण्डाशीति कीर्तितः' इति वचनात्। वृषलो निर्धर्मस्तत्सुतो वृषलात्मजः। परपूर्वा पुनर्भूः तस्याः पतिः परपूर्वापतिः। अदत्तादायी स्तेनः। कर्मदुष्टाः शास्त्रविरुद्धकारिणः। चक्रारात्मितवदेवलकप्रभृतयः।

---

(१) क्षुद्रप्रजन ग. ख.। (२) खलतिर्निष्केशशिराः खल्वाटः। (३) संकुचितनखः ङ.।
(४) कुरुते योऽग्रजे स्थिते क.। (५) इति समानदोषश्रवणाद् ग.।

एते श्राद्धे निन्दिताः प्रतिषिद्धाः। अन्ध्याः सर्वेषु वेदेष्वित्यादिना श्राद्धयोग्यब्राह्मणप्रतिपादनेनैव तद्व्यतिरिक्तानामयोग्यत्वे सिद्धेऽपि पुनः केषांचिद्व्यादीनां प्रतिषेधवचनमुक्तलक्षणब्राह्मणासम्भवे प्रतिषेधरहितानां प्राप्त्यर्थम् ॥ २२४ ॥

(वी० मि०) इदानीं श्राद्धाङ्गनिमन्त्रणमाह—

निमन्त्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः ॥

आत्मवान् क्रोधाद्यनाक्रान्तमनस्कः, शुचिरशुद्धिरहितः, ब्राह्मणान् श्राद्धपात्रतौपयिकविशेषणवतः पूर्वेद्युः श्राद्धपूर्वदिने पूर्वदिवसीयरात्राविति यावत्। निमन्त्रयेत श्राद्धे नियुञ्जीत। पूर्वदिननिमन्त्रणाभावे तु श्राद्धदिनेऽपि (१)निमन्त्रणम्।

श्वः कर्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।
निरामिषं सकृद् भुक्त्वा सर्वभुक्तजने गृहे ॥
असंभवे परेद्युर्वा ब्रह्मणांस्तान्निमन्त्रयेत्।

इति देवलवचनात्। परेद्युः श्राद्धदिने प्रातः श्राद्धाव्यवहितपूर्वकाले वा ॥

(वी० मि०) श्राद्धकर्तुः श्राद्धनिमंन्त्रितब्राह्मणस्य च नियममाह—

तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्मभिः ॥ २२५ ॥

मनसा वाचा कायकर्मणा च यः संयमः श्राद्धे निषिद्धानाचमनाचरणं तद्युक्तैस्तैर्ब्राह्मणैः। चकारात् श्राद्धकर्त्राऽपि संयतेन भाव्यम्। अपिकारेण कर्मभिः पञ्चान्वितेन चक्षुरादिव्यापारसमुच्चयः ॥२२५॥

(मिता०) एवं श्राद्धकालान्ब्राह्मणांश्चोक्त्वाऽधुना पार्वणप्रयोगमाह—

निमन्त्रयेतेति। पूर्वोक्तान्ब्राह्मणान् श्राद्धे क्ष(२)णः क्रियतामिति पूर्वेद्युर्निमन्त्रयेत प्रार्थनया क्षणमभ्युपगमयेत्। अपरेद्युर्वा। 'पुर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान्'॥ इति (३।१८७) मनुस्मरणात्। आत्मवान् शोकोन्मादादिरहितः सन् दोषवान्न भवति। यद्वा आत्मवान्नियतेन्द्रियो भवेत्। शुचिः प्रयतश्च। तैरपि निमन्त्रितैर्ब्राह्मणैर्मनोवाक्कायव्यापारैः संयतैर्नियतैर्भवितव्यम् ॥ २२५ ॥

---

(१) अपि- इति क० पुस्तके नास्ति। (२) अवसर उत्सवो वा क्षणः ग०।

(बी० मि०) श्राद्धाव्यवहितपूर्वकृत्यमाह—

अपराण्हे समभ्यर्च्य स्वागतेनागतांस्तु तान् ॥
पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥ २२६ ॥
दैवे (१)युग्मान् यथाशक्ति पित्र्येऽयुग्मांस्तथैव च ॥
परिस्तृते शुचौ देशे दक्षिणा(२)प्लवने तथा ॥ २२७ ॥

अपराह्णे पञ्चधा विभक्तस्यान्हश्चतुर्थभागे त्रिमुहूर्तात्मके काले देशे च शुचौ अमेध्याद्यनुपहते परितो वस्त्रादिना वेष्टिते दक्षिणाप्लवने यथादक्षिणमवनते तथाशब्दाद्गोमयोपलेपादिसंस्कृते आसनेषु ब्राह्मणोपवेशनार्थमुपकल्पितेषु कुतपवृष्यादिषु पवित्रं पूर्वलक्षितं कुशाश्च पाणौ यस्य तादृशः श्राद्धकर्ता तानागतान् ब्राह्मणान् आचान्तान् कृताचमनान् इदं च स्नानादेरुपलक्षकं, स्वागतेन स्वागतप्रश्नादिना समभ्यर्च्य सत्कृत्य उपवेशयेत्। ब्राह्मणान् संख्यया विशिनष्टि। दैवे विश्वेदेवश्राद्धे यथाशक्ति युग्मान् द्विचतुरादिकान् पित्र्ये प्रमीतोद्देशकश्राद्धे यथाशक्ति अयुग्मानेकत्र्यादीन् विषमसंख्यकान्। तुशब्देनाचान्तानित्यनन्तरमन्वितेनाऽनाचान्तादिव्यवच्छेदः। एवकारार्थो युग्मानित्यत्रान्वेति। तथाशब्देन चाऽयुग्मानित्यत्र तदन्वयः समुच्चीयते। सति सम्भवे चायं नियमः। असम्भवे तु पक्षान्तरमग्रिमश्लोके स्पष्टम्। चकारेण—

भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम्।
दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत् ॥

इति शङ्खोक्तस्यैकब्राह्मणपक्षस्य समुच्चयः। अपराह्ण इति तच्छ्राद्धाव्यवहितपूर्वकालोपलक्षकम् ॥ २२६-२२७ ॥

(मिता०) अपराह्ण इति। अपराह्णे उक्तलक्षणे समभ्यर्च्य तान्निमन्त्रितान्ब्राह्मणानाहूय स्वागतवचनेन पूजयित्वा कृतपादधावनानाचान्तान् क्लृप्तेष्वासनेषु पवित्रपाणिः पवित्रपाणीनुपवेशयेत्। यद्यप्यत्र सामान्येनापराह्ण इत्युक्तं तथापि कुतपे प्रारभ्य तदादि पञ्चसु मुहूर्तेषु परिसमापनं श्रेयस्करम्। 'अह्नो मुहूर्ता वि(३)ज्ञेया दश पञ्च च सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥

---

(१) युग्मान्दैवे—इति मुद्रितपुस्तके पाठः।
(२) दक्षिणाप्रवणे—इति मुद्रितपुस्तके पाठः। (३) विज्ञेया क.।

मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः । तस्मादनन्तफलदस्तस्यारम्भो विशिष्यते ॥ ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् । मुहूर्तपञ्चकं ह्येतत्स्वधाभवनमिष्यते' ॥ इति वचनात् । तथान्यदपि श्राद्धोपयोगि कुतपसंज्ञकमुक्तम् । 'मध्याह्नः खड्गपात्रं च तथा नेपालकम्बलः । रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥ पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः । अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः' ॥ इति ॥ २२६ ॥

(मिता०) युग्मानिति । दैवे आभ्युदयिके श्राद्धे युग्मान् समान् ब्राह्मणानुपवेशयेत् । कथं यथाशक्ति शक्तिमनतिक्रम्य । तत्र वैश्वदेवे द्वौ द्वौ, मात्रादीनां तिसृणामेकैकस्या द्वौ द्वौ, तिसृणां वा द्वौ । एवं पित्रादीनामेकैकस्य द्वौ द्वौ त्रयाणां वा द्वौ । एवं मातामहादीनां च वर्गत्रये वैश्वदेवं पृथक् तन्त्रं वा । पित्र्ये पार्वणश्राद्धे अयुग्मान्विषमानुपवेशयेदिति सम्बध्यते । एतच्च परिस्तृते सर्वतः प्रच्छादिते शुचौ गोमयादिनोपलिप्ते दक्षिणाप्रवणे दक्षिणतोऽवनते देशे कार्यम् ॥२२७॥

(वी० मि०) दैवे युग्मानित्याद्युक्तमेव न प्रसज्येत विस्तर इति वचनानुसारेण विवृण्वानो लघुतरादिकल्पानप्याह—

दैवे द्वौ प्राक् त्रयः पित्र्य उदगेकैकमेव वा ॥
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम् ॥ २२८ ॥

दैवे विश्वेदेवश्राद्धे एकस्मिन्द्वौ प्राक् पूर्वाभिमुखौ नियोज्यौ । पित्र्ये पित्रादिश्राद्धत्रये प्रत्येकमेकैको ब्राह्मण इति मिलित्वा त्रयो ब्राह्मणा उदक् उदङ्मुखा नियोज्याः । अथवा एकस्मिन् दैव एकः, पित्रादित्रये चैकः । मातामहानां मातामहादित्रयस्य श्राद्धत्रये एवं तदीयदैवे द्वौ तत्र प्रत्येकमेकैकामिति त्रयोऽथवा तदीयविश्वेदेवश्राद्धे एकः । तेषु च मिलितेष्वेक इत्यर्थः । तन्त्रं वेति विश्वेदेवसम्बन्धिब्राह्मणनिमन्त्रणं तन्त्रं, पित्रादित्रयोद्देशेनैकमेव तेन विश्वेदेवश्राद्धयोरेक एव ब्राह्मणः, पित्रादित्रयश्राद्धे एकः, मातामहादित्रयश्राद्धे चैक इत्युक्तमेवाऽत्राऽपि कल्पे बोध्यम् । इहाऽऽश्वलायनः—'एकैकमेवैकैकस्ये'ति । प्रतिश्राद्धमेकैको ब्राह्मण इत्यर्थः । अत्रैते कल्पाः । पित्रादिसम्बन्धिविश्वेदेवश्राद्धे द्वौ, मातामहादिसम्बन्धिविश्वेदेवश्राद्धे च द्वौ, पित्रादिषु चैकैकः, मातामहादिषु त्रिषु चैकैक इति दश ब्राह्म-

णाः। (१)तदसम्भवे प्रतिश्राद्धमेकैक इत्यष्टौ ब्राह्मणा आश्वलायनोक्ताः। तदसम्भवे पित्रादिसम्बन्धिविश्वेदेवश्राद्धे एकः, मातामहादिसम्बन्धिविश्वेदेवश्राद्धे चैकः, पित्रादित्रयश्राद्धे चैकः, मातामहादित्रयश्राद्धेष्येकः इति चत्वारो ब्राह्मणाः। तदसम्भवेऽपि विश्वेदेवश्राद्धद्वये एकः, पित्रादिश्राद्धत्रय एक इति त्रयो ब्राह्मणाः। एषां चतुर्णां कल्पानामसम्भवे तु षट्पुरुषश्राद्धं एको ब्राह्मणो दैवे तु नास्त्येव ब्राह्मण इत्यपिशब्दस्यार्थः। यदाह शङ्खः--

भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम्।
देवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत्॥

नैवेद्यं कृत्वाऽन्नं सङ्कल्प्य। अत्र कल्पे वैश्वदेवान्नस्य--

प्रास्येदन्नं तदग्नौ तु दद्याद्वा ब्रह्मचारिणे।

इति वाचनिको विनियोगः। अत्र वाशब्दोऽनास्थायां, तेन जलप्रक्षेपादिकमप्यनुमतम्। एवं च विश्वेदेवश्राद्धेऽपात्रकत्व(२)दर्शनादेकस्याऽपि ब्राह्मणपात्रतायोग्यस्याऽलाभे पित्रादिश्राद्धेऽप्यपात्रकत्वं न्यायतौल्यात् लिखितवचनस्यापि सर्वशक्तिन्यायमूलकत्वात्। अन्यथाऽदृष्टार्थतापत्तेरित्यवधेयम्। एकैकमेवेत्येवकारो न प्रसज्येत विस्तर इति वचनस्वरसाद्विस्तरे दोषशङ्कायां तं व्यवच्छिनत्ति। विस्तरे दोषशङ्काविरहे तु ब्राह्मणाधिक्यमपि न्याय्यम्। 'एकैकस्य द्वौ द्वौ च त्रीन् त्रीन् वा वृद्धौ फलभूयस्त्व'मित्याश्वलायनवचनादिति दिक्। अत्र तन्त्रं वा वैश्वदेविकमित्यभिधानात्पित्रादिश्राद्धानां प्रयोगैक्यं स्फुटमवगम्यते। प्रयोगभेदे तन्त्रत्वासम्भवादिति द्रष्टव्यम्॥ २२८॥

(मिता०) अयुग्मान् पित्र्य इति पार्वणश्राद्धाङ्गभूते वैश्वदेवेप्ययुग्मप्रसङ्गे इदमारभ्यते--

द्वौ दैव इति। दैवे वैश्वदेवे द्वौ ब्राह्मणौ प्राङ्मुखावुपवेश्यौ। पित्र्ये अयुग्मानित्यविशेषप्रसंगे विशेष उच्यते पित्र्ये त्रय इति। पित्र्ये पित्रादिस्थाने त्रय उदङ्मुखा उपवेश्याः। पक्षान्तरमाह-एकैकमेवचा। वैश्वदेवे पित्र्ये च एकमेकमुपवेशयेत्। सम्भवतो विकल्पः। मातामहानामप्येवं श्राद्धे निमन्त्रणादि। द्वौ दैवे प्राक् त्रयः पित्र्ये उदगे-

(१) एतद०-इति ख. पु. पाठः।
(२) दर्शनात्-इत्यारभ्य श्राद्धेऽप्यपात्रकत्वं-इत्यन्तं क. पुस्तके नास्ति।

कैकमेव वेत्येव मतं पितृश्राद्धवत्कर्तव्यम् । पितृश्राद्धं मातामहश्राद्धे च वैश्वदेविकं पृथक् तन्त्रेण वा कर्तव्यम् । तन्त्रशब्दः समुदायवाचकः । यदा तु द्वावेव ब्राह्मणौ लब्धौ तदा वैश्वदेवे पात्रं प्रकल्प्य उभयत्रैकैकं ब्राह्मणं नियुञ्ज्यात् । यथाह वसिष्ठः-'यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत् । प्रास्येदन्नं तदग्नौ तु दद्याद्वा ब्रह्मचारिणे' ॥ इति ॥ २२८ ॥

(वी० मि०) प्रागुक्तोपवेशनानन्तरकृत्यं श्राद्धप्रयोगान्तर्गतं चाह 'रजनीं ब्राह्मणैः सह' इत्यन्तेन--

पाद(१)क्षालनं दत्त्वा विष्टरार्थं कुशानपि ॥
आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥ २२९ ॥

पादप्रक्षालनं ततः स्नात्वा निवृत्तेभ्यः प्रत्युपस्थाय कृताञ्जलिः ।
पाद्यमाचमनीयं च सम्प्रयच्छेद्यथाक्रमम् ।

इति देवलोक्तं पाद्यादि पात्रब्राह्मणाय दत्त्वा विष्टरार्थं ब्राह्मणस्य श्राद्धस्थलोपवेशनार्थोपकल्पितवृष्यादुपर्यासनार्थम्, अपिशब्दात् पादयोः कुशान् दत्त्वा आस्तीर्य । कुशानिति बहुवचनमासनत्वाभिप्रायेण । यदाह देवलः--

ये चाऽत्र विश्वेदेवार्थं विप्राः पूर्वं निमन्त्रिताः ।
प्राङ्मुखान्यासनान्येषां द्विदर्भोपहितानि च ॥
दक्षिणामुखयुक्तानि पितृणामासनानि च ।
दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ॥

केचित्तु विश्वेदेवपित्र्याद्यासनार्थं कुशानुत्सृजेत् इति व्याचक्षते । तन्मतेऽपि तत्पूर्वकृत्यगायत्रीजपादेः समुच्चयः । अनुज्ञातो विश्वान् देवान् आवाहयिष्य इति पृष्टेन विश्वेदेवब्राह्मणेनाऽऽवाहयेत्यनुज्ञातः श्राद्धकर्ता 'विश्वेदेवास आगते'त्यादिकया ऋचा विश्वेदेवानावाहयेत् । तथा च कात्यायनः-'आसनेषु दर्भानास्तीर्य विश्वान्देवानाहयिष्य इति पृच्छयाऽऽवाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयावाह्यावकीर्ये'ति । अत्र क्वचित्स्मृत्यन्तरोक्तेतिकर्तव्यताया अनभिधानेऽपि सर्वशाखाधिकरणन्यायेन तत्समुच्चयोऽवगन्तव्यः ।

(१) पाणिप्रक्षालनं—इति मुद्रितपुस्तके पाठः ।

ग्रन्थकृता तु श्राद्धप्रयोगस्यातिप्रसिद्धत्वादेकदेशप्रदर्शनेन कटाक्षित इति मन्तव्यम् ॥ २२९ ॥

(मिता०) पाणिप्रक्षालनमिति । तदनन्तरं वैश्वदेवार्थब्राह्मणहस्ते जलं दत्त्वा विप्रार्थं कुशांश्च युग्मान् आद्विगुणितानासने दक्षिणतो दत्त्वा विश्वान्देवानावाहयिष्ये इति ब्राह्मणान् पृष्ट्वा तैरावाहयेत्यनुज्ञातो 'विश्वेदेवास आगत' इत्यनयर्चा 'आगच्छन्तु महाभागाः' इत्यनेन च स्मार्तेन मन्त्रेण तानावाहयेत् । एतच्च यज्ञोपवीतिना(१) प्रदक्षिणं च कार्यम् । 'अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्' इति पित्र्ये विशेषस्मरणात् ॥ २२९ ॥

यवैरन्ववकीर्याऽथ भाजने सपवित्रके ॥
शन्नोदेव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा ॥ २३० ॥
या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिःक्षिपेत् ॥
दत्त्वोदकं गन्धमाल्यं धूपं (२)वस्त्रं सदीपकम् ॥ २३१ ॥
तथाच्छादनदानं च करशौचार्थमम्बु च(३) ॥

(वी० मि०) अथावाहनानन्तरं यवैर्देवश्राद्धभूमीमन्ववकीर्य्य सपवित्रके पूर्वलक्षितपवित्रवति भाजनेऽर्घपात्रे शन्नोदेवीरित्यादिकया ऋचा पयो जलं क्षिप्त्वा यवोसि यवयेत्यादियजुषा यवान् क्षिप्त्वा ।

अर्घ्या गन्धैश्च पुष्पैश्च ताः प्रपूज्याः प्रयत्नतः ।

इति ब्रह्मपुराणवचनात् । ब्राह्मणानां हस्तेषु उदकान्तरं दत्त्वा उक्तपयोरूपमर्घ्यं 'या दिव्या आपः पयसे'त्यादिमन्त्रेण विनिःक्षिपेत् दद्यादित्यर्थः । तदाह कात्यायनः-'एकैकस्यैकेन ददाति सपवित्रेषु हस्तेषु या दिव्या आप इत्यसावेष तेऽर्घ' इति । गन्धेति । गन्धादिपञ्चकं विनिःक्षिपेदित्यनुषज्यते । धूपं वस्त्रमित्यत्र धूपदानमिति पाठे तु कर्तव्यमिति शेषः । सदीपकमिति च गन्धमाल्यविशेषणम् । अत्र च 'गन्धपुष्पधूपदीपवाससां च प्रदान'मिति कात्यायनवचनाद्वस्त्रोत्तरं गन्धपूर्वमिति वचनाद्वस्त्रोल्लेखः पश्चादवगन्तव्यः । एतच्चान्नो-

(१) धीतिना सव्येन च ख. । (२) धूपदानं इति मुद्रितपुस्तके पाठः ।
(३) इदमर्धं क. ख. पुस्तकयोर्नास्ति ।

त्सर्गान्तकर्मोपलक्षकम् । अत्र यद्यपि पदार्थानुसमयः पार्वणे कात्यायनादिभिरुक्तः, तथापीह काण्डानुसमयप्रतिपादनं सपिण्डनपरमित्यविरोधः ।

सपिण्डीकरणं श्राद्धं देवपूर्वं निवेदयेत् ।

इति शातातपेन प्रकृतिविकृति(१)न्यायप्राप्तस्य देवपूर्वत्वस्य काण्डानुसमयबोधनार्थमभिधानात् । वैजवापगृह्ये तु स्फुट एव सपिण्डीकरणे काण्डानुसमयः ॥

अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम् ॥ २३२ ॥
द्विगुणांस्तु कुशान्दत्त्वा ह्युशन्तस्त्वेत्यृचा पितॄन् ॥
आवाह्य तदनुज्ञातो जपेदायन्तुनस्ततः ॥ २३३ ॥

(वी० मि०) ततो दैवकर्मानन्तरं अपसव्यं प्राचीनावीतं कृत्वा द्विगुणान्मोटितान् कुशान् पितॄणामर्थे आसनरूपान् अप्रदक्षिणं वामावर्तेन दत्त्वा उत्सृज्य पितॄनावाहयिष्य इति पृष्टेन पितृब्राह्मणेनावाहयेत्यनुज्ञातः श्राद्धकर्ता 'उशन्तस्त्वा निधीमही'त्यनया ऋचा पितॄनावाह्य ततस्तिलाविकिरणानन्तरमिति बुद्धिस्थपरामर्शः । 'आयन्तु नः पितर' इत्यादिमन्त्रं जपेत् ॥ २३०—२३३ ॥

(मिता०) यवैरिति । ततो वै(२)श्वदेवार्थं ब्राह्मणसमीपे भूमिं प्रादक्षिण्येन यवैरन्ववकीर्य अनन्तरं तैजसादिभाजने सपवित्रके कुशयुग्मान्तर्हिते 'शंनोदेवीरभिष्टय' इत्यनयर्चापः क्षिप्त्वा 'यवोसि धान्यराजो वा' इत्यादिना मन्त्रेण यवान् ततो गन्धपुष्पाणि च क्षिप्त्वाऽनन्तरं अर्घ्यपात्रपवित्रान्तर्हितेषु ब्राह्मणहस्तेषु 'या दिव्या आपः पयस' इत्यादिना मन्त्रेण विश्वेदेवा इदं वोऽर्घ्यं इत्यर्घ्योदकं विनिक्षिपेत् ॥

(मिता०) दत्त्वेति । अथ करशौचार्थमुदकं दत्त्वा यथाक्रमं गन्धपुष्पधूपदीपदानं कुर्यात् तथाच्छादनदानं च । गन्धादीनां स्मृत्यन्तरोक्तो विशेषो द्रष्टव्यः । 'चन्दनकुङ्कुमकर्पूरागरुपद्मकान्युपलेपनार्थम्' इति विष्णुनोक्तम् । पुष्पाणि च-'श्राद्धे जात्यः प्रशस्ताः स्युर्मल्लिका श्वेतयूथिका । जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम्' ॥

(१) विकृति—इति क० पुस्तके नास्ति ।
(२) विश्वेदेवार्थं ख. ।

इत्युक्तानि। वर्ज्यानि च—'उग्रगन्धीन्यगन्धीनि चैत्यवृक्षोद्भवानि च। पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च' ॥ 'न कण्टकिजं, (१)कण्टकिजमपि शुक्लं सुगन्धि यत्तद्दद्यात्, न रक्तं दद्यात्, रक्तमपि कुङ्कुमजं जलजं च दद्यात्' इत्यादीनि द्रष्टव्यानि। धूपे च विशेषो विष्णुनोक्तः-'प्राण्यङ्गं सर्वं धूपार्थे न दद्यात्। घृतमधुसंयुक्तं गुग्गुलश्रीखण्डागरुदेवदारुसरलादि दद्यात्' इति। दीपे च विशेषः शङ्खेनोक्तः—'घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः। वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत्' ॥ आच्छादनं च शुभ्रं नवमहतं सदशं दद्यादिति। एतच्च सर्वं वैश्वदेवानुष्ठानकाण्डमुदङ्मुखः कुर्यात्। पित्र्यं काण्डं दक्षिणामुखः। यथाह वृद्धशातातपः-'उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः। प्रदद्यात्पार्वणे सर्वं देवपूर्वं विधानतः' ॥ इति ॥

(मिता०) अपसव्यमिति। ततो वैश्वदेवकाण्डानन्तरमपसव्यं यज्ञोपवीतं प्राचीनावीतं कृत्वा। अत्र तत इति वदता काण्डानुसमयो दर्शितः। पित्रादीनां त्रयाणामयुग्मान्कुशान्द्विगुणभुग्नान् अप्रदक्षिणं वामतो विष्टरार्थमासनेषूदकपूर्वकं दत्त्वा पुनरुदकं दद्यात्। 'अपः प्रदाय (२)दर्भान्द्विगुणभुग्नानासनं प्रदायापः प्रदाय' इत्याश्वलायनस्मरणात्। एतच्चाद्यन्तयोरुदकदानं वैश्वदेवे पित्र्ये च प्रतिपदार्थं प्रतिपादनार्थं द्रष्टव्यम्। अथ पितॄन् पितामहान् प्रपितामहानावाहयिष्य इति ब्राह्मणान्पृष्ट्वा आवाहयेति तैरनुज्ञातः 'उशन्तस्त्वा निधीमहि' इत्यनयर्चा पित्रादीनावाह्य 'आयन्तु नः पितरः' इत्यादिना मंत्रेणोपतिष्ठते॥ २३०-२३३ ॥

अपहता इति तिलान् विकीर्य च समन्ततः(३) ॥
यवार्थास्तु तिलैः कार्या दद्यादर्घ्यादि पूर्ववत् ॥ २३४ ॥

(वी० मि०) दैवे यवसाध्या अर्थाः क्रियास्तास्तिलैः कार्याः। अर्घ्यादि तु पूर्ववद्दैवश्राद्धवत् दद्यात्। आदिश(४)ब्देन उत्तरकालदेयस्यापि गन्धादेः सङ्ग्रहः। कुर्यादिति पाठे त्वर्घ्यदानाद्याच्छादनान्तं

---

(१) अकण्टकिजं ख.। (२) द्विगुणभुग्नान्कुशान्दत्वापः ख. ग.।
(३) इदं पद्यार्धं क० ख० पुस्तकयोर्नास्ति। (४) पदेन—इति ख० पु० पाठः।

अर्घ्यादित्यस्यार्थः। तुशब्देन यवोसीति (१)मन्त्रव्यवच्छेदः। तिलानावपति, तिलोऽसीति पित्र्ये कात्यायनेन मंत्रान्तरोपदेशात् ॥ २३४ ॥

(वी० मि०) पित्र्यार्घ्येषु विशेषमाह—

दत्त्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः ॥
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः ॥ २३५ ॥

तेषां पितृणामर्घ्यं दत्त्वा संस्रवानर्घशेषजलानि अर्थात्पितामहादित्रयस्य पात्रे पितृपात्रे विधानतः प्रावृत्तिकक्रमेण कृत्वा निधाय पितृभ्यः स्थानमसीति मन्त्रेण पितृपात्रमधो न्युब्जं करोति कुर्यादित्यर्थः। एवं पृच्छतीत्यत्रापि विध्यर्थकताऽवगन्तव्या। अध इत्यभिधानात्पितृपात्रोपरि पितामहपात्रस्य तदुपरि प्रपितामहपात्रस्य न्युब्जीकरणं सिद्ध्यति। ब्रह्मपुराणे—

पितृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत्।

यमः—

प्रथमं पैतृकं पात्रं तत्र पैतामहं न्यसेत्।
प्रपैतामहं ततो न्यस्य नोद्धरेन्न च वाचयेत् ॥ २३६ ॥

(मिता०) अपहता इति। दत्त्वेति च। यवार्थाः यवसाध्यानि कार्याण्यवकिरणादीनि तिलैः कर्तव्यानि। ततोऽर्घ्यपात्रासादनाच्छादनान्तं पूर्ववत्कुर्यात्। तत्रायं विशेषः—तिलान् 'अपहता असुरा रक्षांसि' इत्यादिना मन्त्रेण ब्राह्मणान्परितोऽप्रदक्षिणमन्ववकीर्य राजतादिषु पात्रेषु त्रिष्वयुग्मकुशनिर्मितकूर्चान्तर्हितेषु 'शंनोदेवीः' इति मन्त्रेणापः क्षिप्त्वा 'तिलोसि सोमदैवत्य' इत्यादिमन्त्रेण तिलान् गन्धपुष्पाणि च क्षिप्त्वा स्वधार्घ्यं इति ब्राह्मणानां पुरतोऽर्घ्यपात्राणि स्थापयित्वा 'या दिव्या' इति मन्त्रान्ते पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्यमिति ब्राह्मणानां हस्तेष्वर्घ्यं दद्यात्। एकैकमुभयत्र वेत्यस्मिन्नपि पक्षे पात्रत्रयं कार्यम्। एवमर्घ्यं दत्त्वा तेषामर्घ्याणां संस्रवान्ब्राह्मणहस्तगलितार्घोदकानि पि(२)तृपात्रे गृहीत्वा दक्षिणाग्रं कुशस्तम्बं भूमौ निधाय तस्योपरि 'पितृभ्यः स्थानमसि' इत्यनेन मन्त्रेण तत्पात्रं न्युब्जमधोमुखं कुर्यात्। तस्येह-

---

(१) मन्त्र इत्यारभ्य तिलोसीति—इत्यन्तं क० पुस्तके नास्ति।

(२) पात्रे प्रथमे गृहीत्वा ग०।

परि अर्घ्यपात्रपवित्राणि निदध्यात्। अनन्तरं गन्धपुष्पधूपदीपाच्छादनानि पितर्यं ते गन्धः पितरिदं ते पुष्पमित्यादिना प्रयोगेण दद्यात् ॥ २३४-२३५ ॥

अग्नौ करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम् ॥
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ(१)पितृयज्ञवत् ॥ २३६ ॥
हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः ॥
यथालाभोपपन्नेषु रौप्येषु तु विशेषतः ॥ २३७ ॥

(वी० मि०) घृतप्लुतं घृताक्तं अन्नमादाय श्राद्धीयादन्नाद्दुद्धृत्य अग्नौ करिष्य इति पितृब्राह्मणं पृच्छति, अथ कुरुष्वेति ब्राह्मणेनाऽनुज्ञातः पितृपक्षवत् पिण्डपितृयज्ञ इव अग्नौ हुत्वा हुतशेषमन्नं भाजनेषु समाहितोऽनन्यचित्तः प्रदद्यात् परिविष्यात्। भाजनानि विशिनष्टि यथेति। यथालाभमुपपन्नेषूपकल्पितेषु विशेषतः फलातिशयार्थितायां तु रौप्येषु रूपमयेषु। अन्नाविति साग्निपरं निन्दन्न(२)परिवेषणार्थमनग्नेस्तु विप्रपाण्यादौ होमः।

अग्न्यभावे तु विप्रस्य पाणौ वाऽथ जलेऽपि वा।

इति वचनात्। तुशब्देन श्रुतशेषमित्यत्रान्वितेनाग्न्यभावेऽपि पात्रे होमो व्यवच्छिन्नः ॥ २३६-२३७ ॥

(मिता०) अग्नौकरणमाह द्वाभ्याम्—

अग्नौकरिष्यन्निति। हुतशेषमिति च। अनन्तरमग्नौकरिष्यन्घृतप्लुतं घृताक्तमन्नमादाय ब्राह्मणान् पृच्छेदग्नौकरिष्ये इति। घृतग्रहणं सूपशाकादिनिवृत्त्यर्थम्। ततस्तैः कुरुष्वेत्यभ्यनुज्ञातः प्राचीना(३)वीती शुद्धमन्नमुपसमाधाय मेक्षणेनादायावदानसंपदा जुहुयात् 'सोमाय पितृमते स्वधानमः। अग्नये कव्यवाहनाय स्वधानमः' इति पिण्डपितृयज्ञकल्पेनाग्नौ हुत्वा मेक्षणमनुप्रहृत्य हुतशेषं मृन्मयवर्जं यथालाभोपपन्नेषु विशेषतो रौप्येषु पित्र्यादिभाजनेषु दद्यात् न वैश्वदेवभाजनेषु। समाहितोऽनन्यमनस्कः। अत्र यद्यप्यन्नावित्यविशेषेणोक्तं तथाप्याहिताग्नेः सर्वान्नपक्षे औपासनाग्नेरभावात् पिण्डपितृयज्ञानन्तरभाविनि पार्वणश्राद्धे विह(४)तदक्षिणाग्नेः संनि-

---

(१) हुत्वाग्निं—इति क० पु० पाठः। (२) निस्वपरि०—इति ख० पु० पाठः।
(३) वीतीन्मसुप क. वीत्याग्निमुप.। (४) विहितः ख.।

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़ पुस्तकमालायाः ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।	रु. आ. पा.
१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १)	१—८—०
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १)	१०—०—०
३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् । (वैशेषिकं १)	३—८—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् (वैदिकं १)	०—६—०
५ लघुशब्देन्दुशेखरः चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १)	१०—०—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपण" दिनकरीय महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रीव्याख्यासहिता । (न्यायं १)	६—०—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)	०—८—०
८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १)	०—८—०
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १)	०—१२—०
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । [ज्यो० १]	२—०—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । [कर्म० १]	०—८—०
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २)	१—४—०

		रु. अ
तत्र मुद्रितग्रन्थनामानि		
१३ श्रीमत्सनत्सुजातीयम्-श्रीमच्छङ्करभगवत्पादविर-		
चितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । [वे०३]	१	—
१४ कुमारसंभवं महाकाव्यम् । महाकवि श्रीकालिदास-		
वि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम्		
सम्पूर्णम् । (काव्यं २)	२	-
१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्र-		
काशाख्यसंस्कृत-भाषाटीकासहितः [छंदः १]	०	-
१६ कारिकावली मुक्तावली-न्यायचन्द्रिका-		
टीकाद्वयसहिता सटिप्पणा । (न्याय २)	१	-
१७ पारस्करगृह्यसूत्रं हरिहरभाष्य-गदाधरभाष्यद्वय-		
सहितम् । (कर्मकाण्डं २) सादीजिल्द	३	-
१८ संक्षेपशारीरकम्-मधूसूदनीटिका भाग १—२		
(वेदान्तं ४)	१०	—
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दु-		
शेखरपरिष्कृतिनिर्मितिः ।	०	—
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः)	१	-
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् (स्तोत्रवि०)		
२२ बौद्धाऽऽचार्य श्रीधर्मकीर्तिप्रणीतः सटीक-		
न्यायबिन्दुः भाषाटीकासहितः (बौद्धन्याय वि० १)	१	-
२३ सपरिष्कृत दर्पणसहित वैयाकरणभूषण		
सारः (व्याकरणं वि० ३)	४	—
२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता।		
प्रथमाध्याय-प्रथमभागः । (न्यायविभाग ३)	४	-
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामी-		
शास्त्रीकृतया सारविवेचिन्या व्याख्ययासहितः		
(मीमांसावि० १)	३	-
२६ पौरोहित्यकर्मसारः (कर्मकाण्ड वि०)	०	—

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्त
चौखम्बा संस्कृत सीरीज आ
विद्याविलास प्रेस, गोपालमंदिर के
बनारस सिटी ।